ये चाद्रिद्राविणो ऽर्चन्ति मेरुस्थं चन्द्रशेखरं ।
कालीं चैवाद्रियन्ते ये निशार्च्यां शावरोत्सवैः ॥५॥
अश्राव्याण्यपि गीतानि नृत्यतालावृतानि वै ।
जगदम्बार्चने चैव विलापाः सह रोदनैः ॥६॥
फलदात्री च गंगा यामर्चन्तो ह्रीकरैः स्तवैः ।
नारीभूतं हरिं रत्यै शिवस्य प्रवदन्ति ह ॥७॥
वृषभो बहुमांसश्च पुण्यो मान्यः स बालिशैः ।
सर्व्वे तिष्ठन्तु संत्यक्ता एते मायोद्भवो मया ॥८॥
किंतु यत्साम्प्रतं स्पष्टो मां प्रकाशो व्यशिक्षयत् ।
गास्यामि स्पष्टवाक्यानां जिह्वानामैश्वरं वचः ॥९॥

*IMPRIMATUR:*

| | |
|---|---|
| Daniel Calcutta,<br>T. Dealtry, L.L.B. *Archdeacon,*<br>G. U. Withers, A.M. *Prof. Bish. Coll.* | Ordinary Syndics. |
| J. W. J. Ouseley,<br>G. T. Marshall, | Associate Syndics |

OCTOBER, MDCCCXXXVII.

श्रीपित्रे पुत्रायच सदात्मनेच नमः ॥ शिष्य उवाच ॥ भूमण्डलस्थाः सकला मनुष्या मज्जन्ति
पापाब्धितरङ्गमध्ये । केनानुजीवेयुरतो गुरो ते तन्मां विमूढं कृपया वद त्वं ॥१॥ पृष्टा
मयान्ये गुरवोऽपि ते तु परस्परं भिन्नमताः समस्ताः । नानोपदेशं कथयन्ति तस्मात् तेषां मते
नास्ति रुचिर्मदीया ॥२॥ मद्भाग्यतस्त्वं समुपस्थितस्तु यथार्थशास्त्रैकपथानुयायी । अतो
गुरो मे दययादिश त्वमाराधनात्कस्य भवेन्नृमुक्तिः ॥३॥ गुरुरुवाच । साधु पृष्टं त्वया शिष्य 
सत्यमार्गानुदर्शिना । अतो वक्ष्येऽधुनाहं त्वां परित्राणपथं नृणां ॥४॥ ईश्वरैकसुते खृष्टे
विश्वासोऽभेदरूपकः । मुक्त्युपायो नृणामेक ईशेन स्थापितो भुवि ॥५॥ शिष्य उवाच ॥ कोऽसौ
खृष्टो नरा यत्र विश्वासान्मुक्तिमाप्नुयुः । यत्राभेदमतिः कार्य्या स चेशैकसुतः कथं ॥६॥
तत्सर्वं श्रोतुमिच्छामि संशयच्छेदहेतवे । यस्य प्रत्ययमात्रेण ज्ञानदृष्टिर्भवेन्नृणां ॥७॥ गुरु

रूवाच ॥ अथ यद्यत्वया पृष्टमिदानीं शरलात्मना । शृण्वनन्यमना भूत्वा गदतो विस्तरा
न्मम ॥८॥ विश्वादौ संस्थितः शब्दः स चेशेन परात्मना । सहासीन्न पृथक् सोऽपि स्थितः
सततमीश्वरः ॥९॥ ईश्वरीयगुणाः सर्वे तस्मिन्नित्यं हि संस्थिताः । ईश एव स शब्दो
ऽस्ति न च भेदलवोऽप्यतः ॥१०॥ स तु सर्वजगत्स्रष्टाजरोऽनाश्योऽप्यजस्तथा । अविकारी
निराकारो रागद्वेषादिवर्जितः ॥११॥ अदृश्यः समदृष्टिश्च सर्वव्यापी विभुस्तथा । रज २
स्तमोविहीनः सन्नप्रमेयो दयामयः ॥१२॥ इत्याद्याः पितरीशे ये गुणरत्नाकरे गुणाः ।
अनिर्वाच्या अनिर्णेयाः स्वर्गवासिगणैरपि ॥१३॥ ते तथैवेशशब्देऽपि तत्स्वरूपे स्थिता ध्रुवं ।
तद्वस्तुप्रतिमूर्त्तौ तत्तेजउज्ज्वलनेऽपि च ॥१४॥ ईश ईशात्स जातः प्राक् सर्वविष्टपसृष्टितः ।
सत्प्रकाशात्प्रकाशश्च सदीशश्च सदीश्वरात् ॥१५॥ न सृष्टः स हि जातस्तु नित्यकालावधि ध्रुवं ।

स मूर्त्तिः परमेशस्य तच्छक्तिर्बुद्धिरेव च ॥१६॥ तद्युक्तोऽखिलमेतद्वै ससर्जेशश्चराचरं । तद्धीनेन
न सृष्टं तु यत्स्थितं यद्बभूव वा ॥१७॥ यथान्तःकरणाद्वाणी निर्गता तत्र संस्थिता । तथेशात्स
विनिर्यातस्तस्य चापि हृदि स्थितः ॥१८॥ यथा सौरोज्ज्वलश्चैव सूर्य्याज्जातोऽप्यभिन्नकः ।
तथेशाज्जायमानोऽपि तदभिन्नः स विद्यते ॥१९॥ *एतादृशगुणः पुत्रः स्वर्गं पितृनिभस्त्यजन् ।
धरणिस्थान् परित्रातुं स्वस्रष्टाज्ञाविवर्जिनः ॥२०॥ अदृश्यं चैश्वरं रूपं नृरूपेणापि गोपितं ।
नृभ्यो दर्शयितुं सत्यद्युतिजीवनदायकं ॥२१॥ अवतीर्णोऽभवद्भूमौ स्वसृष्टायामपीश्वरः ।
प्रकाशस्तमसो मध्ये तद्विधृत्यसमर्थिनः ॥२२॥ तदुत्पत्तिं प्रवक्ष्यामि यथाशास्त्रविनिश्चितं ।
मुक्त्यारम्भममुं शिष्य शृणु मे यत्नतोऽधुना ॥२३॥ इति श्रीखृष्टसंगीतायां येषूत्पत्तिपर्वणि
(योहन्निरचितमङ्गलसमाचारस्य प्रथमसर्गादुद्धृतः) शब्दावतारो नाम प्रथमोऽध्यायः ॥

गुरुरुवाच ॥ यवनादिविजेतॄणां रौम्याणां क्षितिरक्षिणां । सम्राज्यस्य महाराज औगुस्ते
कैसरि स्थिते ॥१॥ निवृत्तान्युग्रयुद्धानि सर्वस्मिन् भूमिमण्डले । यदासन् वैक्रमशकेऽब्दे पंचा
शत्तमे गते ॥२॥ तदा कन्यां मरीयाख्यां परमेशर्च्चिनीं प्रति । प्रेरितः स्वर्गदूतोऽग्र्यो गब्रिये
लाभिधः सतीं ॥३॥ तद्गेहं नशरेत्पुर्य्यां गलीलानीवृति स्थितं । यहूद्योत्तरदिक्स्थायां विशन्ने
तद्वचोऽब्रवीत् ॥४॥ दूत उवाच ॥ नमस्तुभ्यं मरीये हे प्रसादैः सुपरिष्कृते । ईश्वरस्ते स ४
हायोऽस्ति धन्या त्वं स्त्रीगणेषु च ॥५॥ गुरुरुवाच ॥ एवं प्राप्य नमस्कारं सा शङ्काविस्मयावृता ।
चिन्तयामास किं भूतमित्यथो सोऽब्रवीत्पुनः ॥६॥ दूत उवाच ॥ मा भैषीर्हे मरीये त्वं प्राप्नो
रीशाद्ध्यनुग्रहं । गर्भधारिण्यतो भूत्वाचिरात् पुत्रं सविष्यसे ॥७॥ येषूर्नाम स भावी तु महा
दरसमन्वितः । भूतले चेशपुत्रः स सदा ख्यातो भविष्यति ॥८॥ तत्पितुर्दाविदस्तस्मै दायी

सिंहासनं विभुः । राजा याकोबवंशस्य भविता स सनातनं ॥९॥ गुरुरुवाच ॥ इति श्रुत्वा कुमारी सा दायूदवंशोद्भवाय वै । योसेफाख्याय वाग्दत्ताप्यनूढोचे ऽतिविस्मिता ॥१०॥ कथमेतद्भवेत् पुंसः संसर्गो नास्ति मे यतः । इति श्रुत्वा वचस्तस्याः प्रत्यवादीद्विभोश्चरः ॥११॥ दूत उवाच ॥ आयास्यति सदात्मा हि त्वयीदानीमसंशयं । सर्वेश्वरस्य शक्तिश्च त्वां समाच्छादयिष्यति ॥१२॥ अत एव त्वदुत्पन्नं यत्पुण्यं तोकमेव तत् । परमेशात्मजं ख्येयमिति विज्ञातिनिश्चितं ॥१३॥ आत्मीयालीसबा ते हि या बन्ध्या कथिता जनैः । सापि वार्द्धक्यसमये पुत्रगर्भाधुनाभवत् ॥१४॥ इदानीमेव भूतश्च तद्गर्भः षष्ठमासकः । यत ईश्वरासाध्या न क्रिया कापि विद्यते ॥१५॥ गुरुरुवाच ॥ मरीया तु ततो ऽवादीदीशदास्यां तथा मयि । संपूर्णं ते वचो ऽस्त्वित्थं दूतस्त्वन्तर्हितस्तदा ॥१६॥ गलीलायास्तदा साधु शिखरैः

५

परिवेष्टितं । यह्रदपुरमभ्यच्छंत् स्वीयबन्धुदिदृक्षया ॥१७॥ तत्पतेर्जकरीयस्य याज
कस्य निकेतने । निविश्य प्राणमतत्रस्थितां वृद्धामलीसबां ॥१८॥ यदासौ गर्भिणी त्वस्या
नमो ऽश्रौषीत्तदा शिशौ । तद्गर्भे स्पन्दिते ऽनर्द्दुच्चैर्व्याप्ता सदात्मना ॥१९॥ अलीसबो
वाच ॥ धन्यासि स्त्रीगणेषु त्वं धन्यं गर्भफलं च ते । मत्प्रभोर्जननी कस्माद्हो मां द्रष्टुमा
गता ॥२०॥ किमाश्चर्य्यमभूदेतत् श्रुत्वा ते हि नमस्कृतिं । समस्पन्दत मद्गर्भे ऽधुना 6
नन्देन बालकः ॥२१॥ ईशोक्तास्तु प्रतिज्ञा या पूरणीयाः सुमन्यते । मङ्गला सास्त्विति श्रुत्वा
मरीया प्रजगौ मुदा ॥२२॥ मरीयोवाच ॥ विभुं प्रशंसन्ति ममासवो तथेश्वरे मदात्मापि
अहर्षं मुक्तिदे । यतो मदीयामतिनम्रतामसौ समालुलोचे महिमप्रदायकः ॥२३॥ अहो इतो
मां सकला हि मङ्गलां मनुष्यवंशाः कथयेयुरुच्चकैः । यतो मदर्थे ऽखिलशक्तिको ऽकरोन्महा

क्रिया एव स पुण्यनामकः ॥२४॥ अतीव तस्मात्त्रसतां गणे ऽखिले समस्तवंशावधि तद्दया स्थिता।
स बाहुना दर्शितविक्रमो ऽप्यरींस्तदात्मगर्वेष्वनुदत्पृथक् पृथक् ॥२५॥ स एव सिंहासनतो
ऽधिपानधश्चकार नम्रांस्त्वनयत्किलोपरि। बुभुक्षितान् स्वादुतमैरतर्पयत्स चानुदच्छून्यकरान्
धनान्वितान् ॥२६॥ पितॄन् पुरोवाच स नो ऽखिलान्वयार्थमब्रहादीन् प्रति यां तु संविदं।
सुसंस्मरंस्तां दययाधुना निजं स इस्रयेलं भृतकं ह्युपाकरोत् ॥२७॥ गुरूवाच॥ इति स्तुत्वा
प्रहर्षेण स्वबन्धुपतिसद्मनि । ततो ऽलीसबया सार्द्धं मासत्रयमुवास सा ॥२७॥ अथ स्वं प्रत्य
गात्सेहं मरीया धन्यवादिता । तद्वन्धोश्च तदा पुत्रः समुत्पन्नो महात्मकः ॥२८॥ इति श्रीख्रीष्ट
संगीतायां येषूत्पत्तिपर्व्वणि (लूकरचितमङ्गलसमाचारस्य प्रथमसर्गादुद्धृतो) धन्यनमस्कारो
नाम द्वितीयो ऽध्यायः ॥

शिष्य उवाच ॥ कोऽसौ महात्मकः पुत्रो मातृगर्भे स्थितोऽपि यः । स्पन्दितोऽभूत्प्रहर्षेण
स्वप्रभोर्मातुरागतेः ॥१॥ तदुत्पत्तिर्मरीयायै या दूतेनापि भाषिता । कीदृक् साभूद् गुरो प्रोक्तं
येषूजन्मेव किं न वा ॥२॥ गुरुरुवाच ॥ असादृश्यं बहु ज्ञेयं तयोर्हे शिष्य जन्मनोः । मारीये
यं हि यमोकमीशपुत्राख्यमेव तत् ॥३॥ योऽवतीर्णो मनुष्यत्वं संलेभे क्षितिमण्डले । शब्दो
ऽसृष्टो बभौ तस्मिन् सत्तेजोजीवनप्रदः ॥४॥ पुत्रस्त्वालीसबो नैवं प्रकाशोऽभूदसौ महान् । ८
तत्साक्ष्यार्थं तु नुन्नः स ईशेन नरमात्रकः ॥५॥ तस्माद्भिन्ना तदुत्पत्तिर्नहि शक्त्या सदात्मनः ।
विना पित्रा स कन्यायां जात ईश्वरपुत्रवत् ॥६॥ वृद्धयोरपि पित्रोस्तु स सर्वेऽन्ये नरा
इव । तनयोऽभूद्यथा शिष्य कथयिष्यामि तेऽधुना ॥७॥ पुरोक्तसमयात्पूर्वं देशे चापि
यहूदिके । तद्राजे चैव हेरोदौ रोम्यनाथहिते सति ॥८॥ यिरूषलेमसंस्थेऽसौ मन्दिरे पर

मात्मनः । पौरोहित्यं यथाभागं जकरीयः समाचरत् ॥९॥ धर्म्मज्ञो धर्म्मशीलश्च सपत्नीको
ऽतिमुदितः । ईशस्याज्ञा व्यवस्थाश्च समस्ताः पालयन् सदा ॥१०॥ स्वस्तिके ज्वालयन्धूपान्
यथाकार्य्यं पुरोहितैः । एकाको किंतु सर्व्वौघाः प्रार्थयंस्तद्बहिः स्थिताः ॥११॥ धूपवेदेस्तदा
तेन दक्षिणे समदृश्यत । पार्श्वे तिष्ठन् महेशस्य दूतस्तेजःसमन्वितः ॥१२॥ जकरीयं तु
तद्दृष्ट्वा विस्मयापन्नमानसं । बिभ्यतं च समालोक्य वाक्यमभ्यब्रवीदिदं ॥१३॥ दूत ९
उवाच ॥ मा भैषीर्जकरीय त्वं यत्त्वया हि चिरादपि । प्रार्थितं तदिदानीं ते शुश्राव वरदो
विभुः ॥१४॥ अलीसबा हि ते पत्नी या बन्ध्या कथिता जनैः । सा ते सविष्यते पुत्रं देय
योहन्निनामकं ॥१५॥ तव चैव तदुत्पत्तेर्महानन्दो भविष्यति । बहवश्चापि तज्जाताः प्रहर्षि
ष्यन्ति मानुषाः ॥१६॥ परमेशसमीपे हि स महान् भविता ध्रुवं । सुरां द्राक्षारसं चैव न

पास्यति कदाचन ॥१७॥ ऽप्याप्तः सदात्मना भावी स्वमातुर्गर्भतोऽपि सः। ऐस्रयेलान् बहूंश्चैवा नेष्यति स्वप्रभोः पथि ॥१८॥ स हि तत्पुरतो गन्ताप्यलीयस्य महागुरोः। पुनः संजीवत इवात्मशक्त्याच्छादितो दृढं ॥१९॥ पितॄणां हृन्दि तत्पुत्रान् प्रत्यावर्त्तयितुं किल। मतौ च धर्म्मशीलानामानेतुं विधिलङ्घिनः ॥२०॥ गणं प्रभुविनीतं च संस्कर्तुमपि यास्यति। इति श्रुत्वा वचस्तस्य प्रत्युवाच पुरोहितः ॥२१॥ जकरीय उवाच ॥ भवदुक्तं तदाश्चर्य्यं कुतो मे निश्चितं भवेत्। वृद्धोऽहं हि तथा चापि वृद्धा पत्न्यस्ति मेऽधुना ॥२२॥ दूत उवाच ॥ गब्रियेलाभिधोऽहं वै नित्यमीशान्तिके स्थितः। तेन चाप्यधुनैनां ते सुवार्त्तां दातुमीरितः ॥२३॥ स्वकाले भाविनीं तां तु यतो न त्वममन्यथाः। अतो मूको भवेर्यावन्न सा फलवती भवेत् ॥२४॥ गुरुरुवाच ॥ इत्युक्त्वान्तर्हितो दूतः किंतु यज्वप्रतीक्षया। ऽप्यूहा वहिःस्थिताः

सर्वे विलम्बाद्विस्मयं ययुः ॥२५॥ वाग्धीनं त्वागतं श्रेषे तं दृष्ट्वेङ्गनकारिणं । प्रत्यादिष्टः स
दैवेन किंचिदित्यनुमेनिरे ॥२६॥ तथा मूकः स्थितः सो ऽथ पौरोहित्यं समाचरत् ।
समाप्ते ऽस्मिंस्ततः स्वीयं नगरं स पुनर्गतः ॥२७॥ ततस्तेनैव तत्पत्नी साहरोणकुलोद्भवा ।
भूता गर्भिण्ययथात्मानं पञ्चमासमगोपयत् ॥२८॥ तथेदानीं नृमध्ये मे विभुर्निन्दामपाहरत् ।
इत्यवोचत्तदाप्यस्या अवाचि स्वामिनि स्थिते ॥२९॥ षष्ठमासे तु तद्बन्धुर्यदा तां द्रष्टुमागता । १९
यथाप्रोक्तं मरीया सा कुमारी धन्यवादिता ॥३०॥ पत्न्यां नमः प्रकुर्वन्त्यां स्पन्दिते चापि
तच्छिशौ । नाशक्नोज्जकरीयः स वचो वक्तुं कदाचन ॥३१॥ पूर्णे तु नवमे मासे वृद्धाया अपि
तत्स्त्रियः । प्रसवस्य तदा काले तत्पुत्र उदपद्यत ॥३२॥ प्रदत्तो ऽलीसबाये तु प्रसादः पर
मात्मनः । इति श्रुत्वा तदात्मीयाः समानन्दंस्तया सह ॥३३॥ ते ऽष्टमे ऽह्नि तु बालस्य परिच्छे

दार्थमागताः । जकरीयेति तन्नामाचिकीर्षन् पितृसन्निभं ॥३४॥ निषेधन्ती तु तांस्तत्र प्रत्य
वादोद्लीसबा । कर्तव्यं मच्छिशोर्नाम योहन्निरिति किंतु ते ॥३५॥ ईदृशं नाम वंशे ऽस्य
न बभूव कदाचन । इत्युक्त्वा बन्धवो ऽपृच्छंस्तत्तातमिदमिङ्गनैः ॥३६॥ स तु मूको ऽर्थिते पात्रे
योहन्याख्यो ऽस्तु मच्छिशुः । इत्यालिखदतः सर्वे विस्मयं परमं गताः ॥३७॥ तदा
निमिषमात्रे ऽपि मूकत्वरहितः पिता । जकरीयो महानन्दादस्तावीत्परमेश्वरं ॥३८॥ ततो १२
महाभयो भूतः सर्वेषां प्रतिवासिनां । व्याप्तस्तद्वार्तया चापि तद्देशः शिखरावृतः ॥३९॥ सर्वे
ऽपि तद्वचः श्रुत्वा स्थापयन्तो दृढं हृदि । बालो ऽयं भविता कीदृगित्यवोचन् परस्परं ॥४०॥
ईश्वरस्य तु पाणिस्तमनुजग्राह बालकं । पूर्णः सदात्मना चाथ तत्पिता संस्तुतिं जगौ ॥४१॥
जकरीय उवाच ॥ परिस्तुतो ऽस्माभिरितो ऽस्तु सर्वदा स इस्रयेलस्य पतिर्महेश्वरः । समालु

लोचे स यतः स्ववर्गकान् ददौ च तेभ्यः परमं विमोचनं ॥४२॥ कुले हि तद्भक्तियुतस्य दाविदो
विमुक्तिशृङ्गं महदुद्दधार सः । यथा समूचे जगदादितोऽपि स सतां मुखैरेव निजप्रवा-
चिनां ॥४३॥ विमुक्तिमेवाखिलवैरितो ददौ स नः पितृन्प्रत्युदितां दयां स्मरन् । स्वसं
विदं पूरयितुं हि सद्गुणां शपं च पित्रे कृतमब्रहाय नः ॥४४॥ अतो वयं शत्रुकरात्समुद्धृता
अभीतितोऽचेम विमुक्तिदायकं । सनातनं चात्मकजीवनावधीह पुण्यधर्म्मेण तमाश्रयेमहि ॥ 13
४५॥ त्वमेव मत्पुत्र किलोर्द्धवासिनो विभोः प्रवाची भवितास्युदाहृतः । यतः प्रभोस्त्वं चलि-
तासि सम्मुखे हितां तदर्थं परिमार्जितुं सृतिं ॥४६॥ त्वमस्य वर्गं ह्युपदेक्ष्यसीशतो विमुक्त्यु-
पायं तदघापमृष्टये । विनिःसृतं तद्दयया किलारुणमिवाम्बरीक्षात्पतितं प्रगाढया ॥४७॥
तमिस्त्रमध्ये स तथैव मृत्युदे विमोहगर्त्तेऽप्युपविष्टमानुषान् । विनिःसृतो भासयितुं हि-

नाकतःपदश्च नेतुं कुशलायने ऽपि नः ॥४८॥ गुरुरुवाच ॥ इति संस्तुत्य यज्वासावहरोणकुलो
द्भवः । विरराम ततो बालो ववृधे तु दिने दिने ॥४९॥ इस्रयेलान्तरे यावन्न बभौ प्रभु
वाचकः । प्रान्तरे स स्थितस्तावन्महाशक्तिसमन्वितः ॥५०॥ इति श्रीखृष्टसंगीतायां येषूत्पत्ति
पर्व्वणि (लूकयोहन्निरचितमङ्गलसमाचारयोः प्रथमसर्गादुद्धृतो) महायोहन्निजन्मोपाख्यानं
नाम तृतीयो ऽध्यायः ॥ १४

शिष्य उवाच ॥ कस्तु दाविदसौ राजा यदुद्भव्यो महाप्रभुः । सो ऽहरोणाभिधः को वा
योहन्नेरादिवंशकः ॥१॥ अब्रहः कः प्रसिद्धः स उभयोर्वंशयोः पिता । संविदीशोदिता
तस्मै चेस्रयेलार्थमेव का ॥२॥ पूरणीयां हि तामेवोद्भव्यभूपतिकर्म्मभिः । मरीया ज्ञकरीयो
ऽपि दूतश्चैवावदन् स्फुटं ॥३॥ तस्मात्प्रत्नं तथैवैतत्सर्व्वमिच्छामि साम्प्रतं । अनुसारेण

विज्ञातुं कृपातस्तव हे गुरो ॥४॥ गुरुरुवाच ॥ यथाप्राचीनशास्त्रोक्तं तत्सर्वं विस्तरादहं ।
न शक्नोम्यधुना वक्तुं संक्षेपोक्तं तु मे शृणु ॥५॥ मत्प्रोक्तसमयात्पूर्वे ऽब्दसहस्रद्वये कलौ । शता
धिकसहस्रान्ते त्यजत्स्वर्ची विभोर्नृषु ॥६॥ तदा देशे समुद्भूतं कल्दायाख्ये तमब्रहं ।
सूर्येन्दुभार्च्चया व्याप्ते ऽभ्युवाचेश इदं वचः ॥७॥ स्वदेशं त्वं परित्यज्य स्वात्मीयांश्चापि
सर्वतः । स्वपितुर्भवनं चापि याहि मद्देश्यनीवृतं ॥८॥ महावंशाय ते चैनं दास्याम्याशीः १५
प्रदो ऽखिलं । त्वद्वंशीयाश्च सर्वे ऽपि जनाः प्राप्स्यन्ति मङ्गलं ॥९॥ श्रुत्वेदं मन्यमानः स सर्व
विश्वासिनां पिता । कनानाख्यं फलेस्तीन्यं स्वाज्ञातं नीवृतं ययौ ॥१०॥ बन्धुवर्गे च सं
त्यक्ते विभुवाक्यप्रतीतितः । वृद्धो ऽपि वृद्धभार्य्यश्च पुत्रं समुदपादयत् ॥११॥ तस्मिन्नी
शहके नाम नेतरेषु तु केषुचित् । इष्मयेलादिपुत्रेषु स्वसंविद्दायमादधौ ॥१२॥ तं संजीव

यितुं भूयः शक्तस्येशस्य चाज्ञया । आदिवंशं सुतं होतुं सुप्रियं प्रस्तुतो ऽभवत् ॥१३॥ निरुद्ध
स्त्वीशदयया पुत्रं संलभ्य जीवितं । परं विनयहेतोः स तदा प्रापाशिषं विभोः ॥१४॥
तस्मिंस्तु सुन्दरे देशे स्वोत्पाद्येभ्यः प्रतिश्रुते । उदासीनो ऽवसत्प्रेतो पितरीशहकस्तथा ॥१५॥
तत्र सो ऽजनयत्पुत्रौ याकोबैसावनामकौ । तयोर्ज्यैष्ठस्तु न प्रापोदेसावः पैतृकाशिषं ॥१६॥
याकोबस्त्विस्रयेलाख्यस्तामवाप समन्ततः । तस्य द्वादशपुत्राश्चाभवंस्तद्दायभागिनः ॥१७॥ १६
रोबिनो नाम सिम्योनो लेवीश्चापि ततः परे । यहूदो जबुलूनो ऽपि तथैवेसष्कराभिधः ॥
१८॥ दानश्च नप्थलीश्चापि गाद् आसेर एव च । सर्व्वप्रेष्ठौ च योसेफो बिन्यमीनश्च शेषजः ॥
१९॥ इस्रयेलीयवंशानां भव्यास्ते पितरस्तदा । अन्यजातेषु मन्देषु न्यवसन् दूष्यवेश्मकाः ॥
२०॥ शिष्य उवाच ॥ आब्रहाय तु यत्प्रोक्तं त्वद्वंशायैव नोवृतं । प्रदास्यामीति पूर्ण

तद्वाक्यं कथमभूद्गुरो ॥२१॥ गुरुरुवाच ॥ त्वत्पृष्टमिदमाश्चर्य्यमधुना कथयामि ते । भ्रात्री
र्ष्यया स विक्रीतो योसेफो मिश्रमभ्यगात् ॥२२॥ देश ऐगुप्तनामा स कीर्त्तितो यवनैः पुरा ।
नानाशास्त्राकरो विप्रैर्मन्त्रज्ञैर्मुण्डितैर्वृतः ॥२३॥ तत्रेशानुग्रहाद्धर्म्मी स स्वदास्यत उद्धृतः ।
राज्ञोऽपि प्रियतां यातः श्रेष्ठामात्यत्वमेव च ॥२४॥ मनस्स्यफ्रैमनाम्नोश्च जातयोः पुत्रयो
स्ततः । स वृद्धं पितरं स्वीयं भ्रातॄंश्चैगुप्तमाह्वयत् ॥२५॥ ते सपुत्राः सभार्य्याश्चानुगृहीता १७
महीभुजा । तद्देशोर्व्यां वसन्तश्चावर्द्धन्त क्रमशो भृशं ॥२६॥ याकोबात्तु परे प्रेते योसेफे
तत्सुवित्सु च । मृतेष्वैगुप्तराजेषु राजान्यो दुर्जनोऽभवत् ॥२७॥ इस्रयेलकुलं सम्यक्
स च ध्वंसितुमिच्छुकः । भारे नियोज्य दुःसह्ये पीडयामास सर्वथा ॥२८॥ तेषां प्रार्थयतां
क्लेशादहोरात्रे महेश्वरः । वचः श्रुत्वात्मदयया प्रेरयद्बन्धमोचकं ॥२९॥ मोशिर्नाम प्रपौत्रः

स लेव्यः क्रूरनृपाज्ञया । हन्तव्यः शैशवे वारो राजपुत्र्योद्धृतो ऽभवत् ॥३०॥ पालितश्च तया
सर्वं मैश्रज्ञानं स शिक्षितः । नैच्छदीशद्विषां भागं तद्राज्ये ऽपीशसेवकः ॥३१॥ सहभाग्ये
शवर्गस्य पीडितस्यापि स स्वयं । भूतो ऽतो दुष्टभूपालभीत्यान्योर्व्यां पलायितः ॥३२॥
तत्र लब्ध्वा ज्वलत्स्तम्बमध्योक्ताज्ञां विभोस्तु सः । सह भ्रात्राहरोणेन मैश्रं नूत्ननृपं ययौ ॥
३३॥ तं वै मोचयितुं दासान् नेच्छन्तं वाक्यतस्तयोः । भीमैः कर्मभिरीशस्य दर्शयामासतु १८
र्बलं ॥३४॥ तदर्थं विविधापद्भिर्गुप्ते समभिप्लुते । चरमे निखिलास्तस्मादैस्रयेला वि
निर्गताः ॥३५॥ दिने मेघेन तांस्त्वीशो वह्निना निशि चानयन् । विभिन्नं तत्कृते ऽप्यब्धिं
शुष्कोर्वीषदतारयत् ॥३६॥ सरथाश्वांस्ततो मैश्रान् प्रग्रहायानुगच्छतः । भूयः संमिलिते
तस्मिन्नब्धौ सम्यगमज्जयत् ॥३७॥ भारतप्रथितस्यैव कलेरारम्भणात्परे । पूर्णे सार्द्धसहस्राब्दे

भूतं कर्म्म तदद्भुतं ॥३८॥ तमुत्तीर्य्य तथाब्धिं ते ऽवस्थिताः प्रान्तरे मरौ । अश्रद्धाहेतुतो देशे नोपातिष्ठन् प्रतिश्रुते ॥३९॥ चत्वारिंशत्समास्तत्र भ्रमन्तो ऽभर्त्सयन् सदा । धीमन्तं नायकं मोसिमहरोणं च याजकं ॥४०॥ ईशदत्तं महाशास्त्रं दृष्टवन्तो ऽपि मोसये । सीनाय पर्व्वते ऽगम्ये विद्युद्धूमाशनीवृते ॥४१॥ तत्रापि स्वर्णवत्सं ते मैश्रदैवतसन्निभं । निर्म्मायापूजयन् मूर्खा अवमत्य महेश्वरं ॥४२॥ नाकतः पतितैर्भोज्यैः पालिताश्चापि ते सदा । १९
मोसिदण्डाहताद्ग्रावश्चोत्थितोदकपायिनः ॥४३॥ तथापि विवदन्ते स्म मैश्रभोजनलिप्सवः । तस्मात्तेषां महाव्यूहान् प्रान्तरे ऽघातयद्विभुः ॥४४॥ ये मिश्रान्निर्गताश्चापि सर्व्वे ते प्रान्तरे मृताः । विना विश्वासिनौ वीरौ येषूकालिबनामकौ ॥४५॥ ममार चाहरोणो ऽपि पिता सो ऽखिलयज्वनां । तत्पुत्रो ऽल्याजराख्यस्तु महायज्वा ततो ऽभवत् ॥४६॥ चरमं तु काना

नस्य समीपे ऽद्रावुपस्थितः । तदा मोसिरपि प्रेत ईशशास्त्रप्रवाचकः ॥४७॥ तत्स्थाने नायकों ऽभूत्स येषूरफ्रैमवंशजः । नूनपुत्रः स्ववर्गं चानयद्देशे प्रतिश्रुते ॥४८॥ ये तस्मिन् न्यवसन्पूर्वं तान् हत्वा कुक्रियान्वितान् । द्वादशांशं यथेशोक्तं स्ववंशेभ्यश्चकार तं ॥४९॥ दत्तौ योसेफ वंशाय त्वंशौ द्वौ द्विविधो ह्ययं । लैव्याय नतु दत्तोंऽश इतरैः पालितो ह्यसौ ॥५०॥ यतो लेव्युद्भवाः सर्व्वे ऽब्रहजानां पुरोधसः । एतेषु केवलाश्चापि याजका अहरोणजाः ॥५१॥ ईशोक्त्या पुण्यदूष्यं तु प्रान्तरे यद्विनिर्म्मितं । विभुनामाङ्कितस्थानं तदफ्रैमकुले ऽर्पितं ॥५२॥

शिष्य उवाच ॥ एषु सार्द्धसहस्राब्दे प्राग्वैक्रम्यशकादपि । भूतेषु किं न पूर्णाभूत् संविदुक्ता ब्रहं प्रति ॥५३॥

गुरुरुवाच ॥ एतैर्मा विद्धि संपूर्णां त्वं कार्य्यैरङ्कुतैरपि । मङ्गलं ह्यब्रहादिभ्यो विश्वासिभ्यः प्रतिश्रुतं ॥५४॥ मुक्तिं सर्व्वारिहस्ताद्धि नाशक्नोद्दातुमच्युतां । स येषू

सूनजो वीरः कनानीयविजित्वरः ॥५५॥ मृते तस्मिन्मृतेष्वेव तदाश्चर्य्यक्रियेक्षिषु । सर्व्व वृद्धेष्वथो शेषा व्यस्मरन् परमेश्वरं ॥५६॥ ततः स्वीयं विभुर्वर्गं शत्रूणां परिवासिनां । निघ्नं मुहुर्मुहुः कुर्व्वन् व्यसृजत्पापदण्डदः ॥५७॥ ततोऽनुतपतां तेषां त्यजतां चान्यदेवताः । दययानेकधा वीरान् निदधौ स विमोचकान् ॥५८॥ तेऽहूदो बारकश्चापि मन्त्रितो यो दबोरया । गिद्योनो यप्तहश्चैव संसोनश्च महाबलः ॥५९॥ इत्याद्याः कुलमीशस्य नयन्तो मोसि 21 शास्वतः । रथाश्वहीनमप्युग्रान् व्यजयन्त द्विषः सदा ॥६०॥ महायज्वन एल्यस्तु परे पुत्रौ कुयाजकौ । मलिनीचक्रतुः सर्व्वानाब्रह्मान् भ्रष्टकर्म्मभिः ॥६१॥ फलेस्तिभिस्तु युद्धेषु तेषु तौ विभुदूष्यतः । संवित्पात्रं वहिष्कृत्य सेनाग्रे ऽनयतां युधि ॥६२॥ न त्वतस्तौ जयं प्राप्य ससैन्यगणकौ हतौ । तत्संविद्वासनं चैतज्जगृहुः किल वैरिणः ॥६३॥ तत्पात्रे

त्वर्पिते देवमन्दिरान्तः फलेस्तिभिः । तदग्रे नरमत्स्योऽसौ देवो भग्नोऽपतद्भुवि ॥६४॥
दूष्यस्थाने सिलोनाम्नि श्रुत्वा तद्वैरिभिर्हृतं । ममारैलीर्महांश्चाधिरैस्रयेलान् समग्रहीत् ॥६५॥
परे तन्नायकं भूतं संवेलं सत्प्रवाचकं । शासनार्थेऽर्थयन् राज्ञोऽभिषेचं त्विस्रयेलजाः ॥६६॥
संवृत्तं तु नृपं सौलं बिन्यमीनकुलोद्भवं । अविनीतात्मताहेतोर्व्यसृजत्परमेश्वरः ॥६७॥ ततो
ऽन्यं चोदयामास स्वहृद्याधिपतिं विभुः । युवानं दाविदं नाम यहूदकुलसंभवं ॥६८॥ अरीन् २२
जित्वैशप्राग्रं चानीयातीवमुदा पुनः । नाफ्रैमस्थे सिलव्येवं किंतु शीयोन आर्पयत् ॥
६९॥ अद्रिर्यिरूषलेमस्यासौ दुर्गोऽस्त्युन्नतोऽपि च । आदिवासो यहूद्यानां प्रिय ईशस्य
चालयः ॥७०॥ विक्रमात्प्राक् सहस्राब्दे खृष्टपूर्वतरेऽपि च । षट्पञ्चाशत्समधिके दाविदे
ऽभूद्विभोर्वचः ॥७१॥ परमेश्वर उवाच ॥ त्वामन्त्यमाहूय मदीयवर्गेऽन्यास्यं महाराजमति

प्रयांस्यं । त्वया च तत्सर्व्वरिपून् विनाश्य विश्राममत्यन्तमिहाद्धामि ॥७२॥ नित्यं करिष्यामि तवैव वंशे सुमङ्गलं तस्य पिता हि भव्यः । मयापि दण्ड्या यदि पापतः स्युर्नीहं निसृक्ष्यामि सदा प्रजां ते ॥७३॥ त्वदुद्भवः खल्वधिपेभ्य उर्व्याः सर्व्वेभ्य एवोर्द्धतरो ध्रुवं स्यात् । पूर्व्वात्मजो मे स सहापि तेन तिष्ठेदनन्तं मम संविदार्थ्या ॥७४॥ इति श्रीखृष्टसंगीतायां येषूत्पत्तिपर्व्वणि (मोसिरचितपंचशास्त्राद् येषूनूनजचरित्राद् धर्म्मनायकचरित्रात् २१
संवेलग्रन्थद्वयाद् दाविद्गीतेभ्यश्चोद्धृतः) पैतृकसंविदुपाख्यानं नाम चतुर्थोऽध्यायः ॥

शिष्य उवाच ॥ गुरो यद्यन्मया पृष्टं तन्मे प्रत्युदितं त्वया । ईशोक्त्या तु कथं नित्यं दाविद्राज्यं परे स्थितं ॥१॥ गुरुरुवाच ॥ दण्ड्यास्तद्वंशजा ज्ञेया पित्रा मन्दसुता इव । निःसृष्टा नापि कस्मिंश्चित्काले वक्ष्यामि ते यथा ॥२॥ तद्वचो न तु भग्नं यदेकस्मिन् दाविदः सुते ।

पूरणीयं समाचख्युरखिला भव्यवाचकाः ॥३॥ तं मसीहं किलाब्रह्मैः ख्रष्टं वाच्यं तु यावनैः ।
ब्राह्मणैरभिषिक्तं तु प्रत्यैक्षन्तेशसेविनः ॥४॥ ज़करीयादिभद्राणां स्थिरमेतत्प्रतीक्षणं । तद्गीते
वाक्यतो ज्ञेयं प्रोक्तायाः शिष्य ते मया ॥५॥ तत्पूर्तिश्चेशदूतोक्ता कन्यां धन्योकृतां प्रति । श्रुता
किंत्वधुना श्राव्यं यद्बभूव तदन्तरे ॥६॥ दाविद्यरिन्दमे तस्मिन् पितृलोकं गते ततः । तत्सुता
नामतिश्रेष्ठः सलोमाभून्नराधिपः ॥७॥ इस्रयेले च सुस्थे स पित्रेष्टं मन्दिरं वृहत् । शीयोने २४
निर्म्ममे संवित्पात्राधारं परात्मनः ॥८॥ पूर्वं ख्रष्टावतारात्तु सहस्रं द्वादशाधिकं । वर्षाणां शिष्य
तद्भूतं सलोम्नः कर्म्म भानुमत् ॥९॥ विद्वत्तमो नृपाणां स धनवांश्चातिकीर्त्तितः । भक्तः किंतु
परे देवार्च्ची स्त्रीमन्त्रणतो ऽभवत् ॥१०॥ अतस्तत्तनयान्मूर्खाद्रहुबोमात्पितुः पदे । अभि
षिक्ताद्दशाप्यंशान् राज्यस्यापाहरद्विभुः ॥११॥ बिन्यमीनयहूदौ हि वंशौ नापजहार सः ।

द्राविदुङ्गवराजेभ्यः संस्मरन् स्वीयसंविदं ॥१२॥ अवशिष्टास्तु वंशास्ते तदाफ्रैमादयो दश ।
यरुबोमाख्यमास्थाप्य भूपं पृथगवस्थिताः ॥१३॥ यिरूषलेमयात्रातः स निरोद्धुं प्रजां निजां ।
स्वदेशे ऽर्पयदन्यार्च्चां वत्समूर्त्यन्वितां विभोः ॥१४॥ मन्दान्पुरोधसः कृत्वा स्वयं लेव्युङ्गवेत
रान् । पापैः परिप्लुतं राज्यमैस्रयेल्यमितो ऽकरोत् ॥१५॥ तथैवैतत्परे ये ये नृपा विविध
वंशजाः । तद्राज्यं प्राप्नुवन् सर्व्वे ते महेशपराङ्मुखाः ॥१६॥ तेषां दुष्टतमो ऽहाबो भूत ई
ज़बलाभिधां । शीदोनाधिपतेर्व्यूह्य देवीयज्वन आत्मजां ॥१७॥ बेलार्च्चामन्यपापानि चानि
नायैस्रयेलिषु । निषेधन्तं त्वलीयं तमजिघांसन्महागुरुं ॥१८॥ स क्रियाभिस्तु भीमाभि
र्दर्शयित्वा बलं विभोः । शेषे ज्वलद्विमानेन तच्छक्त्यारोहितो दिवं ॥१९॥ ततः पूर्णतरश्चापि
तस्य शिष्यः सदात्मना । राज्ये ऽमुष्मिन् समार्य्याख्ये ऽलीषायो ऽभूत्प्रवाचकः ॥२०॥ यहूस्त्व

हाबवंशघ्नो राजानश्च तदादयः । बेलार्चाक्षेपिणोऽप्यघो न जहुर्यारूबौमकं ॥२१॥ उन

विंशमतस्तेषां नृपं होषेयमोश्वरः । निदधौ सल्मनस्त्रस्यासुर्य्यराजस्य बन्धने ॥२२॥ असौ

देशाद्बहिष्कृत्येस्त्रयेलदशवंशजान् । दिक्षूत्तरासु च प्रेष्यान्यान्वयास्तमवासयत् ॥२३॥ तद्बहि

ष्करणं घोरं पितृदत्तार्य्यदेशतः । वर्षसप्तशतं खृष्टात्प्राग्विंशत्यधिकं मतं ॥२४॥ यहूद्या

स्त्विदमीक्षित्वा हिज्किीयश्च तन्नृपः । दाविद्वंशोद्भवः सत्यार्च्चामाचेरुः परात्मनः ॥२५॥ २६

ततोऽपि प्रतियुद्धास्तेऽसुर्य्यराजस्य सेनया । सङ्करीबस्य तां सर्वामीशेन ददृशुर्हतां ॥२६॥

शिष्य उवाच ॥ तत्पूर्वं दाविदुत्पन्ना ये ऽभवन् वंशयोर्नृपाः । दशांशनृपवत्ते किमासन्नीश

पराङ्मुखाः ॥२७॥ गुरुरुवाच ॥ तदाद्यं वै सलोम्नोऽमुं रहुबौमाभिधं सुतं । विधिलङ्घिन

मीशोऽतोऽदण्डयन्मैश्रकासिभिः ॥२८॥ हेगुप्ताद्धि महाराजः सिसङ्को भीमसेनया । आ

गत्य तत्पुरः सर्व्वा मन्दिरं चाप्यलुण्ठयत् ॥२९॥ परेऽनुतापिनस्त्वस्मात् पुत्राच्चाबीयसंज्ञकात् ।
पौत्र आसा अभूद्राजा दाविद्द्डिभुसेवकः ॥३०॥ तथैवैतस्य तनयो राड् यहोषफटाख्यकः ।
अहाबाय हितोऽप्येवमोश्वराज्ञा अमन्यत ॥३१॥ यहोरामस्तु तत्पुत्रोऽहाबभाग्नीमुदूढ
वान् । अथल्यामेतयोश्चैव सुतोऽहज्योऽतिदुर्नृपौ ॥३२॥ पितामह्या जिघांसोस्तु यवासो
ऽहज्यजः परे । यज्वना पालितो गुप्तौ वयःस्थो राज्यमाप्तवान् ॥३३॥ तस्थावोशा २७
र्व्वको ऽमुष्य यज्वनो जीवनेऽथ तु । अन्यमार्गेऽचलन्नद्द्मशीयश्च तत्सुतः ॥३४॥ उज्जीय
स्त्वमशोये स्वे हते पितरि भूमिपः । अधिकारं विना यष्टुमिच्छुः कुष्ठीकृतः क्षणात् ॥३५॥
योथामस्तत्सुतो धर्म्मं न जहौ किंतु तत्सुतः । अहाजो नाम बेलादिदेवार्च्चामानयद्भुवि ॥
३६॥ राज्ञा तु हिज्किीयेनाघं तत्परिहृतं पितुः । यहूद्या अखिलाश्चैवाहूता ईशार्च्चनं पुनः ॥

३७॥ ततश्चागत्य कतिचिज्जबुल्लनमनस्सिजाः । आसेरजाश्च तं देशं विभुमन्दिरशोभितं ॥
३८॥ यहूदीयक्षितौ तस्यां लेव्या इव पुरोधसः । यथोक्तं मोचनं प्रापुरसुर्य्यरिपुहस्ततः ॥
३९॥ तस्य सिद्रस्य राज्ञस्तु मनस्सिर्नामतः सुतः । पित्रा परिहृतं पापं स्वदेशे ऽस्थापय
त्पुनः ॥४०॥ अतः स विजितो ऽसुर्य्यैः क्षमां प्रार्थयदीश्वरं । किंतु तत्पुत्र आमोनो नानु
तेपे कदाचन ॥४१॥ तस्य पुत्रस्तु योसीयो ऽतियुवा राज्यमाप्तवान् । मनस्सिस्थापिता २८
मूर्त्तीर्वेदीश्चापि व्यनाशयत् ॥४२॥ प्रशासंश्चाखिलं राज्यं मोसिशास्त्रानुसारतः । ईशस्याति
प्रियो भूतः स दाविद्विजिकीयवत् ॥४३॥ निकौस्त्वैगुप्तशार्द्दूलः समागत्योग्रसेनया । तं
हत्वा च नृपं शुद्धं जग्राहार्य्यपुरीमपि ॥४४॥ सो ऽपि कल्दायभूपेन नबुकद्रशरेण तु । प्रति
युद्धो जितश्चापि मिश्रं प्रति पलायितः ॥४५॥ तत्कृतं योयकीमं तु पितुः स्थाने यहूदपं ।

दृष्टं तुल्यं सुतं चैव तस्य पश्चान्नृपीकृतं ॥४६॥ कोनीयं नाम संगृह्य काल्दायानामसौ नृपः ।
श्रेष्ठान् बद्धांश्च लोप्रं च बाबिलं पुरमानयत् ॥४७॥ तन्महाबन्धने खृष्टात्प्राग्भूते षट्शताब्दके ।
त्यक्तो यिरूषलेमे ऽन्यो योसीयस्य सुतो ऽधिपः ॥४८॥ यः परे शिदिकीयाख्यस्तदेकादशहा
यने । श्रद्धां विच्छिद्य काल्दाय्यवीरस्य व्यच्छिनद्युगं ॥४९॥ अतः क्रोधात्समागत्य नबुकद्र
शरः पुरं । दग्ध्वा समन्दिरं शेषान् बद्धीचक्रे यहूदिनः ॥५०॥ शिष्य उवाच ॥ दावि २९
त्सलोमवासे तु घोरं तज्ज्वलनं गते । चिरं महाभिषिक्तात्प्राक् तन्मध्ये किमभूद्गुरो ॥५१॥
गुरुरुवाच ॥ बद्धा बाबिल्यभूमध्ये ऽवसन् याकोबजाः स्थिते । नबुकद्रशरे ऽस्यापि पुत्रे
दौहित्र एव च. ॥५२॥ अस्मिंस्तु स्वैर्हते राज्यं लेभे काल्दायमन्यजः । हितस्त्वेतेषु सर्वेषु
दान्येलो ऽभूद्यहूदकः ॥५३॥ स कोनीयादिभिः सार्द्धमानीतो बाबिलं शिशुः । साम्राज्य

स्यादिवासं तं ज्योतिर्ज्ञैः पण्डितैर्वृतं ॥५४॥ अन्यदेवार्च्चिनां मध्ये तत्रापि सुमहानभूत् । अमात्यश्चैव बुद्ध्या स ईशहार्द्दः प्रवाचकः ॥५५॥ राज्यं पश्चात्तु काल्दाय्यं फलेस्तीसूरजित्वरं । पारसोकाधिपो वीरः कूरोनामा व्यनाशयत् ॥५६॥ हिज्किीयस्य काले यो ऽपोषायेण प्रवाचिना । नामोक्त ऐस्त्रयेलानां बन्धमुक्तिं स आदिशत् ॥५७॥ तस्याज्ञयाथ निर्गत्यैस्त्रयेलैर्बहुभिः सह । लेव्यैर्यहूदकाद्यैश्च दाविड्जो जरूबाबिलः ॥५८॥ वंशात्स हि न जातोऽपि सलोम्नो भ्रातुरस्य तु । नाथ्नः किंत्वभवद्राज्ञां दायभागी यहूदिनां ॥५९॥ तत्पिता हि सलत्येलो दाविड्जत्वादसूनुना । बङ्गभूभुक्कोनीयेन दत्तपुत्रीकृतो ऽभवत् ॥ ६० ॥ दाविद्वंश्यावरोहो ऽसौ क्षितिं यैरूषलेमिकां । गतो निर्म्मातुमारेभे समन्दिरपुरं पुनः ॥६१॥ यत्र संदहनकालेऽपि यिरिमीयः प्रवाचकः । तथैवानुषितं स्थेयं सप्तत्यब्देष्ववोचत ॥६२।

तत्कर्म्म त्वन्यलोका ये सत्मनत्राद्यसुर्य्यपैः । सामार्य्यैं स्थापिता देशे व्यरून्धंस्ते ·तियत्नतः ॥
६३ ॥ एतेषां चापवादेन कूरसो महतः परे । अर्त्तक्षेरूर्दीर्घबाहुर्न्यषेधीदपि कर्म्म
तत् ॥६४॥ यत्पित्रा क्षेरूषा राज्ञा दार्य्युःपुत्रेण सुन्दरी । यहूदिन्येस्तरा व्यूढा सूसाख्ये
राजवेश्मनि ॥६५॥ सर्व्ववर्गममुञ्चत्स्वं शत्रुसंकल्पितात्लयात् । तांश्चापि मार्द्दकायादीन्प्रा
पयद्गौरवं महत् ॥६६॥ किंत्वार्त्तक्षेरूषः पश्चाद्दार्य्यूर्नामापरो नृपः । कूरा इव विनिर्म्माणं ३१
सत्पुरस्याशात् पुनः ॥६७॥ तथा निर्म्मितमीशौको दान्येलो यत् पुरावदत् । सप्ताब्दे सप्तति
गुणेभव्यं प्राग् यज्ञसिद्धितः ॥६८॥ ततो ·र्त्तक्षेरूषो ·न्यस्य राज्ये यज्वाज्रनामकः । तत्परे
नहमीयश्च नुन्नो निर्गत्य बाबिलात् ॥६९॥ ज्ञातीन् स्वोर्व्वीस्थितान् शत्रोर्निर्भयीचक्रतुर्द्विषां ।
पुरं च मन्दिरं चापि स्थापयामासतुर्दृढं ॥ ७० ॥ पारसीकास्तु तद्राज्यं मिश्रसूरादि

जित्वरं । ये ये संलेभिरे सम्यग्यहूदिभ्योऽभवन् हिताः ॥७१॥ दार्य्युषं चरमं त्वेषा
मलेक्सन्द्रो महाबलः । यावनः सेनया जित्वा तत्साम्राज्यं व्यनाशयत् ॥७२॥ आसिन्धु
नदमप्येनां चापि भारतीयां स नीवृतं । आगत्य पौरवं चैव कंचिज्जित्वा नराधिपं ॥७३॥
तस्मिन् नात्यविशत् किंतु चक्रवर्त्ती स बाबिले । त्रिशते खृष्टपूर्वेऽब्दे चतुर्विंशाधिके मृतः ॥
७४॥ कल्दायपारसीकाभ्यां तत्साम्राज्यं महत्तरं । सेनान्यो यावनास्तस्य चतुर्धा व्यभजं १२
स्तदा ॥७५॥ प्राग्दिश्यं सौर्य्यमापांशं पारसीकादिधारकं । शिलूको जित्वरो नाम स प्राप्तो
भारतान्तिकं ॥७६॥ यो मौर्य्यचन्द्रगुप्तस्य मगधेशस्य सन्निधौ । दूतं पाटलिपुत्रेऽपि निवृत्ता
योधनोऽनुदत् ॥७७॥ दक्षिणं मैश्रकं त्वंशं प्तुलिमायो नृपोऽग्रहीत् । तस्य तद्वंशजानां च वशी
भूता यहूदिनः ॥७८॥ सुपालितास्तदग्रैश्च स्वशास्त्राण्यपि मैश्रके । अलेक्सन्द्रीयनगरेऽध्यापयन्

यवनांस्तदा ॥७९॥ गतेष्वब्देष्वनेकेषु त्वलेक्षन्द्रमृतेः परे । देशो यहूदकोंऽशो ऽभूत् सौर्य्यराज्यस्य नीवृतः ॥८०॥ तस्मिंस्तु निर्द्दयो राजान्तियुको नाम भानुमान् । अपरि ष्कारयामास मन्दिरं परमात्मनः ॥८१॥ तदाद्यैश्च तथा दुष्टैर्यावनैः सूरपैस्ततः । पीडिता बहुदुःखौघात्तद्देवार्च्चापराङ्मुखाः ॥८२॥ तद्वलाद्वहवश्चैव लैव्या ईश्वरमत्यजन् । तदनुग्रह तस्त्वन्ये ऽभवन् सद्गणनायकाः ॥८३॥ मक्कबायाभिधानास्ते ऽतिवीरा भ्रातरस्त्रयः । यहूदो २२
योनथा चैव सीमोनश्चापि याजकः ॥८४॥ क्रमेण ह्यधिपा भूत्वा सेना ईश्वरवैरिणां । वहि ष्कृः स्ववासांश्चैस्त्रयेलांश्चक्रिरे पुनः ॥८५॥ हुर्कानाख्यश्च योहन्निः सीमोनस्य सुतो बली । ततोऽन्ये च तथाब्रह्मानानयन्नहरोणजाः ॥८६॥ तदन्ते ऽन्यच्च साम्राज्यं महीयो यावनादपि । रौम्यं प्रत्यग्दिशः प्रादुर्भूय जिग्ये बलाज्जगत् ॥८७॥ ततो यिरूषलेमं च सेनानीरयहोन्म

हान् । पम्पीयो नाम रोमीयो विक्रमादित्यके शके ॥८८॥ तत्परे रोमसिंहेन यूल्यसंज्ञेन
केशरा । हेरोधाख्य इदूमीयः कृतो भूपो यहूदिनां ॥८९॥ अतिष्ठत्स च तद्राजो ऽप्यौगुस्ते
केशरि स्थिते । ऐसावादपि वंशात्स उत्थितो नैस्त्रयेलकात् ॥९०॥ किंतु तत्पितरो धर्म्ममवा
लम्बन्त मौसिकं । मन्दिरं सो ऽप्यलंचक्रे विभोर्नूतनमिव व्ययात् ॥९१॥ क्रूरात्मा स त्वभूद्राजा
सपत्नीपुत्रनाशकः । दाविद्राज्यास्थितिंचातो व्यलपन्नैस्त्रयेलिनः ॥९२॥ विरतांश्च चिराद्भूमा ३४
बीशवाक्यप्रवाचिनः । सदात्मन्याप्नमनसः शतवर्षचतुष्टये ॥९३॥ हतं च धर्म्मशास्त्राणां
सत्यार्थं शिक्षकैरपि । पाषण्डैर्विविधैश्चापि विभ्रान्तं नीतिदर्शनं ॥९४॥ सर्व्वमेतत्स्मरन्तस्ते
दुःखेन महता वृताः । अब्रहादिभ्य उक्तं यत् तस्य पूरणमार्थयन् ॥९५॥ इति श्रीखृष्टसंगीतायां
येषूत्पत्तिपर्व्वणि (राजचरित्राद् राज्यकालवाक्याद् इषाययिरिमीयदान्येलभ्य्वाक्येभ्यो

ऽग्नहमीयचरित्राभ्याम् हस्तरावरित्रान् मक्कबायचरित्रान् फ्लाव्ययोसेफादिरचितप्रबन्धे भ्यश्चोद्धृतो) दाविद्वंशावलिर्नाम पंचमोऽध्यायः

शिष्य उवाच ॥ दाविद्धेरोदिराजोर्यन्मध्येऽभूदखिलं गुरो । अलीयस्य वचश्चेव दशवंशाल यो ऽपि च ॥१॥ काल्दाय्यं पारसीकीयं यावन्यं रौम्यमेव च । क्रमशः पृथिवीजेतृ तत् साम्राज्यचतुष्टयं ॥२॥ श्रुतमेतन्मया सर्वं त्वदारब्धं तु यत्पुरा । संवित्पूरणमुत्पेदे ३५
दाविद्वंशे कथं तदा ॥३॥ कथं तस्मै हि खृष्टाय पैत्रं सिंहासनं ददौ । ईशो हेरोदि समये गुरो तन्मेऽधुना वद ॥४॥ गुरुरुवाच ॥ नमस्कृता मरीया सा जकरीयनिके तनात् । यथोक्तं ते मया पूर्वं स्वदेशं पुनरागमत् ॥५॥ गलीलाख्यो हि देशोऽसावन्य औरुषितः पुरा । तदा तु बहुभिश्चैवमन्त्यैरपि यहूदिभिः ॥६॥ तत्रैव नशरेन्नाम्नि योसेफो

न्यवसत्पुरे । जरूबाबिलवंश्यो ऽपि सामान्यः स नृपोद्भवः ॥७॥ आत्मने तु स वाग्दत्तां कन्यां
संदृश्य गर्भिणीं । न तु विज्ञाय तद्धेतुं सदात्मातुल्यशक्तिकं ॥८॥ स्वसंसर्गविहीनां तां निश्चि
त्यातः स गोपने । कलङ्कख्यापनानिच्छुर्वर्जितुं समकल्पयत् ॥९॥ एतच्चिन्तयमानस्तु व्याकु
लात्मा स धार्म्मिकः । स्वप्ने दृष्ट्वा विभोर्दूतं तस्यैतदशृणोद्वचः ॥१०॥ दूत उवाच ॥ दाविदः
पुत्र योसेफ मा भैषीर्धार्म्मिको ऽपि नु । त्वं पत्नीमात्मनो नेतुं मरीयां तामदोषिणीं ॥११॥ ३६
अस्यां हि यत्समुत्पद्यमिदं ज्ञेयं सदात्मनः । येष्वाख्यः स्यात्स पापेभ्यः स्ववर्गं हि विमोक्ष्यते ॥
१२॥ गुरुरुवाच ॥ इत्यैशदूतवाक्येन निर्म्मलां तां व्युवाह सः । नासजत्तु तया सार्द्धं प्रसव्ये
श्वरपुत्रया ॥१३॥ अतस्तद्विद्धि निर्णीतमिषायस्याद्भुतं वचः । यत् प्राक् सप्तशताब्दे ऽपि राज्ञे
ऽहाजाय भाषितं ॥१४॥ इषाय उवाच ॥ अहो ते ऽद्भमाश्चर्य्यमीशः प्रदाता कुमारीह काचिद्भवेद्गर्भ

धात्री । ततोऽपि प्रसोतैव पुत्रं महान्तं किलास्मत्सहस्थायकेशाभिधेयं ॥१५॥ शिष्य उवाच ॥
स्पष्टमीशावतारस्य प्राचीनं तच्चभूद्वचः । इदानीं जननं तस्य विस्तराद्वद मे गुरो ॥१६॥
गुरूरुवाच ॥ तदा कैशर औगुस्तादाज्ञापत्रं विनिर्गतं । स्ववशीभूतदेशेषु करादानाय
सर्वशः ॥१७॥ ऐस्रयेलास्ततश्चापि स्वे स्वे वंशपुरे सकृत् । स्वनामानि वसून्येव लेखितुं
सकला गताः ॥१८॥ समरीयस्तु योसेफः स ततो दाविदः पुरे । वंशादिलेखनायैव ययौ ३७
बेथ्लह्माभिधे ॥१९॥ यत्रोत्पेदे महान् दाविन्नत्पिनेसीस्तथैव च । तत्पितामह ओबेद्न बो
जस्य धनिनः सुतः ॥२०॥ तद्वंशीयस्तु शास्त्रेण योसेफः संमतो द्विधा । नाथन्न दाविदः
पुत्रात्सलोम्नश्चान्यधा नृपात् ॥२१॥ एवं हि जारुबाबिल्यो वंश उक्तो यथा मया । तथा
स्मादपि योसेफः समुद्भूतो द्विधोच्यते ॥२२॥ ततो मरीयया सार्द्धं पूर्णे तद्वंशजैः पुरे ।

तुल्यार्थमागतैः स्थानं पान्थशालेऽपि नाप सः ॥२३॥ तच्छालमन्दुरायां तु स्थानं संप्राप्य गर्भिणी । तत्रापि भव्यवक्त्रोक्तं कुमारी सुसुवे सुतं ॥२४॥ वस्त्रैश्चाराजकैस्तं वै सर्वाधारमवेष्टत । पशुभोजनपात्रे च सर्वभूतेशमार्पयत् ॥२५॥ क्षेत्रे तन्निकटस्थे तु कतिचिन्मेषपालकाः । रात्रौ जागरिणः स्वावीनरक्षन् यत्नतस्तदा ॥२६॥ तत्रैतेषु महातेज ऐश्वरं पर्यभासत । बिभ्यत्सूपस्थितश्चापि दूत ऐशोऽब्रवीदिदं ॥२७॥ दूत उवाच ॥ अहो मा ३८
भैष्ट धन्यं हि समाचारं ददामि वः । सर्ववर्गार्थमेवातो महानन्दो भविष्यति ॥२८॥ युष्मदर्थं समुत्पेदे ह्यद्य यो दाविदः पुरे । एको विमुक्तिदाता स खृष्ट एव महाप्रभुः ॥२९॥ तस्यैतल्लक्षणं ज्ञेयं वराशिपरिवेष्टितं । शयानं बालकं यूयं मन्दुरायामवाप्स्यथ ॥३०॥

गुरुरुवाच ॥ इत्थं ब्रुवति तस्मिंस्तु तत्क्षणादप्युपस्थिता । स्वर्गात्सेनैव दूतानामेतां संगायतां

स्तुतिं ॥३१॥ दूता ऊचुः ॥ महेश्वरायोर्द्ध्वतमेष्वपि ध्रुवमितो ऽस्तु लोकेषु यशःप्रकीर्त्तनं ।
क्षितौ तु सन्धिः कुशलान्विता भवेदनुग्रहो नृष्वपि साधुकांक्षिषु ॥३२॥ गुरुरुवाच ॥ इति
गीत्वैवं दूतास्ते ऽन्तरीक्षे ऽन्तर्हितास्तदा । ईशदत्तोपदेशं तु मेनिरे मेषपालकाः ॥३३॥ अतो
बेथ्लहमं गत्वा तन्महाकर्म्मदृष्टये । मरीयां तत्पतिं बालं चापश्यन्मन्दुरान्तरे ॥३४॥
तत्सविधं तु संप्राप्य हृष्टास्तद्देशवासिषु । खृष्टजन्मोपदिश्यातो ऽकारयन् विस्मयं परं ॥
३५॥ पुनर्गत्वा च भद्रास्ते श्रुतदृष्टौघहेतुतः । प्रशशंसुः स्तवैरीशं स्वप्रसादाच्छलक्ष्मदं ॥३६॥
सर्व्वं तु सुविचार्य्यैतन्मरीया धन्यवादिता । ईशानुग्रहतः पूर्णं हृद्येवास्थापयद्दृढं ॥३७॥ पूर्णं
चान्यदभूद्वाक्यं तस्याः संकल्पनाद्विना । गतायाः करमात्रार्थं नशरेतः पुरात्स्वकात् ॥३८॥
यत्सप्तशतपूर्व्वाब्दे मीकेनेशप्रवाचिना । प्रोक्तं यथा बुधैर्ज्ञातं जन्मस्थानप्रचारकं ॥३९॥

मोक उवाच ॥ अयि बेथ्लहमाभिधेक्रते पुरि यद्यप्यधुना यहूदिषु । त्वमनेकपतिष्वणुः
स्थिता न तथा स्याः कथिता सनातनं ॥४०॥ य इतो हि भवेत्त्वदुद्भवः स नयेन्मत्कुलमैत्र
येलकं । अपि तस्य विनिःसृतिः प्रभोश्चिरकालावधिरस्त्यनादिका ॥४१॥ शिष्य उवाच ॥
जन्मस्थानं शिशोः स्पष्टं तेनोक्तं भव्यवाचिना । ईशत्वमवतारं च संबुध्येऽव्यक्तमप्यतः ॥४२॥
गुरुरुवाच ॥ अतिस्पष्टं न किमपि पुराणैर्भव्यवक्तृभिः । गीतं पूरणमात्रात्तु बोधनीयं
समन्ततः ॥४३॥ तस्मात् स्पष्टतरं त्वन्यो ऽहाजाय प्रोक्तवान् पुरा । कन्याप्रसवनं पश्चा
दिदमप्यद्भुतं जगौ ॥४४॥ इषाय उवाच ॥ गलीलादिदेशे तमोव्याप्तमार्गे भ्रमन्तो नृवर्गा
अपश्यन् महोजः । अधो मृत्युगर्ते ऽन्धिकाच्छादिते ऽपि समासीनमर्त्यान् प्रकाशो ऽध्यभास्त ॥
४५॥ त्वया वर्द्धितास्ते त्वदग्रे च हृष्टा फलादातृहृष्ट्येव नष्टापदोघाः । विभक्तायलोप्त्रा हि

मद्यानवद्धिड्युगोत्क्षेपतुष्टा विभग्नारिदण्डाः ॥४६॥ त्वमीशावरः कर्म्म गिद्योनवत्तन्न योधा इवान्ये तुमूलासृगार्द्राः । त्वदीयाज्ञयाञ्जेव वर्म्माणि तेषां सुरक्तानि यान्तीध्मवद्दीतिहोत्रं ॥४७॥ इदानीं हि पुत्रः प्रजातोऽस्मदर्थे प्रदत्तश्च नः स्कन्धधेयाधिराज्यः । स नाम्नाद्भुतो मन्त्रदः शक्तिकेशो युगोत्पादकः सन्धिनाथोऽपि च स्यात् ॥४८॥ तदैश्वर्य्यसन्ध्योः प्रवृद्धिर्ह्यनन्तास्ति सिंहासने दाविदः खल्वितोऽपि । भवेन्न्यायधर्म्मेण तत्स्थापनं चेतिवाक्यं विभूत्साह ४१ संपूरणीयं ॥४९॥ इति श्रीखृष्टसंगीतायां येषूत्पत्तिपर्व्वणि (रूथाचरित्रात् संवेलशास्त्रादिषाय भव्यवाक्यनां सप्तमनवमसर्गाभ्यां मीकभव्यवाक्यानां पञ्चमसर्गात् मत्थायरचितमङ्गलसमाचारस्य प्रथमसर्गाल्लूकरचितमङ्गलसमाचारस्यद्वितीयतृतीयसर्गाभ्यां चोद्धृतः) कुमारोप्रसवनं नाम षष्ठोऽध्यायः ॥

गुरुरुवाच ॥ तथा प्रागेफ्रते ख्याते ततो बेथ्लहमे पुरे । कन्येष्टमैस्त्रयेलैस्तं निर्म्मलासूत
निर्म्मलं ॥१॥ पुरा यत्रेस्त्रयेलस्य राखिला पत्न्यतिप्रिया । कनीयोबिन्यमोनस्य सूतिकष्टा
न्मृतिं गता ॥२॥ यस्मिंश्च स्वपितुः स्थाने यहूदीयकुलोद्भवः । दाविद्राजा महेशार्थं मन्दिरं
समकल्पयत् ॥३॥ संकल्पानुक्रमात्तन्तु नासौ योद्धा विनिर्म्ममे । सलोमेशवृतस्त्वस्मै दाविद्भः
सन्धिसंवृतः ॥४॥ शक्तिकेशाभिधोऽत्रैव दाविद्जः सन्धिपार्थिवः । मन्दिरं परमं लेभे नर ४२
देहं किलात्मकं ॥५॥ अस्मिन्नन्यनृणां सम्यङ्कुलहीने हि जन्मतः । सद्गुणेऽन्यवसद्गुप्तमै
श्वर्य्यं स्वस्तिके यथा ॥६॥ कुमार्य्यास्त्वपि गर्भं यो नावमेने महाप्रभुः । धर्म्माण्यन्यनृणां
सोऽपि नावमन्यत कानिचित् ॥७॥ तस्माल्लेभे स्वसंस्कारं परिच्छेदं दिनेऽष्टमे । ईश्वराय
प्रतिष्ठां च चत्वारिंशेऽहि मन्दिरे ॥८॥ शिष्य उवाच ॥ संस्कारौ महामाचार्य्य कस्मानावि

स्मयेलजेः । जन्मतोऽह्नोस्तयोर्लभ्यो विशेषात्कथयाधुना ॥९॥ गुरुरुवाच ॥ शेफोऽग्र
त्वकपरिच्छेदश्चिह्नं यो विभुसंविदः । पुंनामकरणं चाद्यो धर्म्मसंस्कार एव सः ॥१०॥ यं च
कारेश्वरादिष्टोऽब्रहो विश्वसिनां पिता । बालमीशहकं स्वीयांश्चेष्मयेलादिकाखिलान् ॥११॥
इष्मयेलोद्भवास्तस्मादारबास्तेभ्य एव च । जातो मुहम्मदः पश्चात्खृष्टीयाहितशास्त्रकृत् ॥
१२॥ अतश्चाप्यखिला वर्गास्तदसत्याधृगामिनः । संस्कारं संलभन्तेऽमुं पोगण्डा इष्मयेल ४३
वत् ॥१३॥ संविद्यायांशिनस्त्वेनं स्वपितेशहको यथा । अष्टमेऽह्नि तथा प्रापुः सच्छ्रद्धा
धर्म्मलक्षणं ॥१४॥ तद्वंशीयादतोऽप्यग्र्याद्यस्मात्प्राप्यं हि मङ्गलं । अब्रहाद्याः सुविश्वासाः
सर्व्ववंशेषु मेनिरे ॥१५॥ सोऽप्यमुं प्राप संस्कारं वरधर्म्मप्रसिद्धये । मलहीनोऽपि लक्ष्मोऽयं
कामादिच्छेदनस्य तत् ॥१६॥ तथान्येषां हि दोषार्थं सहित्वा रक्तपातनं । निर्द्दोषः स

तदा लेभे येषूनाम विमोचकं ॥१७॥ मातुर्यत्प्रजनात्पूर्वं ईशदूतोदितं पुरा । नाम्नां
स्वादुतमं ह्येतत्सर्वभूतैः प्रकीर्तितं ॥१८॥ यस्या हि प्रतिमामात्रं मुक्तेर्नूनमुतो ददौ । देश ईश
प्रतिज्ञाते ऽब्रहजान् किल नीतवान् ॥१९॥ स्थितो मोसिपदे येषूस्तां पूर्णां शाश्वतीं सतीं ।
दायी विश्वासिनामेष आस्वर्गमपि नायकः ॥२०॥ यां नान्ये नायकाः केचिन्न मोसिरपि
शास्त्रदः । संसारप्रान्तरभ्रान्तनृभ्यो दातुमशक्नुवन् ॥२१॥ येष्वि सर्वारिजित्येवं संस्कृते ४४
ऽस्मिन् महीयसि । तन्मातुस्नत्परे मासे ऽतिष्ठच्छास्त्रादशौचिता ॥२२॥ तच्छेषे तु सती
सेच्छन् पतिबालसमन्विता । स्वशुद्ध्यर्थं समुत्त्रष्टुं कपोतौ विभुमन्दिरे ॥२३॥ चत्वारिंशे
यतो ऽह्येनं बलिं दातुं प्रसूतितः । आज्ञां प्रोवाच मातृभ्यो मोसिरीश्वरशास्त्रदः ॥२४॥
तं चैव प्रथमोत्पन्नं प्रतिष्ठापयितुं तदा । येषूमीशाय मातैच्छद्धर्म्मशास्त्रोदितं यथा ॥२५॥

किंतु संस्कारयोर्मध्ये या बभूव नवा क्रिया । तां प्राक् ते कथयिष्यामि मोक्षैश्वर्य्यप्रकाशिकां ॥
२६॥ इति श्रीख्रिष्टसंगीतायां येषूत्पत्तिपर्व्वणि (मोसिरचितपंचशास्त्राद् नूनजयेषूचरित्राद् धर्म्म
नायकचरित्राद् राज्यकालवाक्याद् दाविद्गीतेभ्यो लूकरचितमङ्गलसमाचारस्य द्वितीयसर्गा
च्चोद्धृतो) मोक्तृनामकरणं नाम सप्तमोऽध्यायः ॥

गुरुरुवाच ॥ नहि भद्रैः समन्तात्सोऽज्ञातो दूरस्थितैरपि । अन्यजैः सत्प्रकाशस्य यद्दूद्योर्व्यां ८॥
किलादयः ॥१॥ तदा यिरूषलेमे हि प्राग्दिशः समुपस्थिताः । पण्डिताः पारशीकाया
ज्योतिर्ज्ञा ईशचोदिताः ॥२॥ तेऽतिदूरपथं गत्वा स्वाज्ञाते सत्पुरे विभोः । तत्राश्चर्य्य
मिदं वाक्यमब्रुवन्निस्रयेलजान् ॥३॥ पण्डिता ऊचुः ॥ राजा समुत्पेद इहाधुना यो
यहूदिनां कुत्र स संस्थितोऽहो । प्राच्यां हि नक्षत्रमवेक्ष्य तस्य तदर्च्चनायात्र समागताः स्मः ॥

४॥ गुरुरुवाच ॥ इत्यन्यजैरपि प्रोक्तं हेरोदिः श्रुतवान् नृपः । सर्वे यैरूषलेमीयाश्चात्यन्तां
क्षुब्धिमाप्नुवन् ॥५॥ ततो यिरूषलेमस्थान् प्रधानान् यज्वनो विभोः । शास्त्रोपदेशकांश्चापि
समाहूयाब्रवीन्नृपः ॥६॥ हेरोदिरुवाच ॥ गुरवो ज्ञातुमिच्छामि युष्माभिः शिक्षितो बुधैः ।
यः ख्रिष्टो ऽभीष्यते ऽस्माभिः क्व समुत्पाद्य एव सः ॥७॥ शास्त्राध्यापका ऊचुः ॥ महाराजेन यत्पृष्टं
तद्वक्ष्यामो ऽतियत्नतः । स्पष्टं तज्जब्रवीन्मीको ऽहाजकाले प्रवाचकः ॥८॥ अयिबेथ्लुहमेत्यादि ४६
वाक्याज्जन्मस्थलं प्रभोः । अस्मज्ज्ञातं यहूदीयपुरं बेथ्लहमं ध्रुवं ॥९॥ तस्माल्लघारपोषं
समेतयेल्योघनायकं । भव्यं मन्यामहे काले ऽनादिनिःसरणान्वितं ॥१०॥ गुरुरुवाच ॥
एवं ज्ञापितवन्तो ऽमुं भव्यवक्तुरिमां स्फुटां । ख्रिष्टोत्पत्तिस्थलोक्तिं ते याजकाध्यापका ययुः ॥
११॥ अतितुष्टस्तु धूर्त्तः स तच्छ्रुत्वा परदेशिनः । आहूय पण्डितान् गुप्त्या वचस्तानेतद्

ब्रवीत् ॥१२॥ हेरोदिरुवाच ॥ यदर्थं हे महाभागा मद्भूमिं यूयमागताः । सर्वं मयोपकार्य्यं तद्भुजा वित्त निश्चयं ॥१३॥ युष्मदर्थं 'त इच्छामि संश्रोतुमतिविस्तरात् । कथं तज्जन्म नक्षत्रमाविर्भूतं कदा च वः ॥१४॥ गुरूरुवाच ॥ इदं राज्ञो वचः श्रुत्वा शरलाः पण्डितास्ततः । तत्पृष्टं विस्तरात्सर्वं ज्ञापयामासुरेव तं ॥१५॥ तस्मिन्समाप्त आख्याने यन्नैर्जिज्ञासितं वचः । ततथाज्ञापयज्जूतो यथायज्वोदितं नृपः ॥१६॥ हेरोदिरुवाच ॥ ॥१७ अविज्ञां मत्प्रजामेतद्रहस्यं कार्य्यमद्भुतं । ज्योतिज्ञी ईशनीता हे मा पृच्छत कदाचन ॥१७॥ मूर्खत्वाद्यदसौ वर्ग ईर्ष्यायाश्चैव याजकाः । नावोचन्नधुना तद्वो ज्ञापयिष्याम्यहं मुदा ॥१८॥ शास्त्राणि नः पुरादेशाद्रचितानि सदात्मनः । युष्मत्पृष्टं जनिस्थानं ह्याहुर्बैथ्लहमं स्फुटं ॥१९॥ पंचक्रोशे पुरं तत्तु दक्षिणस्यामतः स्थितं । गत्वातो मृगयध्वं तं महायत्नेन

प्रच्छियुं ॥२०॥ प्राप्य त्वन्यानिदं कांश्चिन्मा ज्ञापयत मां विना । ज्ञापितोऽहं च तत्रेत्वा
राजानं प्रार्थितास्म्यमुं ॥२१॥ गुरुरुवाच ॥ इति श्रुत्वातिसंतुष्टा अङ्गोचन्नुरमी वचः ।
जिघांसुत्वमजानन्त ऋजवो धूर्तभूपतेः ॥२२॥ मुमुक्षूनपि तान् प्राग् हि नक्षत्रं राजलक्षणं ।
यिरूषलेममात्रावध्यानयद्विभुनार्पितं ॥२३॥ यस्मात्तत्रेशशास्त्रज्ञान् परमात्मालये किल ।
प्रच्छनीयमभूत्स्थानं सर्वलोकेष्टजन्मनः ॥ २४ ॥ तन्निविष्टमैस्रयेलीयशास्त्रात्प्राप्योपदेशनं । ४८
न तत्पुण्यपुरेऽतिष्ठन् हेरोदिवचनात्परे ॥२५॥ किंतु बेथ्लहमं यत्नाच्छिशोराज्ञो दिदृक्षया ।
अगाच्छन्नेव सहिता न कैरपि यहूदिभिः ॥ २६ ॥ तदर्थं निर्गतैस्तैस्तु भद्रचित्तैर्महा
पुरात् । प्राग्दृष्टं प्राचि नक्षत्रं यत् तदेवेक्षितं पुनः ॥२७॥ अत्यनन्दंस्तु तद्दृष्ट्वा राज्ञो जातस्य
लक्षणं । तदग्येऽप्युपदेशार्थं चलद्बेथ्लहमावधि ॥२८॥ तस्मिन् ग्रामे यदा ते तु विष्टा

दावित्पुराभिधे । तदादृश्यत नक्षत्रमेकगेहोपरि स्थितं ॥२९॥ ततस्तस्मिन् प्रविश्यान्त
रीथनीतिविदो बुधाः । सच्छिशुं ददृशुर्मात्रान्वितं धन्यमरीयया ॥३०॥ दण्डवत्तं प्रणेमुस्त
ते चिरोत्कर्षपूरकं । लोकानां दण्डधातारं सर्वपुण्येष्टमुज्ज्वलं ॥३१॥ नमष्कृत्योपहारांस्ते
तस्मै तु ददुरुत्तमान् । आनीतान्दूरदेशात्स्वान्तसमुत्सृष्टये मुदा ॥३२॥ सुवर्णं किल राज्ञे
ते शान्तिकेशाय कुन्दरं । आदत्तनरभावाय त्वयच्छन् रसगन्धकं ॥३३॥ एवं तं द्रव्यदानैस्ते ४१
स्मत्सहस्थेश्वराभिधं । कुमार्य्या मातुरङ्कस्थमपि संसेव्य निर्ययुः ॥३४॥ अथ स्वौकः पुन
र्गन्तुमिच्छतस्तत्पुरेऽपि तु । शयानांस्तर्ह्युपातिष्ठत्साधूनेशमिदं वचः ॥३५॥ श्रीपरमेश्वर
उवाच ॥ आदिष्टा अपि हेरोदिं माभियाताततायिनं । पथान्येन तु देशं स्वं याता
वाप्तवराः पुनः ॥३६॥ गुरुरुवाच ॥ तथादिष्टा विभोर्वाण्योत्तरं येरूषलेमकं । मार्गं

मारुह्य देशं स्वर्मेन्द्रेण प्राचलन्पथा ॥३७॥ तथा महापुरीं तां तेऽनभिज्ञातात्मराजकां । त्यक्ता
दूरे ययुः प्राक्स्थे स्वदेशे पारसीकके ॥३८॥ सर्वांश्चाज्ञापयंस्तत्र विमुक्त्यासक्तमानसान् ।
यहूद्याधिपमुत्पन्नं सर्वलोकतमोनुदं ॥३९॥ यत्प्रचार्य्यमहामुक्त्या त्रिंशदब्दात्परे त्वितः ।
आहूया अन्यजाः सर्वे पुण्यखृष्टीयमण्डले ॥४०॥ किंतु सेवितवत्स्वेषु पुर्य्यामीसोजदाविदः ।
खृष्टमघ्येषु सर्वेषां तथैवानैत्त्रयेलिनां ॥४१॥ वाक्यानीशप्रवक्तृणां पूरणारम्भमाप्नुवन् ।
गायतां खृष्टकालीयक्रियाः शक्त्या सदात्मनः ॥४२॥ गुप्तार्थवचसोऽप्यज्ञवर्गे ते दावि
दादयः । कार्य्यां तद्राजपुत्रस्यार्च्चां प्रोचुः परगोत्रजैः ॥४३॥ तदेकं खल्विषायेण शिष्य
प्रागुदित्तेन ते । गीतं शृण्वन्यजातीनां भव्याह्वानविवर्णनं ॥४४॥ इषाय उवाच ॥ समु
त्पत्स्यते नूनमीस्यः यिफातो महादण्डयुक्तोऽवरोहोऽत्युदारः । तमाच्छादयेत्स्वोश्वरस्यार्य्य

आत्मा सुधीमन्नशक्तीशभक्तिप्रदाता ॥४५॥ सदात्मावृतं नूनमौसीशिफोत्थं पृथिव्यां स्थितं
सर्वबर्गध्वजं तं । समोध्वान्यराष्ट्रोद्भवो ऽन्वेषितारो ऽतितेजोयुतं चाप्नुयुस्तद्विरामं ॥४६॥
तथाहेश्वरो गर्भतो ऽप्यर्हमेनं सृजन्नात्मवर्गैस्त्रयेलस्य मुक्त्यै । इदं चेत्तु न स्यादपीशस्य साक्षा
त्वदैश्वर्य्यदातुर्भवेरयतेजाः ॥४७॥ लघीयो हि याकोबमात्रोद्भवां ते कुलानां पुनःस्थापने
बन्धमोक्षे । परोज्ञाविनामप्यहं त्वां तमोघ्नं करिष्यामि सन्मुक्तये सर्वभूमौ ॥४८॥ नरै
रप्यवज्ञात वर्गावगीतातिदूरान्नृपास्त्वां समेत्यार्च्चितारः । जगत्येव प्रत्यन्तभूम्यस्त्वया
प्यासदार्हेण मत्संविदः स्थापयित्रा ॥४९॥ तमोगर्त्तबद्धा निशम्य त्वदाज्ञामुदेष्यन्ति रम्य
स्थलेष्वेव नेयाः । नगेष्वप्यहं मार्गमेभ्यः करिष्ये विमुक्तेभ्य एवाखिलाशाभ्य ऊर्ध्वाः ॥५०॥
प्रगायान्तरीक्ष प्रनन्देष पृथ्वि ह्यपुत्राभवद्या महेशार्य्यभूमी । इदानीं सुतान् साखिलोर्व्याः

समेतांस्त्वद्यध्वजं प्रत्यवेक्षेत हृष्टा ॥५१॥ इति श्रीखृष्टसंगीतायां येषूत्पत्तिपर्व्वणि (मोसि
पंचशास्त्राद् इषायभव्यवाक्यानामेकादशोनपंचाशत्तमसर्गाभ्यां मत्थायरचितमङ्गलसमाचारस्य
द्वितीयसर्गाच्चोद्धृतः) सन्नायकनक्षत्रोदयो नामाष्टमोऽध्यायः ॥

गुरुरुवाच ॥ तदा यिरूषलेमे तु बुधानां पुनरागतिं । दुर्नृपोऽपेक्षमाणः स निर
न्तरमचिन्तयत् ॥१॥ मया संप्राप्तराज्येन विनाश्यमतियत्नतः । दाविदुद्भव्यराजस्य ५२
मच्छिन्नस्य प्रतीक्षणं ॥२॥ प्रत्नवाक्येभ्य उत्पन्नं तत् समस्ता यहूदकाः । विशेषाच्छास्त्रवेत्तारः
पालयन्ति सनातनं ॥३॥ स खृष्टः पर उद्भव्य इति मह्यं भयादमी । आहुः किंतु तमुद्भूत
माशंसन्तेऽन्तरे दृढं ॥४॥ अचिरादपि भावीतो दान्येलोक्ताब्दसंख्यया । निर्णीतः पुर
निर्म्माणात्खृष्टकाल इति श्रुतं ॥५॥ यद्यल्पे खृष्टमाहुर्मां किंवा मद्वंशसंभवं । पाषण्डा

स्ते समाख्याताः शेषैः शास्त्रोपदेष्टृभिः ॥६॥ सर्वैर्मे ज्ञायते जातिर्भिन्नवंशसमुत्थिता । अनु
जन्माख्यधर्म्मेणैत्तयेत्यस्यापि शास्त्रतः ॥७॥ मद्वंशादिरिदूमो ऽस्ति न याकोबो ऽब्रवीत्तु सः ।
यहूदस्य कुले भव्यं स्वसूनोर्दण्डमैश्वरं ॥८॥ ततो ऽमुमधुना जातं ज्योतिर्ज्ञैश्चापि मार्गितं ।
विघ्नं न कुर्वति मयि प्रवक्ष्यन्त्यखिला नृपं ॥९॥ खृष्टे स्वश्रद्धया ते न बलाद्रक्ष्यन्ति
केसरः । सिंहासनात्क्षिपेयुश्च मां रोम्यहितमप्यतः ॥१०॥ तस्मान्मद्देशराजं यं बालकं प्र
परदेशिनः । आहुः स खलु हन्तव्यो मद्विरोधिध्वजात्मकः ॥११॥ मज्जन्तव्यशिशुप्राप्त्यै
प्रेरिताः पण्डिताः कुतः । विलम्बन्ते ऽथवा किं तं नापुर्वेत्ल्लहमे ऽधुना ॥१२॥ गुरूरुवाच ॥
एवं सो ऽचिन्तयद्भूतो नत्वन्विष्टशिशुं स तं । अवेत्स्वनगरानीतं मन्दिरे ऽपि प्रतिष्ठितं ॥
१३॥ शिष्य उवाच ॥ एनं संस्कारमाचार्य्य चत्वारिंशे ऽहि जन्मतः । कथं यिरूषलेमे

स प्राप्नोत्यशौचमिष्यते ॥१४॥ गुरुरुवाच ॥ पण्डितानां गतेः पश्चाद्दिनेषु शिशुसेविनां ।
कतिष्वशौचशेषो ऽभूद्धन्यमातुर्यथाविधि ॥१५॥ ततः पत्यन्विता बालं चत्वारिंशद्दिनात्परं ।
निन्ये वेष्महमादीशवेद्यये सा महापुरे ॥१६॥ तथा हि ज्येष्ठपुत्राणां मातृस्तत्समये ध्रुवं ।
निवृत्ताशौचका मोसिरैशशास्त्रद आदिशत् ॥१७॥ श्रीपरमेश्वर उवाच ॥ पुंसो जरायु
परिमोचिन ऐस्रयेल्यान् शुद्धीकरोमि नरजान् पशुजांश्च सम्यक् । यस्मात्किलोद्धरमुमलया ५१
हहं तान् युष्मत्कृते प्रथमजान् विनिहत्य मैश्रान् ॥१८॥ गुरुरुवाच ॥ इदमीशवचो
मत्वा मोस्युक्तं बलिदित्सुका । पत्या सह मरीया तं शीयोने ऽभ्यानयन्नगे ॥१९॥ द्वितीयं
मन्दिरं यत्र जरुबाबिलनिर्म्मितं । रचितं तु परे नूत्नमिव हेरोदिना श्रमात् ॥२०॥ तस्मिं
स्तीर्त्वोरु वाह्यं तौ परदेश्याजिराभिधं । अङ्गनं किल विष्टा च ततो भास्वति गोपुरे ॥

२१॥ नीर्त्वा दाननिधिस्थानं चापि नार्य्यजिराभिधं । द्वारे ऽप्यारुह्य नारीभिरवेश्ये बन्धु
भिस्तुभिः ॥२२॥ ऐत्रयेल्ये ऽजिरे ऽस्थातां यस्यान्तरपि संस्थितः । यज्वेतरैरनाश्रेयः पुण्य
एवालयो विभोः ॥२३॥ तदाजिरे ऽविशत्तस्मिन्नीत एव सदात्मना । वृद्धो येरूषलेमीयः
सिम्योनो नाम धार्म्मिकः ॥२४॥ चिरादपेक्षमाणायास्मै सान्त्वं ह्यैत्रयेलकं । न मर्त्तव्यं
त्वयादृष्टखृष्टेनेतीश्वरोदितं ॥२५॥ पूर्वं प्रतिश्रुतस्यैतस्येदानीं वीक्ष्य पूरणं । स्वाङ्के ५५
कृत्वा स सद्बालं विभुं तुष्टाव तुष्टहृत् ॥२६॥ सिम्योन उवाच ॥ त्वदर्त्थिने ऽद्येश्वर
सन्धिसंयुतं त्वदुक्तितो निःसरणं ददासि मे । स्वलोचनाभ्यां ह्यधुनेक्ष एव ते विमुक्तिबीजं
यद्दात्र संस्थितं ॥२७॥ यदन्यलोकेषु तमोनुदुज्ज्वलं त्वदिस्त्रयेलस्य तु कीर्त्तनं वरं । समी
पवाखिलभूमिवासिनां समर्पयामासिथ सांप्रतं भुवि ॥२८॥ गुरूवाच ॥ इति सीमेय

बालस्य पितरौ चैव विस्मितौ । आशाष्य तत आश्चर्य्यं मरीयामब्रवीद्वचः ॥२९॥ सिम्योन्
उवाच ॥ बहूनामिस्रयेलेषु पातायोत्थापनाय च । बहूनां चापि गुप्तानामाविष्कृत्यै हि
चेतसां ॥३०॥ निन्दनान्वितलक्ष्मैव स्थितोऽयं बालकस्तव । यस्मात्त्वद्धृदयं चापि दुःखं
व्यत्स्यति शूलवत् ॥३१॥ गुरूवाच ॥ इति भव्यवचः सत्यं वृद्धेनोक्तं यदाद्भुतं । तदा सदात्म
संव्याप्ता काचिद्वृद्धाप्युपस्थिता ॥३२॥ हन्ना यासेरवंशीया सप्ताब्दान् सधवा पुरा । स्थित्वा ५६
चतुरशीत्यब्दानजीवद्विधवा सती ॥३३॥ प्रार्थनाभिः सदा युक्तोपवासैश्चैव मन्दिरे ।
अहोरात्रेऽपि भक्ता सा परमात्मानमार्च्चयत् ॥३४॥ सापि तुष्टाव तद्दृष्ट्वाज्ञापयच्चार्च्चिनः
परान् । ये ये यिरूषलेमस्थाः प्रत्यैच्छन्मुक्तिमीश्वरात् ॥३५॥ येष्वस्तु पितरौ सर्वं शास्त्रोक्तं
सुसमाप्य तौ । मन्दिरादजिरै रम्यैः संवृतान्निर्गतौ पुनः ॥३६॥ तथारब्धं तु विश्वत्र यद्यद्वं

बुद्ध आगते । द्वितीयमन्दिरोज्ज्वालं प्रोदितं भव्यवक्तृभिः ॥३७॥ तद्विनिर्म्मितिकाले
ऽपि प्राङ्नृपानुग्रहे गते । भर्त्सयत्स्वरिषूग्रेषु व्यूहे प्राप्ते ऽप्यतो भयं ॥३८॥ कनीयः शुभ
मप्येतत् प्रदग्धात्पूर्वमन्दिरात् । इति शोचत्सु वृद्धेषु प्रवाचेतद्वचो ऽब्रवीत् ॥३९॥ हग्गाय
उवाच ॥ युष्मासु वृद्ध इह को ऽस्त्यवशिष्ट एतत् पूर्वौजसावृतमवेक्षितवान् सदोकः । तत्सां
प्रतं तु कथमीक्ष्यत आ न किं वः साक्षाद्विनष्टमिव खल्विति पृच्छतीशः ॥४०॥ त्वं हे पते 57
तु जरूबाबिल हे महिष्ठयज्वंश्च योशदकपुत्र नु येष्वभिख्य । स्तं कर्म्मणि स्थिरमती उभकौ
तथापि देशस्थसर्वसहितौ नवमन्दिराये ॥४१॥ युष्माभिरेव सह संस्थित ईश्वरो ऽहं
मिश्रप्रयानकृतसंविदनुक्रमेण । आत्मा मदीय इह सन्ततमेव वो ऽन्तस्तिष्ठत्यतः कुचिदहो
न बिभीत यूयं ॥४२॥ काले गते ऽल्प इत एव दिवं भुवं च साब्धिस्थलां विभुरहं परि

धूनयिष्ये । सर्वान्वयानपि तथा विचलीकरिष्ये ऽथागाम्यशेषकुलवांछित ओजसात्र ॥
४३ ॥ एवं प्रदोप्तिभिरिदं द्युबलेश ओको व्याप्स्यामि तद्रजतहेमचयाधिपो ऽहं । पूर्वात्
सलोमरचिताद्दृहमुत्तरं च कर्तास्मि दोप्ततरमत्र हि सन्धिदायी ॥४४॥ गुरुरुवाच ॥ इति
पंचशताब्दात्प्रागगीतं यज्ञन्यवाचिना । आगते सन्धिनाथे तद् बाले ऽप्यारब्धपूर्त्यभूत् ॥४५॥
यं सिम्योनो जगौ तत्रैत्त्रयेलवरकीर्तनं । नत्वेतन्मात्रदीपं किंत्वखिलोर्वीतमोनुदं ॥४६॥ ५८
शिष्य उवाच ॥ हग्गायेन तथा गीतं यत् सर्वान्वयवांछितं ॥ सङ्गृज्ञेन तथा चापि तदुपस्थिति
वादिना ॥४७॥ कथं संपूरणीयं तदस्मिन् शीयोनमन्दिरे । इस्त्रयेलीयमात्रार्थं निर्म्मिते
तत्कुलोद्भवैः ॥४८॥ तस्मिन् किं भिन्नवंशीयाः केचिदप्यार्च्चयन् विभुं । प्रार्थयन् वा समु
त्पद्यां विमुक्तिं दाविदः कुले ॥४९॥ गुरुरुवाच ॥ प्रथमं शिष्य तत् स्मार्य्यमब्रहायोदित

कथः । त्वद्वंशीयाङ्गनाः सर्वे शुभं प्राप्स्यन्ति खल्विति ॥५०॥ ततो ऽन्यजेरपोष्टो यैः
संभागी ऽस्या हि संविदः । धर्म्ममाचरतो मौस्यं नावामन्यत तान् विभुः ॥५१॥ रखाबा
यादृशी ख्याता यिरीखूवासिनीश्वरं । सुविश्वस्यैस्त्रयेलानां स्वपुरप्रतियुध्यतां ॥५२॥
तस्मिन् सम्प्रस्यते येष्वा नूनजेनेशवाक्यतः । ससर्व्वबन्धुका मुक्तिं भागं चापैस्त्रयेलिषु ॥
५३॥ रूथा वा यादृशी भद्रा पुरा ख्याता मवाबिनी । देशं सदैवतं त्यक्ता पुरे बेथ्लहमे ५९
स्थिता ॥५४॥ बोजेन धनिना तत्र यहूदीयकुलोद्भवा । व्यूढा तो ऽभून्महाराजदाविदः प्र
पितामही ॥५५॥ अन्यजाः पुरुषाश्चैव बाबिल्याद्बन्धनात्परे । परिच्छेदादिधर्म्माणि लेभिरे
ऽनेकशो मुदा ॥५६॥ प्रथमं जलसंस्कारेणानुजन्मावलम्ब्य ते । तत्परे धर्म्मयात्रेणाम्रहवा
इव संमताः ॥५७॥ शिष्य उवाच ॥ संन्यस्तास्वकुलानेतान् पुनर्जन्मावलम्बिनः । इतपुत्रान्

विनान्ये किं नैच्छन् सन्धिमिमं जनाः ॥५८॥ गुरुरुवाच ॥ विना पूर्वोदितान् शिष्य तान्
धर्म्मावलम्बिनः । अभवन्नीशविश्वासा अन्येऽपि परदेशिनः ॥५९॥ परिच्छेदादिहीनास्ते
न चाब्रह्मगणाश्रिताः । ईशभक्तास्तथाप्यासन् द्वारगाख्या यहूदिषु ॥६०॥ यतो बहिः
स्थिते द्वारे मन्दिरस्यागता अमी । परदेश्याजिरे प्रोक्ते परमात्मानमार्चयन् ॥६१॥ प्रेर
यन् स्वांस्तु यज्वभ्यो बलीन् भास्वति गोपुरे । न तु शक्तास्तदन्तस्ते सेवितुं मोसिशास्त्रतः ॥ ६०
६२॥ तद्वत्पुरापि कीनीया रिकाबीयाश्च कीर्त्तिताः । उत्पन्नाः श्वशुरान्मोसेरारव्याद् यित्र
संज्ञकात् ॥६३॥ ऐस्त्रयेल्यहिताः सत्याद्वितीयेश्वरसेविनः । न त्ववर्जन् स्वरीतीस्ते न च
दधन् मोसिकाः ॥६४॥ किंतु तद्दिष्टधर्म्मेभ्यो महाज्ञाः केवलं दश । सम्यक् पालयितुं द्वार
श्रिता भक्ता नियोजिताः ॥६५॥ शिष्य उवाच ॥ महत्यस्ता दशाज्ञाः का याः सम्यङ् मन्

मन्यजाः । भक्ता आब्रह्मसंस्काररहीना अपि नियोजिताः ॥६६॥ गुरुरुवाच ॥ सीनाद्र पर्वते ऽगम्ये विद्युद्धूमाशनीवृते । मासये ता यथेशोक्तास्तथाज्ञाः शृणु सांप्रतं ॥६७॥ श्रीपरमेश्वर उवाच ॥ विभुस्त्वदीशो ऽस्म्यहमेव मिश्रात्त्वां नीतवान् बन्धनवेश्मतो ऽत्र । अतो मदाज्ञा प्रथमेयमीशं कंचिन्न विद्याः खलु मां विनेति ॥६८॥ मूर्तिं तु कस्यापि दिवि क्षितौ वा पृथिव्यधःस्थाम्भसि वा सतस्त्वं । स्वार्थे न कुर्याः प्रतिमात्मकां तत्प्रणामकृत्ये नच सेव ६१
नाय ॥६९॥ विभुस्त्वदीशो ऽस्म्यपरासहिष्णुः प्रचण्डचित्तेश्वर एव यस्मात् । मां द्रुह्यतां चाप्यघदण्डदायी तत्पौत्रपौत्रावधिवंशजेभ्यः ॥७०॥ मां स्निह्यतां त्वेव नृणां मदाज्ञामनुपालिनां चापि सतां कृते ऽहं । दयालुतां भूरिसहस्रवृन्दे प्रदर्शयंस्तत्प्रियकृत् सदेति ॥७१॥ विभोस्त्वदीशस्य मृषैव वक्त्रे सन्नाम भीमं न नयेः कदाचित् । यतो विभोर्नाम मृषा नयेद्यस्तं

पापहीनं नहि वेत्स्यतीति ॥७२॥ सप्ताहशेषं किल विश्रमाख्यं स्मरैव पुण्यीकरणीय वारं ।
सर्वं हि षट्पूर्वदिनेषु कर्म्म श्रमात् समाचर्य्य निजं प्रवृत्त्या ॥७३॥ विश्राममीशस्य विभो
स्तदार्य्यं रक्षेरकर्म्मा तव चात्मजो ऽपि । पुत्री च दासी भृतकः पशुश्च द्वाराश्रितस्ते ऽप्यतिथि
र्विदेशी ॥७४॥ विभुर्दिवं हि क्षितिमर्णवं तत्स्थितं च सर्वं षडहे ससर्ज । अतः स्वविश्राम
दिने न्यधात्स वराशिषं पुण्यमयीं किलेति ॥७५॥ त्वमेव मातापितरौ स्वकीयौ समाद्रियेथाः ६२
सततं नतात्मा । अतस्त्वदीयेश्वरदत्तभूमौ भवेद्वयो ऽतीवचिरं तवेति ॥७६॥ नरं न हन्याः
खलु कंचनेति न वा प्रकुर्य्या व्यभिचारमित्थं । त्वं नापि चोरेरिति नापि मिथ्यासाक्ष्यं
नयेः स्वप्रतिवासिनीति ॥७७॥ निकेतनं स्वप्रतिवासिनो न त्वं नापि दारान् खलु तस्य
गृध्येः । न तस्य दासीं भृतकं च गावं खरं च किंचिद्वसु तस्य चेति ॥७८॥ गुरूवाच ॥ इति

प्रोक्ता दयाज्ञास्ते भक्ता द्वाराश्रिता दृढं । त्यक्ततद्विपरीतात्मसर्वाचारा अपालयन् ॥७९॥
एषु त्वल्पेषु मा विज्ञोत्त्रयेलाचारवेदिषु । संपूर्णाः परदेशीयविषयोक्तोः प्रवाचिनां ॥८०॥
परं ह्यागामिनं कालमिषायाद्याखिला अमी । चिरादूवुर्यदा न स्यात् किलैतद्द्वारबन्धनं ॥८१॥
स तस्मिन्सर्वलोकेष्टे प्रोढ आविष्कृतो भवेत् । नाव्यक्तस्त्वधुना सम्यग्बालके ऽपि यथोदितं ॥
८२॥ ततश्चापि तमेवास्मत्सहस्थेश्वरसंज्ञकं । इस्त्रयेलजमात्रा न प्रणेमुस्तुष्टमानसाः ॥८३॥ ६३
अन्यजास्त्वपि तं बालं यहूदक्षितिसंभवं । आगताः सेवितुं हर्षाद्बुधा मत्प्रोदितं यथा ॥
८४॥ इति श्रीखृष्टसंगीतायां येषूत्पत्तिपर्वणि (मोसिरचितपंचशास्त्रस्य निःसृतिलैव्यसंख्या
स्कन्धेभ्यो येषूनूनजचरित्राद् रूथाचरित्राद् दाविज्ञोतेभ्यो हग्गायभव्यवाक्यानां द्वितीय
सर्गाम्मस्यायलूकयोर्द्वितीयसर्गाच्चोद्धृता) ऽस्मत्सहेश्वरप्रतिष्ठा नाम नवमो ऽध्यायः ॥

शिष्य उवाच ॥ ज्ञायते ते गुरो वाक्यैर्यहूद्योत्तरमन्दिरे । दर्शितव्यो महान् भूमौ
प्रकाशो मुक्तिदायकः ॥१॥ नैतन्मतावलम्ब्यल्पनृमात्रार्थं पुरैव सः । किंतु सर्वान्वयोत्पद्य
सद्यो धरणिमण्डले ॥२॥ नृणां त्वेतत्सुकालात्प्रागैत्त्रयेल्याविदां दशा । कासीत् तद्विषये
शङ्का गुरो मे हृदि संस्थिता ॥३॥ गुरुरुवाच ॥ अतो विश्वनरेभ्यो यत् पुरैतन्मुक्तिगोचरं ।
आदिष्टं शृणु तच्छिष्य मद्वाचं पुण्यशास्त्रतः ॥४॥ नराभ्यामादिसृष्टाभ्यां महानागकुमन्त्रणात् । ६४
पापान्धौ पतिताभ्यां वाग्दययैषा विभूदिता ॥५॥ सपत्या अधुना नार्य्या दण्डिताया मया
सुतः । हन्यान्नागशिरः पूर्वं तेनाप्याहतपार्ष्णिकः ॥६॥ नरैस्ताभ्यां समुद्भूतैरग्यैरेषा
तु वाक् श्रुता । पुण्यैरल्पैरपीष्टा च जगत्यङ्घःपरिप्लुते ॥७॥ महामायोर्म्मिभिर्यापि देव
बाहुल्यहेतुभिः । घूर्णितेषु मनुष्येषु न सम्यग्विस्मृताभवत् ॥८॥ तस्याः संपूरकं विद्धि

बाचः शब्दं किलेश्वरं । अवतीर्णं तथा चैव नारीमात्रसुतीकृतं ॥९॥ 'स ह्याहतशरीरोऽपि
महामायाधिकारिणा । नागेनान्ते जगद्व्यापिशक्तिं तस्य हनिष्यति ॥१०॥ शिष्य उवाच ॥
वाक्यं त्वेतद् गुरो भूमौ सत्येशप्रत्ययान्वितं । कथं परंपराप्राप्तमाद्यसृष्टनरावधि ॥११॥
गुरुरुवाच ॥ आदमः प्रथमो नृणां हवा चाप्यस्य पंजरात् । सृष्टा पापात्परेऽव्यक्तं सान्त्वं
तत्प्रापतुर्विभोः ॥१२॥ तयोः पुत्रप्रभृतिषु धार्म्मिका हाबिलादयः । तद्रक्षन्नवज्ञातमपि ६५
कैनादिभिः शठैः ॥१३॥ वर्धमाने त्वधर्म्मेऽतोऽसुरवद्दुष्क्रियैर्भुवि । व्यापन्नायां तदृतं धर्म्मो
नृन् हनोक उपादिशत् ॥१४॥ शेषे तूर्वीस्थितापौघेऽतिक्रान्ते सहनं विभोः । आगतं
सलिलं घोरं मग्नभूशैलवेश्मकं ॥१५॥ केवलः प्रलयान्नोहः ससप्तपरिबारकः । विभोर्निर्मि
तयाज्ञातो नावा धर्म्म्यः प्ररक्षितः ॥१६॥ यो मनुर्ब्राह्मणैः प्रोक्तो नूत्नसृष्टोर्व्यधीश्वरः ।

भुवने ऽद्यः पुनर्जाते त्रिकुलानां पिता नृणां ॥१७॥ यापिताज्ज्येष्ठपुत्राद्धि तुरुष्का यवनाः
शकाः । अन्ये ऽपि च कनिष्ठात्तु खामान्मैश्रकनानकाः ॥१८॥ मध्यमात्तु प्रियात्पुत्रात्सेमनाम्नः
समुत्थिताः । कल्दायारबसूराद्या मिश्रात्प्राग्दिश्यवस्थिताः ॥१९॥ एतद्गोत्रोद्भवो ऽप्यासी
न्नागमूर्द्धविमर्द्दिनः । आदिवंशो ऽब्रहो भावी श्रेष्ठो विश्वासिनां पिता ॥२०॥ द्युसेनार्च्चानि
मग्नेषु त्ववशिष्टेषु तत्कुले । सत्येशं मेनिरे के ऽपि दत्तमोक्षप्रतिश्रवं ॥२१॥ अब्रहभ्रातृजो ६६
यद्वल्लोटो भ्रष्टपुरे स्थितः । घमूरसुदुमादीनां रक्षितः पापदण्डतः ॥२२॥ यद्वद्राजा कनाने
ऽपि परमेश्वरयाजकः । एकाकी धर्म्मराजार्थमल्कीशदकनामकः ॥२३॥ यिरूषलेमदेशे
यो ऽब्रहायाप्यरिसंजिते । ददावाशिषमुत्कृष्टां यथा श्रेयान् कनीयसे ॥२४॥ यद्वदीशार्च्च
को ऽप्युक्तो यित्रुर्मद्यानयाजकः । दत्तवान्स्वां सुतां मिश्रनिःपलायितमोसये ॥२५॥ यद्देशे

स विभोः प्रापाज्ञां ज्वलत्स्तम्भमध्यतः । पुनर्यातुं स्ववर्गं चोद्धर्तुं मिश्रकबन्धनात् ॥२६॥
तादृशश्चापि तद्देशे ऽरव्ये ऽयोबो धनी शुभः । धार्म्मिको ऽकैंन्दुताराच्चीं नाचरत्स्वगणा इव ॥
२७॥ यो महानागशक्यैर्वीग्याभिरापद्भिरावृतः । हतश्रीपरिवारो ऽपि देहदुःखैश्च पीडितः ॥
२८॥ अतिक्लिष्टो ऽपि नेशं स व्यस्मरत् किंतु मुक्तिदं । द्रक्ष्ये मृत्योः परे भूस्थेशं स्वाक्षे
णेत्युवाच ह ॥२९॥ विना तत्सन्निभानल्पांस्त्विष्मयेलोद्भवे ऽन्वये । गते कुपथमेसावो ६७
द्भवे चैदूम्यके तथा ॥३०॥ लोटादुद्भूतयोश्चापि मवाबाम्मोनसंज्ञयोः । कुलयोर्न्यांप्तयोरेव
क्रूरदैवतसेवया ॥३१॥ तदाब्रहविभिन्ने ऽपि शेषे सेममहान्वये । ज्ञायते सत्प्रबन्धेभ्यः
स्थितिः सत्येश्वरार्च्चिनां ॥३२॥ स्थित ईशप्रवक्तापि सूरदेशे प्रकीर्त्तितः । बल्यामो विभु
वाक्श्रोता वञ्चितस्त्वृक्थलिप्सया ॥३३॥ स्वदेशात् स समाहूतो दुर्नृपेण मवाबिनां । ऐस्र

येल्यान् भयात्सर्व्वान् शपितुं प्रान्तरे स्थितान् ॥३४॥ शपितुं यतितोऽप्येतान् विधर्म्मभृति
लिप्सुकः । नाशक्नोद्विभुवाग्रुद्धः साक्षात्त्वाशासत द्विषां ॥३५॥ नक्षत्रं चैव तद्वर्गात्सर्व्वजिद्दण्ड
लक्षणं । उदेयं दर्शनीयं चेत्यूचे व्याप्तः सदात्मना ॥३६॥ यदुदेयं परे तस्माद्बहुवर्ष
शतान्तरे । दाविदस्तनयः खृष्टो यदा प्रादुर्भवेद्भुवि ॥३७॥ तत्ख्यातोक्तिप्रवक्तारं
बल्यामं मन्दमप्यमुं । विनान्येऽप्यभवन्नीशवाक्यज्ञा इत्यसंशयं ॥३८॥ शिष्य उवाच ॥ ६८
ये त्वयोक्ता गुरो सर्व्वे ते सेमस्य कुलोत्थिताः । मनुप्रियसुतस्येशविशिष्टालयवासिनः ॥३९॥
मनुजानां द्वयोस्त्वेवमवशिष्टांशयोर्दशा । कासीद्यापतखामाख्योद्भवयोः क्षितिपूरिणोः ॥
४०॥ गुरुरुवाच ॥ हवोत्पन्नाखिलेभ्यस्तं नागहन्तृप्रतिश्रवं । एतैर्मा केवलं विद्धि मोस्युक्तं
रवलम्बितं ॥४१॥ सत्प्रकाशो हि योऽशेषनृभ्यो दत्तः परात्मना । स न निर्व्वापितः कैश्चित्स

र्वत्रापि तु रक्षितः ॥४२॥ अयोब इव शास्त्रस्यैत्रयेल्यस्याविदो ऽपि ये । न व्यमन्यन्त
तज्ज्ञानं स्वहृदभ्यन्तरे स्थितं ॥४३॥ न सर्व्वभूतकर्त्तारं विश्वव्यापिनमीश्वरं । नृनिर्म्मितासु
ते ऽर्च्चासु सममन्यन्त संस्थितं ॥४४॥ न वा कार्य्ये प्रपंचे ते ऽनन्तं कारणमादधुः । नापि
कर्तॄन् बहूनार्च्चन् मायालहरिकल्पितान् ॥४५॥ भूरयो ऽपि यदा धीरा ऐगुप्तयवनादिषु ।
ऐशावतारबाहुल्यं मूर्त्यर्च्चां चाप्युपादिशन् ॥४६॥ ब्राह्मणा भारतोर्व्व्यां च विश्वसृष्टिस्थिति ६९
क्षयान् । अवदंस्त्रिगुणोत्पन्नानीशसत्वावखण्डिनः ॥४७॥ ईशोत्पन्ननृजातेश्चैकस्या एव
विभिन्नतां । चतुर्धा सृष्टितो ऽप्यूचुः स्वीयजात्यभिमानिनः ॥४८॥ यदा चैतन्मतामित्राः सौ
गता मगधोत्थिताः । स्वस्वसंकल्पनात्प्राप्यमूचुर्विश्वपराक्रमं ॥४९॥ अर्हतान् गौतमादींश्च
नॄन् निर्व्वाणं तथागतान् । केवलानूचुरर्च्चांस्ते परमेशावमानिनः ॥५०॥ यदा चैतद्विरोद्धारो

ब्रह्मविष्णुशिवार्च्चिनः । असुरादिवधार्थाष्टावतारख्यायिनः पुरा ॥५१॥ बुद्धावतार मप्यूचुर्विष्णोर्नवममेव तं । नास्तिकत्वोपदेशाय नृधर्म्मोल्लंघनाय च ॥५२॥ एवमार्य्यस्य पातुस्ते ऽघनाशागन्तुरेव च । मिथ्यावक्तृत्वमप्यूचुर्यदा भ्रान्तात्मका विभोः ॥५३॥ तदापि ख्यातदेशे ऽस्मिन् केचिदल्पे ऽपि धार्म्मिकाः । इयन्मायाब्धमग्नाः स्युरिति तर्को ऽस्ति शिष्य मे ॥५४॥ ईशशब्दस्य ये पातुः सततं सत्यवादिनः । ग्यैशरूपद्वितीयस्य नृवंच यितृनाशिनः ॥५५॥ अवतारं जगत्येकं प्रत्यैक्षन्नोपदिष्टये । नराणां मुक्तिमार्गस्य दयया परमात्मनः ॥५६॥ मेनिरे च परे भव्यं तदनुग्रहहेलिनां । नृणां पापकृतां दण्डं विश्वपातृसमाहितं ॥५७॥ निहिताशाश्च तत्रैव न वा ब्राह्मणदर्शनैः । भ्रामिता विपरीतार्थैर्मीमांसान्यायसांख्यकैः ॥५८॥ न वा शक्त्यर्च्चिनां तत्रापूततन्त्रैर्मलीकृताः । न चार्वा

शिष्य उवाच ॥ एतत्त्वद्वाक्यमस्मद्भूनिवासि
कादिशास्त्रैर्वा नास्तिक्यावटपातिताः ॥५९॥ तद्वद्विश्वासयुक्तानां नृणां
विषयं गुरो । सत्यं स्थापयतु ज्ञानदययोर्योनिरीश्वरः ॥६०॥ यद्वद
भावस्य तु त्वया । किं वितर्कप्रमाणं मे दत्तं मिथ्यामतान्तरे ॥६१॥ गुरुरुवाच ॥ यद्वद
भ्यन्तरे शिष्य सत्प्रभास्ति स एव तां । वहिःस्यामप्युपैत्युर्व्यामवतीर्णां महाप्रभां ॥६२॥
वरं तद्वत्प्रभायुक्ता देशेष्वन्येषु संस्थिताः । ज्ञाता भ्रमतमोव्याप्तेष्वपि भारतभूमिवत् ॥६३॥ ७१
पारसीके तदभ्यर्णे मजाख्या विप्रसन्निभाः । यदा त्वं ह्यादिशन् धर्म्मं जरातष्टुः किला
नुगाः ॥६४॥ मूर्त्तिहीनाग्निमित्रादिसेवां प्रत्ययमेव च । धर्म्माधर्म्मेशयोस्तुल्यज्ञानशक्त्योर
पूर्वयोः ॥६५॥ तदापीयतमोमध्ये बुधा आसन्मजेष्वपि । धर्म्मवीजैकलानादीश्वरविश्वास
रक्षिणः ॥६६॥ विभुनाप्युपदिष्टा ये भीष्टं विश्वासिभिश्चिरात् । बल्यामप्रोक्तनक्षत्रोद

मेक्षन्त दूरतः ॥६७॥ यं सर्व्वनरमुक्त्यर्थं समस्थापयदन्तरे । शकयोर्विक्रमादित्यशालिवाहन
योर्विभुः ॥६८॥ पण्डितानां मृतिस्तेषां राजोत्पत्तिस्थलं प्रति । यथा मत्कथिता शिष्य तत्स
द्विश्वासलक्षणा ॥६९॥ शिष्य उवाच ॥ सर्व्वदिग्भ्यः समेतानां दाविदुत्थध्वजं प्रति ।
आद्यास्ते पण्डिता आयन् पारसीकादिति श्रुतं ॥७०॥ अभ्युक्तं पूर्व्वसृष्टौ यत् किं नान्येऽमून्
विना तु तत् । नागघातवचः पूर्य्यं तदानुममिरे कुचित् ॥७१॥ गुरुरुवाच ॥ पारसीकार ७२
बाद्येषु नूत्नराज्यप्रतीक्षणं । प्राचीसंस्थेषु यन्नूनं स्मृतं नानाप्रबन्धकैः ॥७२॥ एतत्पण्डित
दृष्टान्तनिर्णीतं किल शिष्य यत् । तत्तुल्यं विद्धि दूरायां प्रत्यग्दिश्यपि संस्थितं ॥७३॥ यतो
ऽस्मिन्नेव समये नूत्नसत्ययुगाधिपं । उद्भव्यं मेनिरे विज्ञा अज्ञाते तत्स्थलेऽपि तैः ॥७४॥ ईत
ल्योर्व्यां हि कूमाख्यपुरे गह्वरवासिनी । तं पुरोक्तवती भव्यमौगुस्तसमयेऽधिपं ॥७५॥ अथ

तद्राज्यसद्धर्म्मं सर्व्वदिग्व्यापिसन्धिकं । इषायनिभवाक्यैः सा शिबुल्लोवाच मन्त्रदा ॥७६॥ इदं
रोम्यादिभिः ख्यातमीतल्यक्षितिवासिभिः। आर्य्यभव्यवचो ज्ञातैस्त्रयेल्यैश्वरशात्रकैः ॥७७॥
तत्पूर्तिनिकटे काले लिखितं विस्तरात्तथा । वीर्गिल्येनैव कविना मित्रेणौगुस्तकेशरः ॥७८॥
गीतं कूमाशिबुल्लाया न तु वक्ष्यामि विस्तरात् । न ह्येतत्तुल्यमखिलं प्रोक्तमप्यैशवादिनां ॥७९॥
अलं तेन त्विषायस्य वचसा पण्डितागतौ । पूर्त्तिचिह्नमवाप्तेन पश्चात्पूर्व्येण सर्व्वशः ॥८०॥ इति ७३
श्रीखृष्टसंगीतायां येषूत्पत्तिपर्व्वणि (मोसिरचितपंचशास्त्रस्य योनिनिःसृतिसंख्यास्कन्धेभ्यो ऽयोब
ग्रन्थाद् भारतपारसीकयावनरौम्यनानाग्रन्थेभ्यश्चोद्धृतो) नरमुक्तिप्रतिश्रवो नाम दशमो ऽध्यायः॥
शिष्य उवाच ॥ यावच्छक्ति त्वयाचार्य्यापनीते संशये मम । विश्वास्यचिंतबालस्याधुना
शेषकथां वद ॥१॥ गुरुरुवाच ॥ सर्व्वं तद्विषये शास्त्रादिष्टं कृत्वा महापुरे । सपत्नीको

ऽथ योसेफो गलीलां गन्तुमैहत ॥२॥ किंतु प्रस्थानतः पूर्वं स्वपुरं प्रति धार्म्मिकः । सुप्त
ईश्वरदूतेनाभाषीदं सोऽद्भुतं वचः ॥३॥ दूत उवाच ॥ क्षिप्रमुत्तिष्ठ योसेफ हेरोदिर्दुर्नृपो
यतः । निहन्तुं शिशुमार्य्यं ते मृगयत्यतियत्नतः ॥४॥ तस्मात्समातृकं नीत्वा तं द्रुवैगुप्त
नीवृति । तत्र स्थेयं त्वया यावन्नादेक्ष्ये पुनरागतिं ॥५॥ गुरुरुवाच ॥ इत्यादिष्टः स उत्थाय
मरीयां शिशुमेव च । नीत्वा निशि महायत्नात्प्राचलन्मैश्रके पथि ॥६॥ हेरोदिर्हि जिघांसु ७४
स्तान् प्रतीक्ष्य चिरतो बुधान् । यथा मत्कथितं व्यग्रो बभूव क्रमशः परे ॥७॥ तेषु बेथ्लहमात्तत्रा
नागतेष्वशृणोदपि । मन्दिरान्तरबालात्तोविषयं किंचिदस्फुटं ॥८॥ यतः सिम्योनहन्ना
ख्यात्तत्कुकं क्रूरतान्वितं । सुज्ञायार्य्यशिशोः सेवां यत्नतोऽगोपयन्नृपात् ॥९॥ अतोऽनेक
दिनेष्वेव तद्वार्त्ता कर्म्मतः परे । हेरोदिश्रुतिमागच्छत्तदा चाप्यस्फुटा स्थिता ॥१०॥ कैश्चिन्नु

ज्ञापितः ख्रीष्टजन्म तान् पण्डितान् विना । अतः सोऽप्रतियातेषु तेषु व्यग्रोऽत्यचिन्तयत् ॥
॥११॥ तैः परिव्राजकैर्धूर्तैर्वञ्चितो हन्त किं न्वहं । करिष्ये ते शिशुस्थानं नोपदिश्य हि
निर्गताः ॥१२॥ तदायुर्मात्रमादिश्य जन्मनक्षत्रनिश्चितं । मह्यं प्रागधुना हन्त मत्क्रोधात्ते
पलायिताः ॥१३॥ तान् ग्रहीतुं न शक्नोमि मया यस्तु विशेषतः । हन्तव्यो मम भूमध्ये
सोऽज्ञातोऽपि मरिष्यति ॥१४॥ इति संकल्प्य घोरां स आज्ञां प्रोवाच निर्दयः । द्विवर्षोन ७५
शिशून् सर्वान् हन्तुं बेथ्लहमान्तिके ॥१५॥ राखिलायाः शवस्थाने तस्मिन्सर्वक्षितावपि ।
दावित्पुरान्तिकायां तत्कर्म्म भीममथाभवत् ॥१६॥ प्रार्थिनीनां प्रसूतीनां घातुकांस्ते
ऽदयान् मृषा । अङ्केभ्योऽप्यनघाः पेतू रक्तार्द्रैरसिभिर्हताः ॥१७॥ तथा बहुषु बालेषु यहू
दीयेषु केषुचित् । बिन्यमीनाङ्गवेष्वेव स्वराजार्थं हतेष्वतः ॥१८॥ संपूर्णं बिन्यमीनोक्तौ

वासिनो यज्वनो वचः । तत्क्षितिस्थान् वधस्वेव मबुकाद्रिशरादिषु ॥१९॥ यिरिमीय
उवाच॥ गिरिचित्रभुवि श्रुतो रवः कटुरोदैः परिदेवनैर्युतः । रुदतीव सुतेषु राखिला हत
सान्त्वा तदभावहेतुतः ॥२०॥ इदमाह तु ते महेश्वरो न विलापस्त्वयि नाश्रु वा वसेत् । तव
कर्म्म फलं किलाप्नुयात् प्रतिनीतेषु सुतेष्वरिक्षितेः ॥२१॥ यत एव तवाग्रजप्रियात्मकयोसेफ
कुलोद्भवाः प्रजाः । अरिणापि पुरा वहिष्कृताः पुनरेष्यन्ति शुभां स्वनीवृतं ॥२२॥ तव पौत्र ७६
इह श्रुतो मया विभवे ऽफ्रैम इदं ब्रुवन् वचः । प्रथमं तव दण्डमाप्नवं गलयुग्मासहगौरिवो
त्क्रमः ॥२३॥ अधुना तु सुशिक्षितस्त्रपां बहुधाप्नोमि पुराकृताघतः । प्रतिवर्त्तनतस्त्वा
प्यहं प्रतिक्रान्तो भवितास्मि मत्पते ॥२४॥ अत आह विभुर्निजं सुतं प्रियमफ्रैममतिस्मरा
म्यहं । ...तप्रमतीवदण्डतस्त्विह नेतास्मि पुनर्दयान्वितः ॥२५॥ समये कियतीस्त्रयेलि रे

कुसुमैर्हीनसदालया भ्रमेः । भुवि पुंपरिवेष्टिनो स्त्रियं नवसर्गेण किलासृजाद्विभुः ॥२६॥
नगरेषु यहूदिषु व्रतः परिमुक्ता अतिकष्टबन्धनात् । सुकृतालय पुण्यपर्व्वतेति वदिष्यन्ति
कृताशिषो मुदा ॥२७॥ दशवंशसुतैरहं सहापि च कर्त्तास्मि यहूदिभिः सह । नवसंविदमग्रया
न तूपमितां मिश्रविनिःसृतौ यथा ॥२८॥ विनिराकृतयामुया हि मद्घृणितैस्तैरसमा भवेदियं।
स्वविधीन् न तदोपलेख्वहं नरहृत्स्वेव तु लेखितास्मि हि ॥२९॥ भवितास्मि कुले ७७
हमीश्वरः सकले मद्विदि वर्ण्यनीचके । तद्घक्षम एव भाव्यहं सततं विस्मृततत्कुकर्म्मकः ॥
३०॥ गुरूरुवाच ॥ तथा प्राग्भव्यवाच्येष दाविद्राज्ये हते ऽरिभिः । स्वकुलस्योक्तवान् मुक्तिं
भव्यो बाबिल्यबन्धनात् ॥३१॥ प्राग्बद्धानामपि प्रोचे मुक्तिं दशकुलोद्भवां । सान्त्वय
न्निव योसेफाबिन्यमीनप्रसूं गिरा ॥३२॥ तयोः कनीयसः सा हि राखिला मृतिकष्टतः ।

यथामदुदितं शिष्य पुरा बेथ्लहमे मृता ॥३३॥ अन्यवंशाद्यहूद्यात् बिन्यमीनीयसंयुतान् ॥
आश्रितेशालयाद्भावि तत्संत्यक्तघमोचनं ॥३४॥ तन्नवं चिरतो ऽप्युक्तं कुमार्युत्पाद्यपूरुषात् ॥
उद्गण्यं सततं सान्त्वं सर्वदुःखेषु धर्म्मिणां ॥३५॥ तदङ्गोमुक्तिकर्त्रर्थं बहवश्चैव तत्परे ।
सर्वावस्था अपि मृतिं ययूरक्तावृतां मुदा ॥३६॥ आद्यास्त्वज्ञा इमे बाला घात्यरयाखिल
मुक्तये । स्थिता येष्वः पदे तत्र राज्ञेशद्वेषिणा हताः ॥३७॥ किंतु बालवधात्सर्वा राखिला
न्तस्थलान्तिकां । व्यापिनः परितो भूमिं शिशुर्येषूः पलायितः ॥३८॥ मार्गमाणे हि सर्वा
तद्गयव्यापूनीवृति । सपुत्रे राज्ञि यत्रासीत् ख्रिष्टजन्मप्रकोर्त्तनं ॥३९॥ बहून् स्वनिकट
स्थांश्च फरीष्यादीन् यहूदिनः । घ्नति शङ्कुरचित्ते तत्प्रतीक्षामात्रहेतुतः ॥४०॥ संररक्षात्मजं
स्रष्टा नारीमात्रोद्भवं भुवि । न तदोर्द्ध तु दुर्नागदशनाघात्यपार्ष्णिकं ॥४१॥ पालको

तन्मातुः कुमार्य्याः पतिरेव च । दूतादेशेन योसेफोऽतीतबेथ्लहमोऽभवन् ॥४२॥ अत्याप

चलनाच्चाथ यहूदेगुप्तमध्यमं । प्रान्तरं देशमागत्य कष्टां तत्रावलत्सृतिं ॥४३॥ तद्ग्राम

दिश्यवातिष्ठत्स मरुप्रान्तरो महान् । चत्वारिंशत्समा यत्राभ्रमन् प्रत्नैस्त्रयेलकाः ॥४४॥ किय

त्ययें तथैवासीद्ग्रामदिश्यब्धिरूर्म्मिमान् । यस्मिंस्ते शुष्कवत्तेरूर्मग्नास्त्वैगुप्तका द्विषः ॥४५॥

स तु तस्योत्तरे गत्वा प्रत्यग्दिग्गतवर्त्मनि । शेषे बालेन पत्न्या चान्वितो मिस्रमुप ७

स्थितः ॥४६॥ यत्रार्च्चिता मठेषून्नेष्वनन्ता देवमूर्त्तयः । वृषाद्या मुण्डितैर्विप्रैः प्रत्नशास्त्रोप

देशकैः ॥४७॥ यत्रैव सर्व्वभूप्लावी नक्रभीमो महानदः । नीलो नामादृतो मैत्रैः शुभतीर्थ

समन्वितः ॥४८॥ नीचके तत्र तद्भागे ऽलेक्षन्द्रीयपुरान्तिके । उदासीनस्तदोवास येशु

नन्मातृपालकः ॥४९॥ यथाद्यो ऽपि स योसेफ इस्त्रयेलसुतः प्रियः । बन्धुजीवनरक्षो

मिश्रमीशवशाद्गतः ॥५०॥ ततो वर्गी विनिःसृत्य गतदीर्घविपच्चयाः । तद्वंशोयेन [illegible]
देशं नीताः प्रतिश्रुतं ॥५१॥ तत्रास्थीन्यपि ते निन्युर्योसेफस्य यथैव सः । निःसृतिश्च[illegible]
मिश्रे म्रियमाणः पुरादिशत् ॥५२॥ तथायमपि योसेफः सूत्रधारोऽपि भाग्यवान् । संर
क्षार्थेऽखिलनरमोक्तुर्मिश्रं गतस्तदा ॥५३॥ ततो बालोऽपि निःसृत्य स येषूरीश्वरात्मजः ।
दुःखौघसहनेनातः स्वर्गमेवानयेत्स्वकान् ॥५४॥ एतत्सर्वं सदात्मा तु तद्द्यो दृष्टवांश्चिरात् ।
सार्द्धसप्तशताब्दात्प्राक् प्रवक्तारमवाचयत् ॥५५॥ होषेय उवाच ॥ यदेस्रयेलः शिशुरेव
संस्थितस्तदा मयाप्रीयत विश्वकारिणा । अतोऽप्युदासीनमहं स्थितं प्रियं निजात्मजं मिश्रत
आहूयं वहिः ॥५६॥ गुरुरुवाच ॥ एवं सोऽफ्रैमवंश्यानां भिन्नतच्छासने स्थिते । ईशत्यागं
विनिन्दंस्तान् प्राक्प्रेमास्मारयद्विभोः ॥५७॥ यन्मिश्रान्निःसृतावीशो दृष्टान्तं श्रेयसोऽकारोत्

प्रेम्नो भव्यस्य पुत्रे स्वे यिरिमीयोदितं यथा ॥५८॥ पूर्वस्याः संविदोऽमुष्या भव्यां हि श्रेयसीं
जगौ । सोऽघमोक्तीं तथा चास्याः स्म हेतुमपि शंसति ॥५९॥ यिरिमीय उवाच ॥ इदमाह
विभुः पराण्यहान्यहमानाय्यपनीतदुर्नृपः । शुभमप्यवरोहमुद्धरन् सुशिफाया अभिषिक्त
दाविदः ॥६०॥ अधिपः कुशलान्वितोऽप्यथो भुवि सन्न्यायमसौ करिष्यति । दशवंशसुता
द्विवंशका अपि चाप्स्यन्ति ततो विमोचनं ॥६१॥ अत एव यहूदिकाद्यया प्रजया सोऽधिप ८१
ऐस्त्रयेल्यया । अतिपालितया भवेत्तदाभिहितोऽस्मत्परिशुद्धिकृद्विभुः ॥६२॥ य इहापनि
नाय मिश्रतो विभुरस्मान् वरदः स जीवतु । इति तेषु दिनेषु न क्वचिद्वचनीयं शपकर्नृभि
र्भुक्तः ॥६३॥ दलितांस्तु य उत्तरादिदिग्गतो नोऽनयदैस्त्रयेलकान् । पुनरात्मभुवीति तैस्तदा
कुशलैर्वाच्यमितः शपोक्तिषु ॥६४॥ इति श्रीखृष्टसंगीतायां येषूत्पत्तिपर्वणि (होषेयभव्यवा

क्यानामेकादशसर्गाद् यिरिमीयभव्यवाक्यानां त्रयोविंशतितमैकत्रिंशत्तमसर्गाभ्यां मत्थायलूक
योर्द्वितीयसर्गात्तदादिभ्यश्चोद्धृतो) ऽनघशिशुवधो नामैकादशोऽध्यायः ॥

शिष्य उवाच ॥ द्वाविदीयशिफोत्थेयोऽवरोहः शुद्धिमानिति । मया संश्रुतमुल्लिख्य
इषाययिरिमीययोः ॥१॥ स महैश्वर्य्ययुक्तस्तु येषूर्भावीति लक्षणैः । ऐश्वर्यैरपि संसिद्धं तद्वर्गे
चान्यजेषु च ॥२॥ रहस्यमपि तन्मन्ये प्रकाश्यं क्रमशो गुरो । प्रच्छनीयं त्विदानीं स कथं ८२
मिश्रात्पुनर्गतः ॥३॥ गुरुरुवाच ॥ न दीर्घं तत्परे शिष्य सोऽजीवद्दार्लहिंसकः । ईश्वारि
रभिषिक्तस्य तत्सूनोश्च जिघांसुकः ॥४॥ महाहेरोदिसंज्ञः स पुरा निहतवांस्तथा । स्वपत्नी
मात्मजौ चापि शङ्कुक्रूरत्वकृष्टहृत् ॥५॥ शेषे तु घोररोगेण सर्वाङ्गव्यापिना भृशं । दुःश्वा
सः स्फीतपादोऽभूद्दुर्गन्धस्तापवांश्च सः ॥६॥ पीडौघान्मृत्युकामोऽपि क्रूरहृत् संस्थितो

ध्रुवं । स्वान्तकालेऽजिघांसत्स यिरीखूपुरसन्नमान् ॥७॥ पुत्रमप्यन्तिपत्राख्यं खृष्टना
शेच्छुमात्मवत् । हन्तुमाज्ञाय तद्दातात्परे प्रेतोऽह्नि पंचमे ॥८॥ अथ तद्दानपत्रेणानुमत्या
चापि कैशरः । तद्राज्यश्रेष्ठमापांशमर्खिलौर्नाम तत्सुतः ॥९॥ गलीलां त्वन्तिपाः प्राप
त्रखोणीं तत्परः सुतः । फिलिप्पः पादभुक्संज्ञौ न पितेव नृपौ तु तौ ॥१०॥ नार्खलाव
मपि प्रोच औगुस्तो भूमिपं तदा । स्वपितुर्दानपत्रेण यहूद्येश्च तथा मतं ॥११॥ भूमिभाग ८३
प्रवृत्त्या तु विस्मृते खृष्टकर्म्मणि । तद्देशदूत ऐगुप्ते स्वप्ने योसेफमब्रवीत् ॥१२॥ दूत उवाच ॥
बालं समातृकं नीत्वा स्वदेशे त्वं पुनर्व्रज । ऐस्त्रयेल्येऽधुना यस्मात्प्रमीतास्तज्जिघांसवः ॥१३॥
गुरुरुवाच ॥ स्वप्नवाण्या तथादिष्टो मरीयां बालमेव च ॥ मिश्रात्प्रत्यानयद्धृष्टो येन दुःख्य
विशत्पथा ॥१४॥ पितॄणां च समाप्याशु द्विविंशत्यब्दपद्धतिं । ईशाहूतः सुतः प्रेष्ठो

मिश्रात्स्वं देशमाययौ ॥१५॥ तन्नैर्ऋतदिशा विष्टावित्तां तत्पितरौ तदा । स्थितं यिरू
षलेमे ऽमुमर्खलावं पितुः पदे ॥१६॥ यहूदिपं नृपं चैव समार्य्यैदूमवासिनां । पितृतुल्य
तमं ज्ञात्वा हेरोदितनयेषु तं ॥१७॥ अतस्तद्दुर्म्मनोभीत्याक्रान्तौ खृष्टस्य पालकौ । न तन्म
हापुरं यातौ देशे ऽप्यस्मिंश्च न स्थितौ ॥१८॥ तीर्त्वा त्वाशु यहूद्यां तौ समार्य्यां चापि नीवृतं ।
उत्तरं देशमायातां तत्सोदर्य्यान्तिपांशकं ॥१९॥ गलीलायाश्च तद्भूमेस्तस्यां तौ पुर्य्येव ८४
स्थितौ । यतः प्राक् कैशराज्ञातो दक्षिणाशां विनिर्गतौ ॥२०॥ तथा क्षुद्रे ऽपि नगरे नशरे
दभिधे त्वितः । अवरोहेति यन्नामोच्यते संस्कृतभाषया ॥ २१ ॥ गुरुत्वावध्यतिष्ठत्स
तथोचुर्भव्यवाचिनः । इषायायिरिमीयौ यं जकरीयो ऽपि चाह्वः ॥ २२ ॥ शिष्य
उवाच ॥ किमतिष्ठदियद्दीर्घमागुरुत्वमपि प्रभोः । यिरूषलेममध्ये तद्धेरोदिसुतशासनं ॥

२३॥ गुरुरुवाच ॥ नेयत्कालमतिष्ठत्सा पूर्णांस्तु नववत्सरान् । महाहेरोदिमरणात्परे
शास्तिर्दुरात्मिका ॥२४॥ यद्भूतं वैक्रमे विद्धि त्रिपंचाशत्तमे शके । सार्द्धसप्तशताब्दे तु महारो
माविनिर्म्मितेः ॥२५॥ एतत्तृतीयवर्षे तु वैक्रमो यः शिवेषुकः । यो ऽप्यष्टसप्ततितमः प्राक्तनः
शालिवाहनात् ॥२६॥ तस्मिन् समार्पयन्नेव शकं खृष्टानुचारिणः । पूर्णवत्यपि तत्काले
चतुरब्दवयः प्रभौ ॥२७॥ खृष्टशाके ऽष्टमे ऽतो ऽपि द्वादशाब्दे तदायुषः । दशमे ऽपि च ८५
हेरोदेर्मृत्योः खृष्टाततायिनः ॥२८॥ तदैव दुष्टराज्यं तत् परमेशो व्यनाशयत् । साम्राज्यं
चान्यजातीनां स्वपुरे ऽस्थापयद्ध्रुवं ॥२९॥ दूरीकृते ऽखिलान्युग्रे ऽथ येष्वः पितरौ शुभौ ।
आश्रितेशगृहौ नूनं प्रत्यब्दं त्राणपर्व्वणि ॥३०॥ तमप्यनयतां बालं प्रत्यब्दं स्वगृहात्तदा ।
यिरूपलेममत्रासौ रोम्यगोपेन शासितं ॥३१॥ शिष्य उवाच ॥ तन्नवं शासनं तत्र स्वपुत्रे

बालके स्थिते । हतहैरोद्यशास्तिर्नु कथमस्थापयद्विभुः ॥३२॥ गुरुरुवाच ॥ ईशपुत्राच्युतै
श्वर्य्यस्याविष्कार्य्यस्य तत्परे । विघ्नो नाभूत्तदा शिष्य स रौम्याणां पराक्रमः ॥३३॥ येनापि
खृष्टशत्रूणां शासनं दुर्यहूदिनां । ईशो व्यनाशयत्तत्र यथा पृष्टो वदामि ते ॥३४॥ क्रूरता
मखिलावस्ते ससमार्य्या यहूदिनः । अशक्ता अधिकं सोढुं नवाब्दान् सहितामपि ॥३५॥
निवेद्य कैशरे रौम्यैर्भूमिपैः पालिषीमहि । धृतस्वधर्म्मशास्त्रा नु वयमित्यर्थयन्नमुं ॥३६। ८६
अथौगुस्तोऽखिलावं तद्देशतः प्रैरयत् क्रुधा । व्येन्नापुरमतिप्रत्यग्गलतोयभुवि स्थितं ॥
३७॥ क्विरोणं नाम रौम्यं च सुर्य्याध्यक्षं समार्पयत् । सर्व्वपर्य्यन्तदेशस्यैकधा संस्थापनाय
हि ॥३८॥ नियुक्तं तेन चाप्यन्यं कोपोन्याख्यं समैरयत् । गोपं यहूदिकादीनां तदिच्छा
पूरको हि सः ॥३९॥ क्विरोणस्त्वागतो देशेऽसौ गलीलायहूदिके । द्वादशाब्दे पुरादिष्टं

यथोक्तं करमग्रहीत् ॥४०॥ यो हेरोद्यखिलावोस्तु काले लिप्यापि निश्चितः । नादीयत
समादातुं समारभत यत्नतः ॥४१॥ तेन तु व्यरूणत्तत्र कश्चिद्धर्म्मोन्मदो नरः । गलीलीयो
यहूदाख्यो वृतो बह्वनुचारिभिः ॥४२॥ नान्यदेवार्च्चिने देयो विभुनामाश्रितैः करः । इत्ये
वादिश्य सोऽशांस्तान्महाकलहमानयत् ॥४३॥ वरमुन्मदमात्रैः सोऽन्वितो योद्धा गलीलकः ।
अविरक्षुब्धितः पश्चात् क्विरीणेन पराजितः ॥४४॥ सर्व्वे दत्तकरास्ते च कोपोन्यस्यैव ८७
शासनं । न प्रेम्ना विपदां भीत्या त्वमन्यन्ताविरोधिनः ॥४५॥ करं येऽमुं तु रौम्यार्थं स
मगृह्णन् यहूदिनः । ते शेषैरधमा ज्ञाताः स्वधर्म्मत्याजका इव ॥४६॥ प्रत्यैच्छन् गर्व्विणो
ह्येते दाविदुद्भव्यनायकं । योऽभिषिक्तो बलं रौम्यं भीमरूपं विनाशयेत् ॥४७॥ ईदृशं ते
ह्यबुध्यन्त सर्व्वान्वृष्टप्रवाचकान् । यदाद्योऽपीत्रयेलस्तां यहूदायाशिषं ददौ ॥४८॥ याकोब

उवाच ॥ नाम्ना प्रशंस्य इतरैस्तनयैर्यहूद त्वं मेऽर्चितोऽप्यरिगलोपरिदेयहस्तः । त्वं सिंह
शाव इव वै मृगयोत्थितोऽसि तं त्वानताङ्गमपि जागरयेद्धरिं कः ॥४९॥ दण्डोऽयिमो
ह्यपसृतो न भवेद्यहूदाद्गोत्रान्नवास्य विरमेदपि चाक्षदर्शी । यावन्न तत्सदधिकार उपस्थितः
स्यात् तं प्रत्यतोऽपि च समानयनं कुलानां ॥५०॥ गुरुरुवाच ॥ इति ख्रृष्टात्सहस्राब्दे पूर्वं
सर्वैस्त्रयेलिनां । पिता द्वादशपुत्राशीर्वादेऽयां प्रोच आशिषं ॥५१॥ दाविदारिज्ञिता ८८
राज्ये प्रारब्धे ह्यैस्त्रयेलके । धन्ये यहूदिना प्राप्नोत्पूरणारम्भणं तु सा ॥५२॥ तत्परे
ऽपि च तद्राज्यं हतेऽप्यक्रमकेऽरिभिः । गतेषु तज्जनेष्वेव स्वप्रशंस्यभुवि स्थितं ॥५३॥
सर्वेषां चैस्त्रयेल्यानां ये ये बाबिल्यबन्धनात् । पुनर्दधुः क्षितिं तेषां ख्याताः श्रेष्ठा
यहूदिकाः ॥५४॥ न वा यिरूषलेमेऽस्य वंशस्यादिपुरे तथा । विभुमन्दिरसंस्थाने विर

रामासदर्शकः ॥५५॥ दाविद्दण्डे तु संगुप्तेऽप्युपस्थेयं तदा बुधाः । एतत्सदधिकारं
तं प्रत्यैच्छन् पितृवाक्यतः ॥५६॥ यं स्वृष्टं ते यहूदीयार्यसिंहमिति मेनिरे । संनेतारं
कुलानां चारिगलाक्रान्तहस्तकं ॥५७॥ इदानीं गर्व्विणश्चातः फरीष्याद्या यहूदिनः । रौम्या
णां मुद्गरं भव्यं तं प्रत्यैक्षन्त रिक्थदं ॥५८॥ न त्वबुध्यन्त संमूढा इषायाध्यायिनोऽपि
ते । कुलानां तां समानीतिं यहूदोत्थध्वजं प्रति ॥५९॥ स ह्युदारोऽन्यराष्ट्राणामपि तद्व्रज ८९
मार्गिणां । नारिवन्नाशकः किंतु तेजोयुक्तविरामदः ॥६०॥ तज्जयं चापि दुष्टानां
भग्नदण्डं युगोच्छिदं । नैति योधा इवान्ये स तुमूलासृग्वृताङ्ककाः ॥६१॥ सन्धिनाथा
भिधः सोऽपि तमोघ्नो वर्गनायकः । समारेभे प्रवाच्युक्तां गल्लीलातः क्रियामिमां ॥६२॥
इति श्रीख्रिष्टसंगीतायां येषूत्पत्तिपर्व्वणि (मोसिरचितपंचशास्त्रप्रथमस्कन्धस्योनपंचाशत्तमसर्गाद्

इषाययिरिमीयजकरीयभव्यवाक्येभ्यो मत्थायलूकरचितमङ्गलसमाचारयोर्द्वितीयसर्गात् फ्लाव्य योसेफरचितयहूदिपुरातनप्रबन्धात्तद्रचितयहूदयुद्धोपाख्यानाच्चोद्धृतो) राज्यविकारो नाम द्वादशोऽध्यायः ॥

गुरुरुवाच ॥ येषूत्पत्त्यन्विता ये ये वृत्तान्ता अतिविस्मिताः । आसन्नीशार्पिताः सद्भिः ख्यातास्तदनुचारिभिः ॥१॥ समाप्तान् द्वादशाध्यायेष्वेषु मे विद्धि शिष्य तान् । तथा पञ्चा द्व्याब्देऽपि यत्कृतं तत्र कैशरा ॥२॥ किन्त्वितश्चिरमप्यासीन्मन्नदस्याद्भुतस्य यत् । शक्तेशस्य गुरुत्वं सद्भिरामानन्ददायकं ॥३॥ अत्याश्चर्यं चरित्रं च रोगपापविनाशकं । मृत्युयुक्तं च माहात्म्यं मृत्युनाथशिरोहणं ॥४॥ समस्तभव्यवाक्यानां पूरकं खृष्टकर्म्म तत् । विस्तरात्ते प्रवक्ष्येऽहमन्याख्याने न सांप्रतं ॥५॥ इदानीं त्वपि तेऽव्यक्तं पुरोक्तेषु बभूव यत् । प्रथमं

चेत्त्वया पृष्टमुत्तरं तन्ममाप्स्यति ॥६॥ शिष्य उवाच ॥ बहून्याचार्य्य मेऽज्ञत्वात्प्रष्टव्यानि प्र
सादक । ईशमन्दिरसंस्थानात्त्वयो मय्यस्ति संशयः ॥७॥ यदि सर्वैस्त्रयेलार्थं तदेकं मन्दिरं
स्थितं । यज्ञीनानां महाद्वो ऽभूदफ्रैमादिकुलोद्भुवां ॥८॥ कथं दूरस्थिता धर्म्म्या आवरन्नि
घयेलजाः । तन्मतालम्बिनश्चैवं योग्यमीश्वरपूजनं ॥९॥ किमेकधैव ते ऽब्दे ऽब्दे ऽभ्येतुं शी
योनपर्वते । योग्या यथा गलीलातस्तौ येषूपितरौ गतौ ॥१०॥ गुरुरुवाच ॥ महापर्व्वसु ९१
संतुष्टा अतिदूरालया अपि । तथैवाब्रहजा याता धर्म्म्यं तत्पर्वतं सदा ॥११॥ मोसिनिर्म्मित
दूष्ये प्राक् प्रान्तरेऽङ्गे यथा ह्यभूत् । तथा मन्दिर एवार्च्यं संविद्यात्रीश्वरासनं ॥१२॥ ततो
यावन्न यतेशो नररूपे प्रतिष्ठितः । पूर्णयज्ञो ऽर्पयेदर्चां श्रेष्ठां सर्वेष्ट उज्ज्वलः ॥१३॥ तावत्
केवलमेतस्मिन् विभोर्यज्ञादिपूजनं । प्रकर्त्तव्यं यथामुष्मिन् मन्दिरे ऽये सलोमके ॥१४॥

तदापि तु मठा नानास्थानेषु भुवि संस्थिताः । अध्यक्षैर्ज्येष्ठवर्गैश्च परिचारैश्च संयुताः ॥
१५॥ येष्वधीतं महामोसेः शास्त्रं प्रतिशनैश्चरे । वाचश्रेशप्रवक्तॄणां शेषे ग्रन्थाश्च पुण्यकाः ॥
१६॥ न तु यज्ञादिका सेवा तत्र लैव्यैरपि क्वचित् । अहरोणोद्भवैश्चापि कर्त्तव्या मोसि
शास्त्रतः ॥१७॥ शिष्य उवाच ॥ मोसेस्तच्छास्त्रमाचार्य्यं वाचश्रेशप्रवाचिनां । शेषांश्च
कृपया ग्रन्थाननुसाराद्विवर्णय ॥१८॥ गुरुरुवाच ॥ पूर्व्वसंस्थः समस्तानां ग्रन्थानां योनि ९२
रेव च । ईशबुद्धेः स पञ्चांशः शास्त्राख्यो मोसिना कृतः ॥१९॥ योन्याख्यादिमतत्स्कन्धे
सर्व्वभूतगणस्य हि । सृष्टिरादमादीनां चादिमानां कथा नृणां ॥२०॥ तत्पापपतनं भद्राव
शेषस्त्वीश्वरप्रियः । विप्लवाच्च परे नोहोत्पन्नमानववर्णनं ॥२१॥ ततो ऽब्रहेमहकयो
यीकोबस्य च कीर्त्तनं । तन्मिश्रगतिपर्य्यन्तं सर्व्ववंशाशिषो ऽपि च ॥२२॥ निःसृत्याख्ये

द्वितीये तु स्कन्धे कथितमद्भुतं । निर्द्दयान्मिश्रभूमीशात् सङ्गस्य विमोचनं ॥२३॥ मुक्ता
नामपवादश्च प्रान्तरे ऽपि च पालनं । ईशदत्तं महाशास्त्रं सीनायाद्रौ च मोसये ॥२४॥ लेविकाख्ये
तृतीये तु स्कन्ध आदिश्यते स्फुटं । किं कार्य्यं यज्वभिः सर्व्वैः पुरोधोभिश्च लेविकैः ॥२५॥
किं पूतं किमपूतं च भोजनाद्येषु कर्म्मसु । बलिहोमाध्वरादीनि चावर्ष्याणीस्त्रयेलजैः ॥२६॥
संख्यानाम्नि चतुर्थे तु स्कन्धे सेनैस्त्रयेलिका । मरुस्था वर्ण्यते सर्व्वा स्वस्ववंशप्रधानिका ॥ ९३
२७॥ ईशदूष्यप्रतिष्ठाथेष्टेर्य्यन्तिक उपस्थितिः । विरोधा विविधाश्चैव दण्डाश्चाप्यप्रनी
तिनां ॥२८॥ जयाश्च वैरिणां राज्ञामहरोणे मृते मरौ । लेवीपौत्रे ऽथ कन्यामस्याशी
रीश्वरचोदिता ॥२९॥ चरमे त्वनुवाक्याख्ये स्कन्धे सो ऽयः प्रवाचिनां । मोसिरीशकृतं
सर्व्वं वर्गार्थे वक्त्यनुक्रमात् ॥३०॥ श्रेष्ठाश्चास्य ततो ऽप्याह स्मार्य्यगीतसमन्विताः आशिषं

तद्विनीतेभ्यो विरोधिभ्यस्तथा शयं ॥३१॥ परं चात्मनिभं भव्यं परे प्रोचेशवादिनं
कनानं शिखराद्दृष्ट्वा मृतो ऽदृश्यशवो नरैः ॥३२॥ ऐस्त्रयेल्यमिदं शास्त्रं ततस्त्वीश्वरवादिनां ।
प्रबन्धाः प्रथमस्त्वेषां येषूचरितसंज्ञकः ॥३३॥ स प्रतिश्रुतदेशस्य पयःक्षौद्रप्लुतस्य हि । पुर
दुर्गवृतस्याह जयं नूनभुवा कृतं ॥३४॥ द्वितीये तु प्रबन्धे तन्मृत्योः पश्चाद्बभूव यत् । धर्म्म
नायकसंज्ञानां वर्गशासनमुच्यते ॥३५॥ तैश्च संसोनपर्य्यन्तैर्नानारिविजयः कृतः । तदा नाना ९४
पराधाश्च कलहाश्चैस्त्रयेलिनां ॥३६॥ ततः क्षुद्रे प्रबन्धे तु रूथाचरितमुच्यते । यदुत्पन्ना
शुभा पश्चादीसिबेथ्लुहमे शिफा ॥३७॥ ततो ग्रन्थास्तु चत्वारो ऽनेकोक्ता राजकाः समं । तेषां
त्वाद्यौ यहूद्येषु स्थितौ संवेलनामकौ ॥३८॥ जन्म तत्प्रथमे ह्युक्तं संवेलस्येशवादिनः । तत्कृत
श्चाभिषेको ऽपि क्रमतः सौलदाविदोः ॥३९॥ द्वितीये मृतयोर्भूतं सर्व्वं संवेलसौलयोः । दावि

द्दो राज्ञ ऐश्वर्य्यं नानाकर्म्म च कीर्त्तितं ॥४०॥ तृतीये तु यहूद्योक्ते राजग्रन्थादिमे किल ।
दाविन्मृत्युः सलोमनश्च राज्यमुक्तं सगौरवं ॥४१॥ तत्सूनोः समये चापि राज्ययोर्भेदनात्परे ।
आमृत्यु राडहाबस्य राड्यहोषफटस्य च ॥४२॥ चतुर्थे तु यहूद्योक्ते द्वितीये चरमे त्वपि ।
ग्रन्थानां राद्चरित्राणां कथितास्तत्परे क्रियाः ॥४३॥ लोपो ऽफ्रैमीयराज्यस्य तत्परे शेष
एव च । दाविद्राज्यलयो वर्गबन्धनं चापि बाबिले ॥४४॥ ग्रन्थचतुष्टयं त्वेतत् सयेषूधर्म्मने ९५
तृकं । षट् प्रबन्धा यहूद्योक्ताः प्राक्तनेशप्रवक्तृकाः ॥४५॥ पुण्यग्रन्थास्तु तैरुक्ता रूथावरित
वत् स्थिताः । प्रबन्धा इतरे पंच वर्णनीया मयाधुना ॥४६॥ नूत्नमन्दिरकाले ते रचिता
नादिमा इव । यदग्यौ कालवाक्याख्यौ कृतौ तत्सत्पुरोहितैः ॥४७॥ तयोस्तु प्रथमे वंशा
आदमावधयो नृणां । दावित्पर्य्यन्तकाः ख्यातास्ततस्तद्राज्यवर्णनं ॥४८॥ द्वितीये तु

तदुत्पन्ना नृपाः प्रोक्ता यहूदिकाः । आराज्यान्तं न सामार्य्यास्त्वेवं राजचरित्रवत् ॥४९॥
अथोक्ता यज्वनोऽज्रस्य ग्रन्थे बाविलनिःसृतिः । जरूबाबिलिका स्वा च प्रतिष्ठेयोमरौक
सः ॥५०॥ ततोऽप्यज्रापरग्रन्थे नहमीयो ब्रवीत्यपि । स्वपुरं प्रति निष्क्रान्तिं पारसीक
नृपाज्ञया ॥५१॥ चरमे त्वेस्तराग्रन्थे राजपत्न्या तया कृतं । जिघांसोर्हामनात्स्वीयवर्ग
मोचनमुच्यते ॥५२॥ इत्थं सदितिहासोऽस्ति काव्यरूपास्तु तत्परे । पंच ग्रन्थाः स्थिता अन्ये ९८
पुण्या विश्वासिभिः स्मृताः ॥५३॥ तेषां प्रत्नतमो ग्रन्थो मोसिनारण्यवासिना । रचितः
सदयोबस्याह दुःखसहनं शुभं ॥५४॥ द्वितीयस्त्वैश्वरीयाणां गीतानां संचयो महान् । सार्द्धै
कशतसंख्यानां कृतानां दाविदादिभिः ॥५५॥ यासु भात्यैश्वरी भक्तिर्विश्वासप्रेमरूपिका ।
सुखदुःखान्तरेऽप्युक्तानन्दविक्रमशान्तिदा ॥५६॥ पूर्वेषां चेस्रयेलार्थे स्तुतिरीश्वरकर्म्मणां ।

कार्य्याणां चापि खृष्टेन द्वाविज्ञेन प्रतिश्रवः ॥५७॥ तृतीयस्तु सलोम्नो ऽस्ति मन्त्रणावाक्य संचयः । संसारार्थप्रवृत्तेभ्यो हितधर्म्मोपदेशदः ॥५८॥ चतुर्थस्त्वस्य राज्ञो ऽपि वृद्धस्याखिलदर्शिनः । ग्रन्थो मण्डलगुर्वाख्यः संसारासत्त्वशिक्षकः ॥५९॥ पंचमः श्रेष्ठगीताख्यः शुभशृङ्गारवर्णकः । तद्ग्रन्थः खृष्टमण्डल्योः सत्प्रेमप्रतिविम्बकः ॥६०॥ इति ते पुण्यका ग्रन्था यत्परे भव्यवाचकाः । चत्वारस्त्वग्रिमास्तेषां क्षुद्राश्च द्वादश स्मृताः ॥६१॥ तत्स र्वेषु यहूद्योत्तेषून्नरेशप्रवक्तृषु । अग्र्यः संस्थापितः सर्वैरिषायो ऽमोशजः कविः ॥६२॥ स राजोज्जीयमृत्यब्दे दर्शितेशप्रभूज्ज्वलः । दूतेनाग्न्युष्णवेद्युत्थाङ्गारस्पृष्टोष्ठसंस्कृतः ॥६३॥ तत्कालाद्यामनस्स्येव विविधं विस्तराज्जगौ । भव्यखृष्टस्य माहात्म्यं नानाभूमन्त्रणान्वितं ॥६४॥ यिरिमीयो द्वितीयस्तु सद्योसीयमृतेः परे । भूयिष्ठामतवाक्यो ऽपि सोढनित्याधिरेव च ॥

६५॥ सुन्दरोक्तीस्तदापि स्वाः प्रोचे ऽरिवृतसत्पुरे । भव्यापद्वाचका नित्यसान्त्वनादेशसं युताः ॥६६॥ किंतु तद्भव्यवाक्यानां महाग्रन्थात्परे ऽपरः। क्षुद्रो विलापसंज्ञो ऽस्ति सत्पुरीनाश हेतुतः ॥६७॥ तद्बन्धनस्य मध्ये ऽपि तृतीयो ऽग्रप्रवाचिनां । गुप्तदर्शी हिजिक्येलो ऽद्भुतं स्वं प्रजगौ वचः ॥६८॥ तूरमिश्रादिवर्गाणां स्वस्य चाप्यघमुक्तवान् । लयमङ्गोरतानां च पराशां चानुतापिनां ॥६९॥ दान्येलस्तच्चतुर्थस्तु बाबिले ऽपि स्थितः सुधीः । काल्दा ५९ य्याधिपमन्त्री तद्भाषया निजयापि च ॥७०॥ प्रवक्ति विभुनादिष्ट आजगच्छेषमप्यृतं । कच्चतुर्ष्वेव साम्राज्येषूद्भव्यः कर्म्मसंग्रहः ॥७१॥ इत्यग्रा भव्यवक्तारः सपुराणयहूदिभिः । ख्रिष्टीयैः किल संख्यातास्ततो द्वादश चेतरे ॥७२॥ तेषामाद्यस्तु होषेयः प्रागिषायादपि स्थितः । पापमफ्रैम्यराज्यस्य निन्दन्नूनं विशेषतः ॥७३॥ तद्द्वितीयस्तु योवेलो शलभा

त्मकवैरिणां । आक्रान्तिं प्रोच तत्सान्त्वं भव्यमूचे सदात्मनः ॥७४॥ आमोसस्तनृतीयस्तु तत्प्रत्नतम एव च । गोपालो बहुवर्गाघं भव्यमुक्तिमुवाच च ॥७५॥ ओबदोयश्चतुर्थस्तु तेष्वल्पोक्तितमोऽपि च । दण्डमैदूम्यदर्पस्याह भव्यं समये प्रभोः ॥७६॥ योनस्ततपंचम स्त्वासोन्नीनवीपुरवासिनां । निन्दाय विभुना नुन्नोऽसुर्य्याणामब्धिविप्लुतः ॥७७॥ षष्ठो मोकास्त्विषायस्य स्थितः काल उपादिशत् । तद्वर्गानुतपनं भव्यसम्राजजन्म च ॥७८॥ नहूमः ९
सप्तमस्त्वाह नीनव्यन्तं ततोऽष्टमः । मनस्सौ राज्ञि काल्दाय्यं हबकूकोऽब्रवीद्गलं ॥७९॥ तत्क्लेशसान्त्वनोद्गोतात्परे योसोयशासने । नवमः शफनीयोऽन्तं वर्गस्याप्यन्तिकं जगौ ॥ ८०॥ तदन्ताग्धिरिमीयादिकाले भूतात् परे नृणां । बाबिलात्प्रतिनीतानां त्रय एवैषवा चकाः ॥८१॥ अन्त्यानां भव्यवक्तृणां दशमैकादशौ किल । हग्गायो जकरीय[illegible]

कीयजः ॥८२॥ तौ हि मन्दिरनिर्माणे जरूबाबिलसंयुतौ । श्रेष्ठां तच्चरमाहेषूक्रन्थ्यां मुक्ति
मर्पयताम् ॥८३॥ द्वादशानां तु चरमो मलाकीयः प्रवाचिनां । नहमीयात्परे खृष्टात्प्राक्
शताब्दचतुष्टये ॥८४॥ वर्गस्य यज्वनां चापि लोभाद्याधर्म्मनिन्दकः । न तादृड्मुक्तिदं भव्यं
तदिष्टमवदत्प्रभुं ॥८५॥ भव्यवाक्येन तस्यैव खृष्टयोहन्निदेशिना । परे ग्लोयात्समुत्थानां
पूर्णा वाचः प्रवाचिनां ॥८६॥ द्वादशाधिचतस्रस्ताः पुण्यग्रन्थास्तथैव षट् । मोसिदावित्स १००
लोम्ना ये यिरिमीयेण चोदिताः ॥८७॥ द्वादशापि प्रबन्धास्ते प्रोक्ता येष्वादिनामकाः ।
सर्वाग्रं मौस्यशास्त्रं च पंचस्कन्धधरं तथा ॥८८॥ एते सहस्रवर्षेषु सद्भिर्विरचिताः क्रमात् ।
सर्वे ग्रन्थाः समादेशोत्पन्ना ज्ञेयाः सदात्मनः ॥८९॥ इत्येतानखिलान्दधुः फरीष्याद्यैस्त्रयं
नकाः । ये ये पाषण्डिनश्चापि विभुमन्दिरमाश्रिताः ॥९०॥ तस्माच्चाखिलवर्गा ये प्रभुखृष्ट

ध्वजानुगाः । तद्विपक्षा यहूद्याश्चोभयास्तान्दधिरे सदा ॥९१॥ येऽपि मन्दिरहीनानां पार्श्व
दयाकुलोद्भवां । समार्य्यवासिनो दध्रुः सल्मनस्सार्पिताः पुरा ॥९२॥ यहूदिभ्यः पृथक् तैर्हि
पंचांशं केवलं धृतं । मोसिशास्त्रं न तु ग्रन्था दाविदादिप्रवाचिनां ॥९३॥ शिष्य उवाच ॥
मोसिशास्त्रधरास्तस्मात्सह खृष्टानुचारिभिः । यहूद्याश्च समार्य्यीश्चैवान्योऽन्यं ते विरोधिनः ॥
९४॥ तच्चतुस्त्रिंशद्ग्रन्थानां सहस्राब्दान्तरे क्रमात् । कृतानां रक्षिणः सन्ति सखृष्टीया यहूदिनः॥ १०१
९५॥ इति बुद्धं परे त्वेषां तच्छताब्दचतुष्टये । किं मलाकीययोहन्न्योरन्तरे न प्रवाच्य
भूत् ॥९६॥ गुरुरुवाच ॥ न ह्यभूच्छिष्य किंत्वासंस्तदा विश्वासिनो बुधाः । येषां यहूदि
भिर्ग्रन्था अलेक्षन्द्रीयकैर्धृताः ॥९७॥ पूर्वैः सहार्पितास्तेऽपि ग्रन्थैर्यावन्यभाषया । न त्वैब्र
येल्यया तद्वन्न चेश्वरात्मोत्थिता मताः ॥९८॥ तेषां खृष्टार्च्चकैरेवं धृतानां तत्परे स्थिते ॥

प्रथमो वक्ति कर्म्माणि नप्थलीवंश्यटोबितः ॥९९॥ यो हृतः सह वंशेन सल्मनस्रादिभिर्नृपैः ।
धार्म्मिको ऽतिष्ठदार्य्यात्मा नित्यं सपरिवारकः ॥१००॥ यूदीथाख्यो द्वितीयस्तु वीरायाः कर्म्म
विस्मितं । कस्याश्चिदात्मवर्गार्थें कथारूपो ऽपि शंसति ॥१०१॥ तत्परे तु सलोमीयबु
ध्याख्यो नीतिरूपकः । कृतो यावन्यसाम्राज्ये सौम्यवाचा यहूदिना ॥१०२॥ सलोमीयो
पमतरस्त्वन्यो मण्डल्यनामकः । सीराखतनयेनैव येष्वा विरचितः सता ॥१०३॥ तत्प १०२
रश्च बरूकाख्यो बाबिलस्थयहूदिनां । भ्रातॄन् प्रति लिपीः काश्चिद्गते पश्चात्तु कल्पितः ॥
१०४॥ मक्कबायाभिधौ चात इतिहासात्मकौ स्थितौ । प्रथमस्तु तयोः श्रेयान् पूर्वपुण्यप्रबन्ध
वत् ॥१०५॥ यस्मिंस्तेषां त्रिवीराणां सुतानामेकयज्वनः । यहूदमक्कबायाद्याख्यानां माहा
त्म्यमुच्यते ॥१०६॥ तत्कृता वर्गमुक्तिश्च राज्ञामीशद्विषां बलात् । तच्छेषोत्पन्नयोहन्निह्र

र्कानोदय इव च ॥१०७॥ द्वितीयो ऽन्यकृतस्त्वेषामाह व्युत्क्रमतः क्रियाः । वैरमन्तियु
कादीनां सङ्गीर्य्यं चेश्वरार्च्चिनां ॥१०८॥ तैर्ग्रन्थैस्तु विना केचिद्ग्रान्येलैस्तरयोर्मताः ।
निविष्टा ग्रन्थयोरंशा इव यावन्यभाषया ॥१०९॥ तथा पूर्व्वोक्तशास्त्राभ्यामप्यज्ञनहमीययोः ।
भिन्नमज्ञाभिधं किंचिद्यावन्येष्वपि विद्यते ॥११०॥ तच्छास्त्राणां न सत्यांशांस्तान् वै पश्चा
त्तु कल्पितान् । विदुर्धर्म्मर्यकथारूपानीशशास्त्रविपश्चितः ॥१११॥ रिपुबद्धनृपस्यापि मन १०३
स्सेः प्रार्थना मता । अनुतापयुता पापात् किंत्वेषा कल्पिता परे ॥११२॥ इत्युक्ताः
खृष्टकाले ये ऽतिष्ठन् ग्रन्था यहूदिनां । धर्म्मरूपाः सुपाठ्याश्च तथा खृष्टानुचारिभिः
॥११३॥ आदृता ये तु सर्व्वाग्रे नाम्ना शास्त्रप्रवाचिनां । सदात्मरचिताः प्रोक्तास्ते
पाठ्याः सद्बुधैः सदा ॥११४॥ इति श्रीखृष्टसंगीतायां येषूत्पत्तिपर्व्वणि (सर्व्वपुरातनपुण्य,

पुस्तकेभ्यो यिरोणुमरचितान्मुकुटरूपोपन्यासातदादिभ्यश्चोद्धृतः) शास्त्रोपाख्यानं नाम त्रयो दशो ऽध्यायः

शिष्य उवाच ॥ मोत्स्यादीनां सभास्वेते ग्रन्थाः प्रतिशनैश्चरे । पाठ्या यहूदिभिस्त्वत्तो ऽति तुष्टेन श्रुता मया ॥१॥ स वारस्तु गुरो कस्माद्वृतस्तत्पुण्यकर्म्मणे । न चान्ये सूर्य्यवाराद्याः कृपया तद्विवर्णय ॥२॥ गुरूरुवाच ॥ सप्तमे दिन ईशः प्राक् सर्वं सृष्ट्वा चराचरं । विश्रम्य १०४ कर्म्मणः शंस्याद्वरामाशिषमादधौ ॥३॥ अरूपे हि चिराद्भूते शून्ये च क्षितिमण्डले । तमोऽन्या प्ते च तद्गर्ते पृक्तवाष्पजलावनौ ॥४॥ ततः सूर्य्याह एवेशस्तत्राप्युत्थातुमादिशत् । रूपदं सर्व्व वस्तूनां प्रकाशं शब्दसंयुतः ॥५॥ सोमवारे महाव्योम मङ्गले ऽब्धिभुवौ तथा । बुधे समयभेदर्क्षाण्यण्डजांस्तु वृहस्पतौ ॥६॥ शुक्रे सर्वान् पशूंस्तेषां चाधिपं चरमे नरं । ससञ्जाथा

खिलं कृत्वा विशश्राम शनैश्चरे ॥७॥ यदा च सृष्टिरप्येषा हीनाशीर्नरपापतः । मायायाः
पीडिता बन्धैर्मुक्तोच्छुस्तु श्रमाच्चिरात् ॥८॥ तदा वर्गं वृतं मोक्तुः सो ऽवतार्य्यस्य जन्मने ।
आब्रह्मं बन्धनान्मैश्चाडहिर्निन्ये शनैश्चरे ॥९॥ तद्धेतुभ्यां मरो मोसिः सृष्टितो मुक्तितो ऽपि
च । दशैशादेशमध्ये तद्दिनं प्रोचे यथोदितं ॥१०॥ तदातः सर्व्वकर्म्मभ्यो न्यवर्त्तन्तेस्त्रयेल
जाः । सपुत्रभृत्यगो ऽश्वाद्याः सान्यजातिथयो ऽपि च ॥११॥ तन्न वर्गी धरन्त्यन्ये धृत १०५
वन्तो ऽपि सर्व्वतः । सृष्टेः सूर्य्यादिवाराणां भागं सप्तविधं सदा ॥१२॥ एवं विश्रामवारः सो
ऽब्दानामपि तु सप्तमः । विश्रामाब्दाभिधो यस्मिन्न वाप्या भूमिरेव तैः ॥१३॥ पूर्णे सप्त
गुणे त्वस्मिन् सप्ताब्दे शङ्खवत्सरः । स पंचाशतमो यस्मिन् सर्व्वान् भृत्यानमोचयन् ॥१४॥
शिष्य उवाच ॥ श्रुतमाचार्य्य तद्वाक्यं किंतूक्तेषु त्वया पुरा । यत्पर्व्वस्वाश्रिता धर्म्म्या मन्दिरं

कानि तान्युत ॥१५॥ गुरूरुवाच ॥ नानापर्व्वाणि तिष्ठन्ति किंत्वब्दे ऽब्दे विशेषतः । आग्नेयं
त्राणपंचाशद्दूष्यनामोत्सवत्रयं ॥१६॥ पर्व्वणां सत्तमं त्वेषां तद्विद्धि त्राणसंज्ञकं । मोसि
ना स्थापितं स्मृत्यै मिश्रतो ऽङ्गतनिःसृतेः ॥ १७ ॥ पौर्णमासी स्थिता ह्याद्या या महा
विषुवात्परे । वैशाखी भूरिवर्षेषु चैत्री त्वत्रैव केषुचित् ॥१८॥ ऐस्रयेल्ये सदाब्दे सा
पौर्णमास्यादिमा सती । तत्पित्रुपरि तद्दोरनिःसृतावध्यभास्त हि ॥१९॥ अतस्तच्छुक्ल १०६
पक्षस्य चतुर्द्दशदिने सदा । सायं पूताविमेधेनारब्धं तैस्त्राणपर्व्व तत् ॥ २० ॥ प्रोक्ष्य
तस्यासृजा द्वाराण्युष्णं मांसमभुंजत । अरसान्नयुतं शूलाकृतमीशस्मरा निशि ॥ २१ ॥
तथा हि पितरः कृत्वा मिश्र ईशाज्ञया निजान् । ज्येष्ठपुत्रान् वधात्सर्व्वैगुप्तानां पर्य्यमोच
यन् ॥२२॥ तद्द्वारो ह्यीश्वरो दूतो दृष्ट्वा मेषासृगुक्षिताः । ज्येष्ठबालांस्तदन्तःस्थान् नावधी

म्मैश्चकैः सह ॥२३॥ तद्धेतोर्निर्द्दयो राजा यः पूर्व्वाः षड्भयानकाः । विमेने ह्यापदः सोऽतो
वर्गं प्रास्थापयद्भयात् ॥२४॥ तेषां तद्देशनीतानां वर्त्मान्धिं प्रति यत्नतः । एतदाश्चर्य्यं
सर्व्वर्य्यां तेऽस्मरन् पर्व्वकारिणः ॥२५॥ परेऽह्नि कृष्णपक्षादौ सकलाहाग्रिमे स्थिते । तदन्धे
रङ्कुतोत्तारं मग्नांश्चापि द्विषोऽस्मरन् ॥२६॥ आद्यशस्यसमुत्सर्गो नीराजनयुतस्तदा । वेद्यये
करणीयस्तैस्तन्महात्राणलक्ष्मणे ॥२७॥ पर्व्वारम्भात्तु षष्ठाहपर्य्यन्तं पर्व्वणि स्थिते । न रस १०७
स्फीतमन्नं तैर्योग्यं गौधूम्यपिष्टकं ॥२८॥ त्राणायाहात्तु सप्ताहे गते सप्तगुणेऽप्यतः । तत्पंचा
शत्तमेऽह्न्येव महापर्व्व द्वितीयकं ॥२९॥ शस्यपाककृतेः कार्य्यो धन्यवादोऽतिहर्षतः । स्मृति
श्चेश्वरशास्त्रस्य तदा दत्तस्य मोसये ॥३०॥ द्वितीयविषुवात्वादौ पौर्णमास्यां ततोऽपि च ।
अष्टाहेऽन्यन्महापर्व्व तेऽकुर्व्वन् दूष्यवासिनः ॥३१॥ स्मृत्यै तद्भ्रमणस्यायै प्रान्तरेऽरण्यके

पुरा । दीर्घस्य त्यक्तवेश्मानो बहिर्ज्याकारिणो मुदा ॥३२॥ एवं त्रीणि महापर्वाण्याश्रेयं
सकलैर्यदा । तत्समर्थैस्त्रयेलीयैः परमेश्वरमन्दिरं ॥३३॥ तेषां महोपवासस्तु प्राक्तने
दूष्यपर्वणः । षष्ठे ऽह्नि स्थापितो नूनं प्रायश्चित्तदिनाभिधे ॥३४॥ यस्मिन् दम्यमखं कृत्वा
महायज्वा स्वपापतः । अजमेधं तथाघेभ्यो ऽकरोत् सर्वैस्त्रयेलिनां ॥३५॥ आनयत्तद
सृक् सो ऽन्तः पुण्यपुण्यतमे स्थले । सर्वान्याहेष्वप्रवेश्ये ऽस्मिंश्चापि स्वेतरैर्दिने ॥३६॥ संवि १०८
त्पात्रपिधानं चासृजा सिक्त्वा मुहुर्मुहुः । महाजवनिकां भूय उत्तुल्यार्च्यस्थलाद्गतः ॥३७॥
वेदिं दम्याजयोश्चास्ना पुण्यवासे सयूपिकां । सिक्त्वा ततस्तयोर्देहौ वहिरज्वालयत्पुरात् ॥३८॥
द्वितीयाजस्य शीर्षे ऽपि दत्तहस्तः समर्प्य सः । सर्वाघान्यैरयद्वेद्यास्तं त्याज्यं दुर्गमे वने ॥
३९॥ एतन्मासस्य खल्वन्तःस्थिताम्भोविषुवस्य तु । भूरिवर्षेष्विहोर्ज्जस्याश्विनस्य त्वपि

केषुचित् ॥४०॥ दर्शाहे सप्तमस्यैव त्राणपर्वीयमासतः । तूरीपर्वाचरन् दृष्टा धर्मनैर्हीम

कारिणः ॥४१॥ मोस्यादिष्टमिदं सर्वं तत्परे ऽपि तु यच्चिरं । उत्तरे मन्दिरे चापि

स्थापितं पर्व तच्छृणु ॥४२॥ राजपत्न्येस्तराया हि मार्द्दुकायेन बन्धुना । भागपर्वार्पितं

स्मृत्यै मुक्तेर्हिंसार्थिहामनात् ॥४३॥ तत्कालस्त्वन्त्यमासस्य पौर्णमासी यहूदिनां । भूर्यब्दे

ष्विह चैत्रस्य फाल्गुनस्य तु केषुचित् ॥४४॥ किंतु नूतनप्रतिष्ठाख्यं पर्वान्यत् स्थापितं परे । १०९

मक्कावायाभिधैर्वीरैर्भग्नेशारियुगैः किल ॥४५॥ पक्षे नवममासस्य कृष्ण एकादशे ऽहि

तत् । भूर्यब्देष्वत्र पौषस्य केषुचित्सहसो ऽपि तु ॥४६॥ यस्मिन् खल्वत्यपूताया विभुसद्मा

परिष्कृतेः । दुर्यावनकृतायास्ते ऽपनीतिं हर्षतो ऽस्मरन् ॥४७॥ शिष्य उवाच ॥ महाविष्णु

वतः प्राकस्थे प्रतिष्ठाभागपर्वणी । तत्परे च स्थिते त्राणपंचाशदभिधे तथा ॥४८॥ दक्षि

णायण एवं च स्थिते तद्विषुवान्तिके । तूरोदूष्ये ययोर्मध्ये प्रायश्चित्तदिनं महत् ॥४९॥
इति त्वत्तः श्रुतं किंतु मन्दिरागमनं प्रभोः । त्राणकाले यथाप्रोक्तं तथा कथय मे गुरो ॥५०॥
गुरुरुवाच ॥ नररूपः समस्तानि ह्याचचारेश्वरो ऽपि सः । बालो मानुषकार्य्याणीतरवत्कि
ल्बिषं विना ॥५१॥ तस्मात्पितृनियुक्तः स विनीतः शास्त्रपाठकः । धर्म्मासक्तः सभायात्रो
स्निग्धपत्यार्य्यबन्धुकः ॥५२॥ एधितेन्द्रियधीः सो ऽतो द्वादशाब्दवयःस्थितः । पितृभ्यां ११०
सह संतुष्टो यथोक्तं सत्पुरीं गतः ॥५३॥ बहुभिः सहितौ तौ तु नशरेदादिवासिभिः । पर्व्वा
नुष्ठायिभिः पुण्यं समारुरुहतुः पुरं ॥५४॥ पुरे च सर्व्वणः पूर्व्वं मेषं वर्षावरायुषं । अन्यैस्स
हरतां सार्द्धं याज्यं शास्त्रानुसारतः ॥५५॥ तन्मुक्तिस्मरणार्थे ऽपि सर्व्वशाद्यानुमापकः । निः
क्षिप्तो गेहतः सम्यग्गौधुम्यस्फायको रसः ॥५६॥ चतुर्दशदिनस्यान्ते मेध्यमानीय मन्दिरे ।

ऽस्त्रयेल्ये ऽजिरे मेषं सत्सेविव्यूहसंयुतः ॥५७॥ योसेफस्तं हतं तस्यास्ना च यज्वभिरुक्षितां ।
अन्तःस्थां चेदिमीक्षित्वा तच्छरीरं गृहे ऽनयत् ॥५८॥ शुलविद्धं ततस्तं चाखण्डास्थिं व्यभज
न्निशि । न्यस्ताशीः स मरीयायां येष्वि मित्रगणे ऽपि च ॥५९॥ तथा सौऽखाददेवैतद्वि
मुक्तेः स्मरणार्थकं । संविदश्चाद्वितीयेशकृताया मिश्रनिःसृतौ ॥६०॥ श्रेयस्यै यः परे मुक्त्यै
यज्ञे श्रेयस्युपाकृतं । अप्यात्मानं समुत्स्त्रष्टा नित्यसंवित्प्रदायकः ॥६१॥ एवं भव्यं परे किंतु ॥१
तदा सो ऽन्ये ऽखिला इव । अकरोन्मोसिशास्त्रोक्तं प्रभुस्तद्यज्ञभोजनं ॥६२॥ तिक्तशाकयुतं
तत्तु त्राणयुक्ताधिलक्षणं । संपूर्णं स्तोत्रगीत्या च त्राणदातुः परात्मनः ॥६३॥ मन्दिरे प्रति
पद्येते वत्सरादौ यथाविधि । यवाद्युत्सर्गमीशाय चक्रुर्नीराजनान्वितं ॥६४॥ जुहुवुश्चाप्यन्य
मेषेण चूर्णक्षारवृतेन ते । शेषाहेष्वपि चक्रुश्च होमान्मोस्युदितांस्तथा ॥६५॥ पर्वाहेषु

समाप्तेषु योसेफो निजभार्य्यया । गलीलावासिमित्रैश्च सहितौ निर्ययौ पुरात् ॥६६॥ चलन्तौ चोन्तरे मार्गे तत आद्ये ऽह्नि तावति । समं नैवाचलद्येषूरिति तौ नाभिजज्ञतुः ॥६७॥ अदृष्टमपि बालं तु कैरप्यन्यैः सहस्थितं । स्वमित्रैरन्वभवतां महायात्र्यन्तरे तदा ॥६८॥ सायं त्वेकत्र पान्थौघे स्थिते नाप्त्वा सुतं प्रियं । न वा तावत्सृतौ तैस्तं दृष्टं श्रुत्वा कदाचन ॥६९॥ तदा व्याकुलचित्तौ तौ पुनर्यातौ महापुरं । येषूः कुत्रेति पृच्छन्तौ सर्वदापि तु निष्फलं ॥ ११२ ७०॥ त्रिदिनात्तु परे सौम्यमन्दिरे परमात्मनः । यस्मिन्नार्च्चीत्स संतुष्टः पर्वकाले ऽर्य्यबालकः ॥७१॥ तत्र तं वै समासीनं शास्त्रज्ञसदसो ऽन्तरे । प्रापतुस्तौ निशाम्यन्तं तेभ्यः पृच्छन्तमेव च ॥७२॥ ये ये ऽशृण्वंस्तदुक्तीस्तु दृढप्रत्युत्तराणि च । ते सर्वे तन्महाबुद्धे विस्मयं परमं ययुः ॥७३॥ चिरेष्टं त्विह तं दृष्ट्वा तन्माता हर्षविप्लुता । अहतक्षुब्धि

काप्येतद्येषूमभ्यब्रवीद्वचः ॥७४॥ मरीयोवाच ॥ नन्दनेयत्कथं दुःखं त्वमावाभ्यामकारयः ।
अन्विच्छद्भ्यां चिरक्लेशादुन्मनोभ्यां त्वदीक्षणं ॥७५॥ गुरूरुवाच ॥ इत्यूचेऽर्य्यतमा स्त्रीणां
किंतु मृद्वपि भर्त्सनं । तदनर्हो निशम्योच एकः स्त्रीभूषु सोऽनघः ॥७६॥ श्रीयेषूरुवाच ॥
कस्मादन्वैच्छतं किं न स्थेयं मत्पितृसद्मनि । तत्क्रियार्थं मयेत्येव युवां विविदथुर्ध्रुवं ॥
७७॥ गुरूरुवाच ॥ इत्याश्चर्य्यवचः प्रोक्तमीश्वरस्यैकसूनुना । संशृण्वद्भिर्न संबुद्धं न च ११३
मात्रापि धन्यया ॥७८॥ पिता तु तव कोऽस्तीति का वा तस्य क्रिया इति । न तदा को
ऽप्यपृच्छतं बालं विस्मयकारिणं ॥७९॥ तथा यो मन्दिरे पूर्व्वं सर्व्वभूम्युज्ज्वलः स्मृतः । तत्र
पोगण्ड आद्यं स प्रबभौ मन्त्रदोऽद्भुतः ॥८०॥ ततः सार्द्धं पितृभ्यां तु नगरेतं पुनर्गतः । तयो
र्नित्यमधीनोऽभूत्सिद्धः सोऽसिद्धयोरपि ॥८१॥ बहुदर्शी ततो बुद्ध्या वर्द्धमानो दिने दिने ।

ईश्वरान्मानुषेभ्यश्च प्रसादं प्राप शोभनं ॥८२॥ किंतु सर्वमिदं कर्म्म ह्येशरूपस्य लक्षणं ।
दृष्ट्वा धन्या मरीया सा हृदये स्थापयद्दृढं ॥८३॥ आविष्कारं परे भव्यं दावित्सूनोर्महत्तरं । दूतवाक्यानुसारेण प्रत्यैच्छत्सा निरन्तरं ॥८४॥ एतत्कालान्तरे तस्या ममार पतिरेव च । योसेफः स महाभाग्यः सत्प्रभोरपि पालकः ॥८५॥ इति श्रीखृष्टसंगीतायां येषूत्पत्तिपर्व्वणि (मोसिरचितपंचशास्त्रस्य निःसृतिलेख्यानुवाक्यस्कन्धेभ्य एस्तराचरित्रान्मक्काबाय ११५। चरित्राल्लूकरचितमङ्गलसमाचारस्य द्वितीयसर्गात्तदादिभ्यश्चोद्धृतः) प्रभुयात्राकथनं नाम चतुर्दशो ऽध्यायः ॥

गुरुरुवाच ॥ श्रीखृष्टस्य गुरुत्वात्प्राग् यदभूदखिलं वचः । ख्यातं तदनुगैः शिष्य बहु चापि पुरोदितं ॥१॥ तद्योगुस्तमृतेः पूर्वं भूतं किंतु त्रयोदशे । खृष्टशाके तिबर्य्यं स चक्रे

साम्राज्यभागिनं ॥२॥ स द्व्यब्दे तत्परे मग्ने पदस्थस्य तु कैशरः । तिबर्य्यस्याभवत्काले गुरुत्वं सकलं प्रभोः ॥३॥ परे ते तन्मया वाच्यं समाहात्म्यचरित्रकं । चेत्प्रष्टव्यं त्वयान्यत्तु पुरोक्ते ष्वधुनावद ॥४॥ शिष्य उवाच ॥ ज्ञातुमिच्छामि पर्वाणि ख्रीस्त्रयेल्यानि तानि किं । धरन्ति समशास्त्रास्ते लोकाः ख्रिष्टाश्विनस्तथा ॥५॥ गुरुरुवाच ॥ यच्छायामात्ररूपो ऽभूद्यिह्र येलक्रियाचयः । सत्नरः स क्रियासंघः शंसितः ख्रिष्टसेविभिः ॥६॥ चरमं यस्य माहात्म्य ॥५ मृत्युशक्तिविनाशकं । सुसिद्धं सूर्य्यवारे ऽभूत्सर्वसृष्ट्यनुजन्मदं ॥७॥ तस्मान्न सप्तमे ऽह्ने ते विश्रामं ख्रीस्त्रयेलवत् । स्मृत्यै कुर्वन्ति पूर्णायाः सृष्टेर्मुक्तेश्च मिश्रतः ॥८॥ पर्व तु प्रथमे वारे श्रेयोमोचनलक्ष्मणे । कुर्वन्ति प्रतिसप्ताहे नित्यजीवनदीपकं ॥९॥ प्रत्यब्दे पर्वणी चैवा नुष्ठितानां यहूदिभिः । त्राणपंचाशदाख्ये द्वे नेतराण्याचरन्त्यमी ॥१०॥ ते चापि न धृते

स्मृत्यै तन्मिश्रापसृतेर्न वा । तच्छिलाङ्कितशास्त्रस्योये द्रौ दतस्य मोसये ॥११॥ तच्छेयस्या विमुक्तेस्तु नित्यायास्तत्परस्य च । लिखितस्येशशास्त्रस्य नोपलेष्वपि हृत्सु तु ॥१२॥ तन्नव्य कर्म्ममात्रार्थं यिरिमीयोदितं यथा । ते महापर्व्वणी नित्यं खृष्टकालावधि स्मृते ॥१३॥ तयोः स्मृतानि कर्म्माणि पश्चाद्वर्ण्यानि शिष्यते । प्रभोस्तु प्रोक्तकर्म्माणि स्मृतान्यन्येषु पर्व्वसु ॥ १४॥ शिष्य उवाच ॥ एतानि खृष्टपर्व्वाणि स्मृत्यै मत्कृतकर्म्मणां । क्रियन्ते सत्यविश्वासैरपि ॥१६ वर्णय मे गुरो ॥१५॥ गुरुरुवाच ॥ यन्महाविषुवात्पश्चाच्चतुर्थं गणितं दिनं । मार्त्या ख्यादिममासस्य रोम्याणां पंचविंशकं ॥ १६ ॥ तस्मिन् धन्यनमस्कारपर्व्व धर्म्म्यैरनु ष्ठितं । स्मृत्यै शब्दावतारस्य दूतेनाङ्गीकृतस्य हि ॥१७॥ सत्कुमार्य्या मरीयाया यदोक्तं शुभकीर्त्तनं । ईशप्रस्वाः किलोक्ताया मण्डल्या खृष्टसेविनां ॥१८॥ मार्त्ये तु प्रथमे मासे

द्वितीये ऽप्रोलिनाम्नि वा । मृत्युतत्त्राणपर्व्वाङ्का पूर्णिमा विषुवान्तिका ॥१९॥ तत्परे ब्राध

सूर्य्याहो महात्राणाह एव नः । तत्पूर्व्वः शुक्रवारश्च सद्यज्ञार्थोपवासकः ॥२०॥ तृतीये

मायमासे तु चतुर्थे यून्यनाम्नि वा । तच्छ्रेष्ठत्राणसूर्य्याहात्सूर्य्यवारो ऽस्ति सप्तमः ॥२१॥

पंचाशत्पर्व्वसूर्य्याहः स्मृत्यै दत्तस्य तद्दिने । नरहत्स्वोश्वरीयाज्ञालेखितुर्हि सदात्मनः ॥२२॥

नोक्तं तच्छ्रिष्य न तयोर्मध्ये वा श्रेष्ठपर्व्वणोः । स्वर्गारोहणपर्व्वैवानुष्ठितं यद्बृहस्पतौ ॥२३॥ ११७

पश्चाद्वाच्यं तु सर्व्वं तत्किंतु यूल्यस्य तत्परे । चतुर्विंशे ऽह्नि यज्जन्यनमस्कारात्त्रिमासकं ॥२४॥

जन्मपर्व्वास्ति योहन्नेः प्रस्तुतप्रभुपद्धतेः । धर्म्मसूर्य्योदयाङ्कस्यारुणस्येव नृनीतये ॥२५॥ रोम्या

णां षष्ठमासे तु परं औगुस्तनामके । सप्तम्बराष्टोबरयोस्तथा चापि नवम्बरे ॥२६॥ पर्व्वा

णि नाधुना वक्ष्ये क्रियानुक्तत्वहेतुतः । ततस्त्वर्व्वासमामेवारभते ख्रीष्टमण्डली ॥२७॥ स्मृत्वा

दशममासादौ ह्यागतिं स महाप्रभोः । पंचविंशे ऽहि तज्जन्ममहापर्वानुतिष्ठति ॥२८॥
पूर्णेषु नवमासेषु परे धन्यनमस्कृतेः । स कन्याप्रसवो ह्यहि पंचमे ऽकोत्तरायणे ॥२९॥
तन्मासस्याष्टविंशे ऽहि प्रभ्वर्थं तत्समायुषः । हता बालाः स्मृता एवानघमारणपर्वणि ॥३०॥
खृष्टजन्मतृयीयं तद्दिनं किंतु तदष्टमं । यन्वार्य्यमासप्रथमं तत्परिच्छेदपर्व सत् ॥३१॥
भूतं ह्येतद्दिने शास्त्रविनयारम्भणं प्रभोः । पापोच्छेदाङ्क उयश्च पाश्चिमाब्दादिमे किल ॥ ११८
३२॥ तन्मासस्य तु षष्ठे ऽहि खृष्टजन्मत्रयोदशे । अन्यजोपरिखृष्टीयोज्ज्वालपर्वाप्यनुष्ठितं ॥
३३॥ पारसीकबुधैर्ह्यर्च्चा तदा बेथ्लहमे कृता । शिशोः सर्वकुलोद्धर्तुः स्मर्त्तव्या हर्षितः सदा ॥
३४॥ फिबृवार्य्याख्यमासस्यान्त्यस्य प्राक् किंतु सांप्रतं । द्वितीयस्य द्वितीये ऽहि शुद्धिपर्व
विधीयते ॥३५॥ चत्वारिंशत्तमे ह्यस्मिन् जन्माहे ऽभूद्यथोदितं । मातृशुद्धिः प्रतिष्ठा च

शिशोः स्वे मन्दिरे प्रभोः ॥३६॥ इति प्रोक्तो मया शिष्य सत्सेविप्रियपर्व्वणां । संघः प्रभु
महास्तोत्रं यस्मिन् प्रक्रियते सदा ॥३७॥ तेन चापि यथायोग्यं पूरयिष्यामि तेऽधुना ।
येषूत्पत्तिकथां शिष्य त्वच्छ्रोतव्येन सांप्रतं ॥३८॥ इति श्रीखृष्टसंगीतायां येषूत्पत्तिपर्व्वणि
(खृष्टीयपुण्यमण्डलरीतिभ्य उद्धृतो) ऽवतीर्णपर्व्ववर्णनं नाम पंचदशोऽध्यायः ॥

गुरुरुवाच ॥ नमोऽयजायाखिलपिष्टपानामव्यक्तभासोऽशिव ईक्षयित्रे । यः सत्त्वमात्र ॥१॥
स्थित एव लोकांस्तमोऽभिभूतान् कृपयालुलोचे ॥१॥ नमो विभोरद्वयसूनवे ते ब्रह्मस्वरूपाय
जगत्प्रकर्त्रे । पित्राज्ञया यो जगतो विमुक्त्यै बद्धस्य पापैरवतीर्ण आसीः ॥२॥ शब्दस्त्वमे
केश्वरतुल्यभावः पित्रा सहानन्दयुतोऽक्षरात्मा । न त्वस्मदर्थे दययेह नीतोऽवमेनिषे
दुःखितमर्त्यभावं ॥३॥ ईशैकतायां सुत विश्वपित्रा युक्तैकतात्मन्युभयोर्हि संस्थे । नैश्वर्य्य

दीप्तो ऽप्यवमेनिषे त्वं गर्भं प्रवेष्टुं विमलं कुमार्य्याः ॥४॥ दाविञ्छिफासत्कालिकां फलार्हां
नैतां तु वेश्मान्यधरन्त राज्ञां । न रक्षिवर्गाश्च परिस्थितास्तां तव प्रसूं सन्नृप मन्दुरास्थां ॥
५॥ स्वर्गीयसेनादृत उद्भवस्ते न गर्व्वपूर्णैरनुभूत उर्व्यां । न मोहनिद्रागितिकैः स दृष्टो
मोक्षारुणः संपतितो ऽन्तरीक्षात् ॥६॥ कांश्चित्तु रात्रौ परिभासते स्म शुद्धांस्तदा जागरिणो
महौजः । ये दूतदिष्ट्यान्त्यगृहे ऽर्च्चितुं त्वां हृष्टाः समेताः खलु मेषपालाः ॥७॥ न त्वन्य १२०
वृत्तिः समगोपयत्त्वां परिस्थितानां विपदां समूहात् । द्रोष्यन्तमात्मप्रियदेशतो ऽपि क्रूरस्य
राज्ञो ह्यसृगार्द्रखड्गात् ॥८॥ येषूरिति स्वादुतमां प्रलिप्सुस्तां सर्व्वभूतैरभिधां प्रणम्यां । त्वं
मोचको नह्यहिलस्तदर्थे रक्तावृतं शास्त्रनियोज्यचिह्नं ॥९॥ त्वां दूरदेशादुडुनैव नीता
धीराः स्वराजौदयदर्शयित्रा । न ख्यातमापुस्तु महापुरस्थैर्मग्नैरहङ्कारतमस्तरङ्गे ॥१०॥

शास्त्रोपदिष्टान्त्यपुरे ततस्ते त्वां कुन्दरस्वर्णनिषेव्यमापुः । क्षुद्रालयान्तः शयमानमेव धन्या
भिधाया निजमातुरङ्के ॥११॥ अस्मत्सहस्थेश इति प्रशंस्यः प्रतिष्ठितश्चाप्युरुमन्दिरे स्वे ।
नाप्नोस्त्वमर्हो नरराट् कृतं ते ऽर्च्चनं सुगन्धाध्वरनूतियुक्तं ॥१२॥ वृद्धस्त्विहेशेन सुमन्त्रितस्त्वां
विज्ञाय गीत्या शुभया च नुत्वा । निन्दामुदेयां वधिकां त ऊचे शूलायमानां हृदि मातुरेवं ॥
१३॥ आहूत एवापरदेशतस्त्वं प्रेष्ठो विभोरात्मज आर्य्यभूमौ । गुप्तस्तदाप्युत्तरदिङ्निवासी न्य
व्यवर्द्धथाः शुच्यवरोहसंज्ञः ॥ १४ ॥ भीमैस्त्वतः कर्म्मभिरीश्वरत्वं नादर्शयस्तत्र विनीत
भावः । यो योग्यकर्म्माण्यखिलानि कृत्वा शान्तं नरो नृष्वधरः प्रसादं ॥१५॥ मातापितृ
भ्यामभवो नियुक्तस्त्वमात्मजो विश्वपतेः सरूपः । गुरूपदिष्टं सकलं चकर्थ त्वमद्भुतो मन्त्र
ऐश्वरब्दः ॥१६॥ भूम्यादिकानाद्रियथाः समस्तांस्त्वं विश्वनाथो ऽखिलभूतपालः । नियुक्त

आसीरपि राजनीत्या त्वं वै महादण्डधरो ऽक्षदर्शी ॥१७॥ सभामयासीः सकलैस्त्वमर्थी

ऽध्येष्टा नु शास्त्राण्युदितस्त्वमाद्यैः । धर्म्माण्यकार्षीर्विषयो ऽप्यमीषां विधींश्च तेष्वप्यखिले

ष्वपेक्ष्यः ॥१८॥ संवास्यभूरप्यघविप्लुतानामूर्द्ध्वस्थितैः पुण्यतमैर्वृतस्त्वं । संपीडितो दुर्म्म

नसां क्रियाभिस्त्वं सत्त्वमात्रे ऽनुरतश्चिदात्मा ॥१९॥ ततो ऽवतारादतिविस्मितात्ते महाकृपो

त्थात्फलमद्भुतं स्यात् । त्वां स्वर्गभूवासिन एव सर्वे स्तोत्रैरनन्तैः परिशंसितारः ॥२०॥ १२२

यः पुत्रः सह पित्रैको ऽनादिरीशः सदा स्थितः । नमस्तस्मै नमस्तस्मै सर्व्वायोत्पत्तये नमः ॥२१॥

यस्याप्येकत्वयोगो ऽस्ति सदात्मेश्वरनिःसृतः । नमस्तस्मै नमस्तस्मै शब्देशाय नमो नमः ॥२२॥

येन युक्तो ऽखिलां सृष्टिमाक्रमज्जगतां पिता । नमस्तस्मै नमस्तस्मै शक्तेशाय नमो नमः ॥२३॥

यः समस्तजनेभ्यो ऽपि जीवनात्मप्रकाशदः । नमस्तस्मै नमस्तस्मै सच्चिद्बिम्बाय वै नमः ॥२४॥ यः

स्तुतोऽपूर्द्धलोकस्थैरेमे भूवासिभिः सदा । नमस्तस्मै नमस्तस्मै ईशाबुद्धात्मने नमः ॥२५॥ यो
मृत्युपतितेऽप्याद्ये नृणां मोक्ता प्रतिश्रुतः । नमस्तस्मै नमस्तस्मै नमो नूलादमाय हि ॥२६॥ यः
पापदुःखमध्येऽपि नित्यसान्त्वं सुधर्म्मिणां । नमस्तस्मै नमस्तस्मै नागमूर्द्धच्छिदे नमः ॥२७॥
यस्यानुसर्गलक्ष्मासीद्विप्लुवो मलनाशकः । नमस्तस्मै नमस्तस्मै वसुधानुसृजे नमः ॥२८॥
यदर्थे नूतनवंशोऽपि ततोऽभूदादमाद्यथा । नमस्तस्मै नमस्तस्मै युगपित्रे नमो नमः ॥२९॥ १२३
यत्कृतेऽब्रह आहूतः पैतृकं भवनं जहौ । नमस्तस्मै नमस्तस्मै कुलसंनायिने नमः ॥३०॥
यद्बिम्बः संविदो भागीशहक्कः स्थविरात्मजः । नमस्तस्मै नमस्तस्मै प्रतिश्रुतिभुवे नमः ॥
३१॥ यत्प्रतीत्याप तं मृत्योस्त्रातं विश्वासिनां पिता । नमस्तस्मै नमस्तस्मै पुनर्जीववते
नमः ॥३२॥ यद्दृष्टिं प्राप याकोबः संविद्दायार्हकोऽर्थयन् । नमस्तस्मै नमस्तस्मै इस्रयेल

रूवे नमः ॥३३॥ यस्य बिम्बोऽपि योसेफो भ्रात्रस्तो विभुवर्जितः । नमस्तस्मै नमस्तस्मै लब्धा
न्यस्थितये नमः ॥३४॥ यं यहूद्कुलोत्पाद्यं मुमुर्षुस्तत्पिता जगौ । नमस्तस्मै नमस्तस्मै
नित्यराज्याधिकारिणे ॥३५॥ यदर्थमातुलोचे स्वानीश ऐगुप्तपीडितान् । नमस्तस्मै नम
स्तस्मै नमोबद्धमुचे नमः ॥३६॥ यद्दिम्बत्राणकृत्त्रामलो मेष उपाकृतः । नमस्तस्मै नमस्तस्मै
सद्यज्ञबलये नमः ॥३७॥ यन्माहात्म्यस्य लक्ष्माभूदब्धेस्तरणमद्भुतं । नमस्तस्मै नमस्तस्मै १२४
मृत्यब्ध्युत्तारिणे नमः ॥३८॥ येनापि यावनाकाभ्यां सद्वर्गः पालितो मरौ । नमस्तस्मै
नमस्तस्मै सत्याम्नोत्सर्जिने नमः ॥ ३९ ॥ यस्तावल्लैव्यशास्त्रेण प्रतिकृत्येव दर्शितः ।
नमस्तस्मै नमस्तस्मै शास्त्रसिद्धिकृते नमः ॥४०॥ यं प्रोचे शास्त्रदोऽप्यन्ते महीयांसं प्रवा
चकं । नमस्तस्मै नमस्तस्मै मन्त्रदाय नमो नमः ॥४१॥ यन्नामापि मृते मोसी जिगा

योर्वीं प्रतिश्रुतां । नमस्तस्मै नमस्तस्मै येऽध्वेऽरिध्वंसिने नमः ॥४२॥ यत्संकाशोऽपि गिर्वाणो
ऽभूज्जन्मधानिनां युगं । नमस्तस्मै नमस्तस्मै शत्रुदण्डोच्छिदे नमः ॥४३॥ यन्माता भवितुं
कथात्मोर्व्या वेश्महमं गता । नमस्तस्मै नमस्तस्मै ईसिमूलोद्भुवे नमः ॥४४॥ यच्चिह्नाये द्विषां
देवोऽभूतद्भूमौ नृमत्स्यकः । नमस्तस्मै नमस्तस्मै मायाप्रक्षेपिणे नमः ॥४५॥ यद्विम्बोऽरिन्द
मो द्राविद्राजवंशादिमो वृतः । नमस्तस्मै नमस्तस्मै धर्म्माधिपतये नमः ॥४६॥ यत्संवि १२५
त्पात्रमिद्धं प्राक् स्थितिं प्रापार्य्यपर्वते । नमस्तस्मै नमस्तस्मै शीयोनपतये नमः ॥४७॥
यदर्थेऽपि गृहं चक्रे सलोमा कुशलान्वितः । नमस्तस्मै नमस्तस्मै दाविज्ञश्रेयसे नमः ॥४८॥
यस्यापि दशवंशेषु साध्यलीयोऽभवन्महान् । नमस्तस्मै नमस्तस्मै स्वर्लोकारोहिणे नमः ॥४९॥
यस्मिन्दण्डार्थबद्धानामेकाशा सद्यहृदिनां । नमस्तस्मै नमस्तस्मै मुक्तिशृङ्गात्मने नमः ॥५०॥

यस्मै राजोऽन्यजा दग्धं गृहमस्थापयन् पुनः । नमस्तस्मै नमस्तस्मै धूतनाकोर्वये नमः ॥५१॥
यः पुनः स्थापकः सर्वैराज्यस्येष्टोऽघमुक्तिदः । नमस्तस्मै नमस्तस्मै अवरोहात्मने नमः ॥५२॥
यदर्थेऽन्त्या मरीयैव धन्योक्ता सर्ववंशजैः । नमस्तस्मै नमस्तस्मै सत्कुमारीभुवे नमः ॥५३॥
यः सदात्मकृतः कन्यागर्भेऽस्मत्सहितेश्वरः । नमस्तस्मै नमस्तस्मै वतीर्णविभवे नमः ॥५४॥

तस्यावतारस्य फलं प्रशंस्यं तथा मदीयं स करोतु मोक्ता । यन्मात्रहेतोर्वयमर्थयामो दयां १२६
पितुः खल्वघकूपमग्नाः ॥५५॥ तं प्रेष्ठमेकं तनयं दयालो प्रदत्तवान् दुष्टमनुष्यमुक्त्यै ।
नानर्हतां नः सुकृतं तु तस्य संदृश्य शृण्वीश्वर नो विलापं ॥५६॥ सत्या श्रुतो धन्यनमस्कृतौ यः
सोऽभ्येतु नो मुक्तिसुवार्तयैव । सदात्मना स्थापित एव नोऽन्तः स सत्प्रभावीजमिवैत्त
उप्यात् ॥५७॥ यः प्रस्तुताध्वाग्रगजन्मना सोऽस्मास्वे मार्गं परिमृष्टमाप्यात् । हतास्वहंकृत्य

गर्भाटवीषु तत्सच्चिदानन्दनिवारिकासु ॥५८॥ जातः कुमार्य्याः पथिकालये यो देयात्स नो
दर्पहरानुजन्म । यः संसृतावेव तदा प्रविष्टः स तत्र पायादनुचारिणोऽस्मान् ॥५९॥ हता
यदर्थे कुनृपेण बालाः सद्वर्गमध्येऽवतु नः स नित्यं । य एकशुद्धोऽप्यनघान् स चास्मान् क्रियात्
सहिष्णून् मरणान्तमेव ॥६०॥ प्राप्तं परिच्छेदनमेव येन छिनत्तु कामादिमलं स नोऽपि । यो
मोक्तृनामा स जितेन्द्रियान् नः क्रियात्स्वदुःखौघरहस्यशक्त्या ॥६१॥ प्राग्दिग्बुधान् योऽधि १२७
बभौ तदा चांशुभिस्तमो हन्त्वपि सोऽस्मदीयं । अस्मत्सृतिं तं प्रति चापि नीयादस्मत्कृताभ्यर्च्चन
मेव गृह्णात् ॥६२॥ पदे सुवर्णस्य हि सोऽस्मदीयं दीनार्थदानं लभतां प्रसन्नः । देहामलत्वं रसग
न्धकस्य कुन्दोः पदे चार्थनमाददातु ॥६३॥ प्रतिष्ठितोऽपीशगृहे य आर्य्यः सोऽस्मान् प्रतिष्ठा
पयतु स्वपित्रे । शुद्धीकृतं चामलमातृवत् सोऽस्मांस्त्यक्तपापान् नयतूर्द्ध्ववासे ॥६४॥ तथा तदु

त्पत्तिफलं सुसिद्धमाप्त्वा वयं हीनकुकर्म्मदण्डाः । इयत्प्रपन्नं ह्यघकारिमुक्त्यै तं स्वर्गसैन्यैः सह संस्तवाम ॥६५॥ महेश्वरायोर्द्ध्वतमेषु कीर्त्तिः सन्धिः पृथिव्यां सुनृषु प्रसादः । इति प्रगीतं त्रिजगत्सु सर्व्वैर्येषूद्भवादस्तु सदापि भूतैः ॥६६॥ इति श्रीख्रीष्टसंगीतायां येषूत्पत्ति १२६ पर्व्वणीश्वरपुत्रस्तोत्रं नाम षोडशोऽध्यायः ॥ समाप्तं चेदमेकादशोनसहस्रश्लोकात्मकं येषूत्पत्ति नामकं प्रथमं पर्व्व ॥

## अशुद्धसंख्या

| पत्रे | पंक्तौ | अशुद्धं | शुद्धं |
|---|---|---|---|
| ६ | १ | स्योयबन्धु | स्वीयबन्धु |
| २२ | ६ | जित्वैशप्रात्रं | जित्वैशपात्रं |
| २७ | ३ | हावभाग्नी | हावभग्नी |

| पत्रे | पंक्तौ | अशुद्धं | शुद्धं |
|---|---|---|---|
| ८५ | ९ | रौम्यगोपेन | रौम्यगोपेण |
| ११० | ७ | सर्वणः | पर्वणः |

श्रीखृष्टसंगीता

पुत्राभिषेकपर्व

# CHRISTA-SANGÍTÁ,

OR THE

SACRED HISTORY

OF

OUR LORD JESUS CHRIST,

In Sanscrit Verse.

BOOK II.—THE EARLIER MINISTRY.

BISHOP'S COLLEGE, CALCUTTA.
PRINTED BY J. SYKES.
1834.

श्रीपित्रे पुत्रायच सदात्मनेच नमः ॥ शिष्य उवाच ॥ दूराद्यथा प्रक्वणनं निशम्य श्रुतौ निरि
क्तं मधुरं निशायां । पान्थोऽनुरागी स्वसृतिं विहाय तच्छ्रोतुकामः क्रमतोऽभ्युपैति ॥१॥ तथ
हमाचार्य्य निशम्य ते वै येषूद्भवाख्यानमतीवसौम्यं । त्यक्त्वा पुराणान्यखिलान्युपेतस्त
न्मात्रलुब्ध्याल्पविनिश्चयोऽपि ॥२॥ स राजवृक्षस्य समुत्थितो हि कन्यालताकोरक ईश्वरा
त्मा । मयानुभूतो ननु यः प्रफुल्लाद्बहिःसरेत्सत्सुरभिः स आप्तः ॥३॥ तद्बाल्यकालेऽप्युरु
कर्म्मसंघश्चकाश ईषश्चरुणो यथा मे । पश्चादुदेयात्त्वथ धर्म्मसूर्य्याद्भा निःसृता सौम्यतरा न
दृष्टा ॥४॥ या मोहगर्त्ते पतितान्मनुष्यान् प्रतीक्षिता भासयितुं चिरत्नैः । तां साम्प्रतं कौशल
मार्गनीत्यै संद्रष्टुमिच्छामि गुरोऽतियत्नात् ॥५॥ गुरुरुवाच ॥ धर्म्मसूर्य्यायणं तद्वै पापरोगाप
हारकं । प्रारभ्य ख्रृष्टसंस्कारात् कथयिष्यामि तेऽधुना ॥६॥ तद्विद्धि प्रस्तुतं शिष्य जकारी

योदितं यथा । दत्तयोहन्निनाम्नाथ तत्पुत्रेण महात्मना ॥७॥ यं मातुर्गर्भतः पूर्णं भव्यमेव
सदात्मना । अपेयेरामधुं प्रोचे दूतोऽलीयात्मशक्तिकं ॥८॥ स सन्न्यासीव संतस्थौ प्रान्तरे
पालितस्तथा ॥ यावत् त्रिंशत्समायुर्न बभावयसरः प्रभोः ॥९॥ तथेस्रयेलिषु स्थेयमेनं हि
प्रजगौ गुरुं । पुरा चतुःशताब्दात्प्राक् चरमो भव्यवाचिनां ॥१०॥ मलाकीय उवाच ॥
इदं बलानां पतिराह वै स्वभूरहो मदग्रे चरमीरयाम्यहं । ततस्त्वभीष्टो निजमन्दिरेऽपि वः २
प्रभुः समायास्यति संविदीरितः ॥११॥ तदागमाहं तु सहिष्यतीह कः क एव संस्थास्यति
तस्य सम्मुखे । यतः स वै काञ्चनशोधकाग्निवत् स एव च क्षार इव प्रमार्जकः ॥१२॥ स
तत्र लैव्यान् हि पुरोहितान् यदा पविश्यतीशामलहोमपूर्तये । तदा समूह्यः परिधक्ष्यती
ध्मवदधर्म्मकर्तॄनखिलांश्च गर्व्विणः ॥१३॥ मदर्च्चिनः प्रत्युदयिष्यते तु वो धरंश्चिकित्सां

गरुदात्मकांशुभिः । स धर्म्मसूर्य्यो यदुषःप्रभैधिता भवेत वत्सा इव मर्द्दिताधमाः ॥१४॥ अती
व भीमेऽहि मयार्पितेऽखिलं करिष्य एतद्बलनाथ आत्मभूः । ततोऽग्रशास्त्रं स्मरताखिला म
योदितं हि सीनायशिलासु मोसये ॥१५॥ अहो नु नोत्स्यामि तदुग्रकालतः पुरा ह्यलीयं
गुरुमेव वः प्रति । धराघ्नशापस्य निवारणाय यः पितॄन् सुतांश्चैकहृदोऽपि वर्त्तयेत् ॥१६॥
गुरुरुवाच ॥ इत्येष प्रत्नशास्त्रान्तोऽधुना नु नवसंविदः । प्रथमं कृतमाख्यानं तच्चरेणेरि ३
तेन वै ॥१७॥ योऽलीयात्मा पितॄणां हि पुत्राणां चापि योजयन् । हन्दि धर्म्मकृतां मार्ग
आनयद्विधिलङ्घिनः ॥१८॥ इदं सर्व्वं यथा नूत्ने शास्त्रे संलिखितं प्रभोः । भीमागमाहप्रस्तुत्यै
शृणु मे शिष्य यत्नतः ॥१९॥ इति श्रीख्रीष्टसंगीतायां पुत्राभिषेकपर्व्वणि (मलाकीयभव्यवा
क्यानां तृतीयचतुर्थसर्गाभ्यां शान्तमार्कलूकरचितमङ्गलसमाचारयोः प्रथमसर्गाच्चोद्धृतो) दूत
प्रेरणं नाम प्रथमोऽध्यायः ॥

गुरुरुवाच ॥ तिबर्य्यै रोमसम्राजि स्थिते पञ्चदशाब्दिके । तत्कृते च पिलाताख्ये पन्त्यै
गोपे यहूदिनां ॥१॥ अन्तिपाख्ये तु हैरोद्ये गलीलादेशपादपे । तद्भ्रातृष्वन्यपादानामधि
पेषु स्थितेषु च ॥२॥ हन्ने च कायफे चैवाहरोणपदसंस्थयोः । प्रधानयज्वनोर्वर्षे वैक्रमेऽपि
द्व्यशीतिके ॥३॥ तदा प्रान्तरमध्ये वै योहन्नौ जकरीयजे । महात्मन्यागमद्वाक्यं समर्थं
परमात्मनः ॥४॥ यत्पूर्णः सोऽखिलं देशं यर्द्दानिसरिदावृतं । चरन्ननाद पापार्थेऽनुतापाङ्गो ४
दसंस्कृतिं ॥५॥ उष्ट्रलोमाम्बरो ह्येष बद्धचर्म्मकटित्रकः । शलभान् वनमध्वेव भुञ्जानश्च
सनातनं ॥६॥ इति पर्य्यब्रजच्छ्वनथा सर्व्वत्र चाह्वयत् । अनुतापं कुरुध्वं नु स्वर्गराज्यं हि
सन्निधौ ॥७॥ तद्वचोभीतितः सर्व्वे यहूद्याः परिवासिनः । यरीखोनगरादिभ्य आप्रधान
पुरादपि ॥८॥ गुरुं तमभिसंगत्य स्वीकृत्य स्वान्यघानि च । यर्द्दानिसलिले प्रापुस्तत्कराज्जल

सस्कृतिं ॥९॥ तेषां मध्ये तु संदृश्य स फरीष्यमतान् कति । वाह्यधर्म्मनियुक्तान् वै पैत्रशास्त्र
कथादरान् ॥१०॥ शादूक्यधर्म्मिणश्चापि कांश्चिदेतद्विरोधिनः । पाषण्डान् मोस्यधीतान् ये
परलोकं यवादिषुः ।११। एतयोर्म्मतयोर्भक्तान् संदृश्याग्रसरः प्रभोः । स्वसंस्कारार्थिनस्ती
क्ष्णमिदं प्रत्यब्रवीद्वचः ॥१२॥ योहन्निरुवाच ॥ रे सर्पतनया युष्मानागामिन्या रुषः प्रभोः ।
पलायितुमियद्यत्नादिदानीं क उपादिशत् ॥१३॥ अथ यच्चनुतापार्हं विद्यते कर्म्मणां फलं ।
तत्कुरुध्वं न तु ब्रूत वयमब्रहजा इति ॥१४॥ मृषेदं ब्रूथ सत्यं हि शक्यमीशेन वच्मि वः ।
एतेभ्यः प्रस्तरेभ्योऽपि स्रष्टुमेवाब्रहात्मजान् ॥१५॥ साम्प्रतं चापि परशुर्वृक्षमूलेषु संयुतः ।
यो वृक्षो न फलेद्भद्रं छेद्यः क्षेप्यश्च सोऽनले ॥१६॥ गुरुरुवाच ॥ इति भीमवचः श्रुत्वा नराः
सर्व्वे समागताः । किं करिष्यामहेऽथार्य्येऽतिपप्रच्छुर्महागुरुं ॥१७॥ योहन्निरुवाच ॥ भवेतां

यस्य वक्रे द्वे तद्दीनाय ददातु सः । तयोरेकं तथा चैवं करोतु बहुभोज्यकः ॥१८॥ गुरुरु
वाच ॥एताश्च कति संस्कृत्यै करसंग्राहिणोऽधमाः।ज्ञाता यहूदिषूचुःकिं भृत्याः कर्त्तास्म कैश्वरः ॥
१९॥ योहन्निरुवाच ॥ यन्मुद्राग्रहणे कर्म्म रोम्यैर्वः सुनिरूपितं । भ्रातृभ्यस्तत्कुरुध्वं वै न
किञ्चित्त्वधिकं ततः ॥२०॥ गुरुरुवाच ॥ समेतास्त्वपि सैन्या वै जलसंस्कृतये कति । यान्
गलीलाधिपः प्रैरच्छ्वशुरस्य युधेऽन्तिपाः ॥२१॥ हारिथस्यारबेन्द्रस्य ते ततः प्राप्य संश्रयं । ऊचु
र्हेरोद्यभृत्यास्तु किं करिष्यामहे वयं ॥२२॥ योहन्निरुवाच॥ नव लान्न च पैशुन्यात्पीडयेत
कदाचन । भ्रातॄन् नवान्यजान् स्वीयात्संतुष्टाश्च स्त वेतनात् ॥२३॥ गुरुरुवाच ॥ इत्यब्रहोद्भवः
श्रुत्वा नवराज्यप्रवक्तृतः । शान्तधर्म्माज्ञकं वाक्यं नियुक्ता अन्यजैरपि ॥२४ ॥महासंशय
मारुह्य कोऽयं सन्न्यासिवद्गुरुः । धर्म्मी सोऽङ्गीकृतोऽस्मभ्यं ख्रिष्टोऽन्यो वेत्यचिन्तयन् ॥२५॥

६

ततश्चेतांसि सुज्ञाय तेषां स जकरीयजः । अज्ञानोच्छेदनायेति नरसंघं तमब्रवीत् ॥२६॥
योहन्निरुवाच ॥ अहं वो जलमात्रेण संस्करोमि प्रवाचकः । अन्यस्त्वेकः समायाति मत्तो
विक्रमवत्तरः ॥२७॥ आगामी मत्परे सोऽपि मत्पूर्व्वो वै सदा स्थितः । तत्पादूबन्धमप्य
हो न विमोचयितुं ह्यहं ॥२८॥ स वै समस्तपूर्वस्थोऽव्यक्तस्येशस्य दर्शकः । सदात्मनाग्निना
चापि संस्करिष्यति वस्तदा ॥२९॥ शूर्पधारी स वै शस्यं स्वे खले संग्रहीष्यति । तुषं तु ७
वह्निना सम्यगनिर्व्वाणेन धक्ष्यति ॥३०॥ शिष्य उवाच ॥ समूह्यं तत्र संबुध्ये मलाकीयोदितं
गुरो । अधर्म्म्यदाहिनं भक्तान् पुनन्तं तु सुवर्णवत् ॥३१॥ यं महाप्रभुणा धार्य्यं प्रस्ताव्यं
तच्चरेण च । अलीयेनेति स प्रोचे तथा चाहाप्यसौ चरः ॥३२॥ प्रभ्वागमाह उग्रस्तु कथं
पश्चाद्बभूव सः । गुरो त्वत्तो मया श्राव्यं सन्देहजनकं हि तत् ॥३३॥ पृच्छामि त्वधुना किं

य आरूढोऽभूज्ज्वलद्रथे । अलीयः स पुनर्जातो योहन्निर्ज्ञकरीयजः ॥३४॥ गुरुरुवाच ॥
पुनर्जन्मवचो यद्वै विप्रैर्वेदेषु कल्पितं । तन्मा बुध्यस्व शिष्यात्र खृष्टीये वचसि स्थितं ॥३५॥
नैकत्वं हि तयोर्ज्ञेयं यथा ज्ञातं फरीष्यकैः । मलाकीयस्य तद्वाक्यात्सौसादृश्यं तु केवलं ॥३६॥
यथाभूद्धि महालीयः पुरा प्रान्तरवास्यसौ । ईशसाक्ष्यपवादीचाभयो बेलार्च्चिनां सदा ॥३७॥
तथा सोऽलीसबापुत्रो बलवानीश्वराग्रगः । अलीयस्यात्मशक्त्याप्तो जातस्येव पुनर्भुवि ॥ ८
३८॥ तथैवास्य हि पित्रेऽपि शीलं दूतेन चोदितं । योऽधुना प्रान्तरे धर्म्मं मन्दमार्गान
शिक्षयत् ॥३९॥ यं चापि प्राङ्मलाकीयाङ्ग्वालःस्पृष्टः प्रवाचकः । खृष्टागमवचोमध्ये
वर्णयद्वै तथा स्फुटं ॥४०॥ ईषाय उवाच ॥ ध्वनिः प्रान्तरे घोषतः संश्रुतो वै स्वयम्भूकृतेऽहो
सृतिं प्रस्तुयात । महारण्यमध्येऽपि सिद्धं कुरुध्वमृजुं चैव मोक्त्रे न ईशाय मार्गं ॥४१॥ तदये

॰खिलोपत्यका उत्पतन्तु महीध्राः सपादाः पतन्त्वेव भूमौ । अथ जूयतां कुञ्चितं वर्त्म सर्व्वं
सुगम्याः स्युरेवाखिलाः शर्कराश्च ॥४२॥ ततस्तेज ईशस्य दिष्टं विमुक्त्यै सकृद्द्रक्ष्यतीतो
नराणां समूहः । यतो वाक्यमेतद्विनिर्णीतमार्य्यं स्वभूनामधेयस्य वक्त्रेण प्रोक्तं ॥४३॥ गुरुरु
वाच ॥ इत्यूचे भव्यवाच्ययः किन्तु तेजस्तदैश्वरं । प्रादुर्भूतं कथं शिष्य वर्णनीयं
मयाधुना ॥४४॥ सन्देहजनकं तत्तु परीक्षाकरणं प्रभोः । येनाग्निनेव सद्भक्तान् पुनात्य ९
र्च्चनपूर्त्तये ॥४५॥ भिनत्त्यधर्म्मिणस्त्वेभ्यः परिदह्यांस्तथेध्मवत् । सकृन्न भुत्स्यसे शिष्य खृष्टस्य
प्रथमायनात् ॥४६॥ तच्चरित्रात्समस्तात्तु तथा तत्कार्य्यसंघतः । शूर्पपावकदृष्टान्तौ विनिर्णी
तौ भविष्यतः ॥४७॥ अधुनैतत्तु बुध्यस्वाग्रसरस्य ध्वनेः स्फुटं । अनुतापं विना घोरा मोक्तुर
प्यागतिः प्रभोः ॥४८॥ इति श्रीखृष्टसंगीतायां पुत्राभिषेकपर्व्वणि (इषायभव्यवाक्यानां चत्वा

रिंशसर्गाच्छान्तमत्थायल्कयोस्तृतीयसर्गाच्छान्तमार्कयोहन्न्योः प्रथमसर्गात्प्लाययोसेफरचिता द्यहूदिपुरातनप्रबन्धाच्चोद्धृतः) प्रान्तरघोषणं नाम द्वितीयोऽध्यायः ॥

गुरुरुवाच ॥ श्रीयेषूर्नाम मोक्ताथ त्रिंशदायुस्तदा स्थितः । धन्यां त्यक्त्वा मरीयां वै नशरेतो विनिर्गतः ॥१॥ यर्द्दानिनिकटां भूमिं शरारण्यावृतां ययौ । बन्धोश्चिरमदृष्टस्य संलिप्सुर्जलसंस्कृतिं ॥२॥ आयातं तं तु संदृश्य भद्रस्तस्याग्रगस्तदा । निषेद्धुमभिलाषीदं वचोऽवादीत्समादरं ॥३॥ योहन्निरुवाच ॥ भवतो वै मया योग्यं संलब्धुं जलसंस्कृतिं । आगत्य त्वं कथं शुद्धै मत्तस्तां प्राप्तुमर्हसि ॥४॥ श्रीयेषूरुवाच ॥ साम्प्रतं तत्तथैवास्तु यतो रीत्यामुयापि वै । पूरणीयमितोऽस्माभिः समस्तं धर्म्ममण्डलं ॥५॥ गुरुरुवाच ॥ तच्छ्रुत्वाग्रसरो वाक्यं विरत्याथ निषेधनात् । स्नानेन संस्करोति स्म बन्धुं निर्मलमप्यमुं ॥६॥ यं शीला

दनुमित्यादाविदानीमैशलक्षणात् । निश्चिचाय स्वप्रोक्तं तं पूर्वं विक्रमवत्तरं ॥७॥ यद्दानि
सलिलाञ्चेव पुनरायाति संस्कृते । येष्वि प्रार्थयमाने च विभिन्नमिव खं बभौ ॥८॥ ईश्व
रात्मापि तन्मूर्द्ध्नि संपपात कपोतवत् । आकाशवाण्यपि व्यक्ता तदुपर्य्येतदब्रवीत् ॥९॥
श्रीस्वयम्भूरुवाच॥ पुत्रोऽयं मेऽतीवप्रोतः । यस्मिन् सम्यक् सन्तुष्टोऽहं ॥१०॥ गुरुरुवाच॥
इति साक्ष्यं परं प्राप्य पितुर्वै पुत्र ऐश्वरः । सदात्मनस्तथैवैनं समाच्छादयतश्छदैः ॥११॥ ११
योऽहन्निना स निर्णीतोऽभिषिक्तःख्रृष्ट इत्यतः । स्वश्रद्धेभ्यस्तथा दायी यः सदात्माग्निसंस्कृतिं ॥
१२॥ ईशपुत्रांश्च तच्छक्त्या तांस्तथैव करिष्यति । अनुजातान् न मर्त्यानामिच्छा किन्तु परा
त्मनः ॥१३॥ तत्कार्य्यं विद्धि शब्दस्यावतीर्णस्य नरान्तरे । वसतश्च नरो योऽपि ख्यातोऽ
स्माभिः सहेश्वरः ॥१४॥ यच्छिष्याः संस्कृताः सर्वेऽनुग्राहिण्या तदाज्ञया । ऐशनामत्रये

ऽभिन्ने पितृपुत्रसदात्मनां ॥१५॥ पश्चात्त्वेतद्वचो भव्यं किन्तु यत्साम्प्रतं स्फुटं । खृष्टसंस्कार
वाक्याद्वै बोध्यं तच्छिष्य वच्मि ते ॥१६॥ नृणामेकेन खृष्टेन सम्यक्तुष्टः पितेश्वरः । तस्मा
दात्मजमात्रेणाथान्विच्छानुग्रहं पितुः ॥१७॥ शास्त्रं हि मोसिना दत्तं दोषकृद्भ्यो भयानकं ।
अनुग्रहस्तु सत्यं च येषूखृष्टेन संस्थितं ॥१८॥ अयत्नमीश्वरं मर्त्यो न ददर्श कदाचन ।
तदङ्कस्थोऽद्वितीयस्तु पुत्रस्तं दिशति स्फुटं ॥१९॥ इति श्रीखृष्टसंगीतायां पुत्राभिषेकपर्वणि १२
(शान्तमत्थायस्य तृतीयचरमसर्गाभ्यां शान्तमार्कयोहन्न्योः प्रथमसर्गाच्छान्तलूकस्य तृतीयसर्गा
च्चोद्धृतः) ऐश्वरसंस्कारो नाम तृतीयोऽध्यायः ॥

गुरुरुवाच ॥ समाप्तेऽथ स्वसंस्कारे येषूर्यद्दानितीरतः । प्रान्तरेऽगात्परीक्षायै स्वबलस्या
घसंजितः ॥१॥ तत्रानयत्सदात्मा हि तं द्वितीयादमं वरं । परीक्ष्यं द्वेषिणा तेन येनाद्योऽघे

प्रवर्त्तितः ॥२॥ तत्रैकाकी स्थितो वै सोऽमलो व्याप्तः सदात्मना । मोऽस्यलोयाविवोपोष्य
चत्वारिंशद्दिनेष्वतः ॥३॥ आरण्यपशुभिः सार्द्धमियत्कालं स संस्थितः । तेभ्यो हिंस्रतरस्यापि
सेह आक्रमणं द्विषः ॥४॥ शिष्य उवाच ॥ स द्वेषी को गुरो येनाकृष्टोऽघे प्रथमो नरः । यस्य
चाक्रमणात्सेहे द्वितीयः स परीक्षणं ॥५॥ गुरुरुवाच ॥ तं शिष्य स्मर पूर्व्वोक्तं द्वेषिणं यस्य
मन्त्रणात् । पापे मग्नौ नृणामाद्यावैशं तत्प्रापतुर्व्वचः ॥६॥ सपत्न्या अधुना नार्य्या दण्डि १३
ताया मया सुतः । पार्ष्णिघातोऽपि नागेन तन्मूर्द्धानं हनिष्यति ॥७॥ तं तदा नागरूपस्थं
विद्धि भूतासुराधिपं । स्वसत्त्वरहितं गर्व्वाद्दूतमीशरिपूकृतं ॥८॥ यः सह स्वानुगैर्दूतैस्ततो-
रिः सर्व्वदा नृणां । लोभिनां कर्षकः पापे भद्राणां चाभिशापकः ॥९॥ ततः साटान आब्रह्यै
र्य्यबलो यवनैस्तथा । अभिशापोति च ख्यातो द्विट् सोऽयोबादिधर्म्मिणां ॥१०॥ तस्य राज्यं

महत् ख्याततनारीपुत्रायणावधि । भ्रान्तिधूर्त्तत्वहिंसाद्यैः सर्व्वस्यां स्थापितं भुवि ॥११॥ सोऽधुना
संस्कृतं ज्ञात्वा साक्षितं चेश्वरेण तं । प्रियपुत्रं ततोऽपि स्वमुर्द्धध्नीभयमन्वभूत् ॥१२॥ तन्नीत्या
प्रान्तरे गत्वा येषूं दीर्घोपवासतः । क्षुधोदन्यापरिक्लान्तमभ्यवादीत्परीक्षकः ॥१३। अभिशा
प्युवाच॥ चेदीशस्य मरुभ्रान्तव्यूहपोष्टुः सुतो भवेः । स्वाज्ञयैतदृशन्नस्त्वं तदान्नं कर्त्तुमर्हसि ॥
१४॥ श्रीयेषूरुवाच॥ नार्हामि लिखितं ह्येतदीशशास्त्रे स्मराम्यहं ।तेषामेवोपदेशाय मरुभ्रान्तैस्त्र १४
येलिनां ॥१५॥ दृश्यान्नभोजनत एव नरो न जीवेत् किंत्वीश्वरस्य वदनोत्थितसर्व्ववाक्यात् ।
इत्यब्दविंशयुगलभ्रमणैः परात्माज्ञातान्नसंवितरणेन च वो ग्नन्ति ॥१६॥गुरुरुवाच॥ ईति मौस्यं
वचः श्रुत्वा येषूक्तमभिशापकः ।शठत्वोच्छेदतो ह्रीणो भग्नाशश्चाभवन्ततः ॥१७॥ न हि तस्योत्तरा
ज्ज्ञातं स ईशस्य सुतो न वा । न चेश्वरवचःश्रद्धा तस्यातिक्षुधया जिता ॥१८॥ ततःसोऽचिन्तय

न्नैनं शक्नोम्यादिमसृष्टवत् । कामेन वञ्चितुं किंतु परीक्षिष्येऽथ लिप्सया ॥१९॥ तस्मादेनं महा
त्मानं नीत्वोर्द्ध्वेऽद्रावकल्पयत् । निमिषे संचितमिव सैश्वर्य्यं राज्यमण्डलं ॥२०॥ प्रत्यग्दि
श्यैश्वरीं रोमां दक्षिणोत्तरयोस्तथा । तत्साम्राज्यं ततं सौम्यमैगुप्तयवनादिजित् ॥ २१ ॥
प्राच्यां तु परदानां वै वीराणां राज्यमुच्छ्रितं । दूरं चाग्न्यां तटे गाङ्गे काण्वराज्यं सुहेमकं ॥
२२॥ तदाद्यं सर्व्वमूर्द्ध्वेऽद्रावादर्श इव स प्रभुं । दर्शयित्वा ततो गर्व्वादिदमभ्यब्रवीद्वचः ॥ १५
२३॥ अभिशाप्युवाच ॥ सर्व्वं मेऽस्तीदमैश्वर्य्यं तथा यं यं वृणोऽप्यहं । तस्मै देयमतश्चेन्मां प्रणमे
स्तेऽखिलं भवेत् ॥२४॥ श्रीयेषूरुवाच ॥ रेऽभिशापिन् वहिर्याहीशशास्त्रे लिखितं यतः । स्वभूसं
ज्ञेशमात्रं त्वं प्रणमेरर्च्चयेश्च वै ॥२५॥ गुरुरुवाच ॥ इत्येतन्मौस्यवाक्येन पुनर्दूरीकृतः शठः ।
अजेयं कामलोभाभ्यामवेद्येषूं समन्ततः ॥२६॥ किंतु पूर्व्वमहं येन तमोगर्त्ते निपातितः ।

आत्मगौवरदर्पेण परीक्षिष्येऽधुनापि तं ॥२७॥ इति संकल्प्य हिंस्रस्तं नीत्वा पुण्यपुरे
ततः । महामन्दिरचूडानामेकस्यामार्पयच्छुचिं ॥२८॥ दर्शयित्वा ततोऽप्येनं विविधैशगृहा
जिरं । पुरोधोऽचेकसंपूर्णं तदा धूर्त्तोऽब्रवीदिदं ॥२९॥ अभिशाप्युवाच ॥ चेत्त्वमीश्वरपुत्रः
स्या निजमन्दिर आगतः । ततः पितृवचःश्रद्धां दर्शयादर्य्यलक्ष्मणां ॥३०॥ अविश्वासं वि
हायार्य्य प्रस्कन्दस्वामुतोऽप्यधः । स्मरन् यत्ते पिता दाविदीशभक्तः पुरा जगौ ॥३१॥ १६
ईशाश्रयाप्तं न विपत्स्पृशेत्त्वां कार्य्या हि ते रक्षिण ईशदूताः । यद्गोरहस्तैः सुधृतः सदा
त्वमतो भवेर्नापि शिलाहताङ्घ्रिः ॥३२॥ गुरुरुवाच ॥ इति वाक्याद्दुरात्मा स पुण्य
ग्रन्थेऽपि संस्थितात् । गर्व्वोन्मादौ प्रमित्सुर्वै प्रापेतत्स्पष्टमुत्तरं ॥३३॥ श्रोयेषूरुवाच ॥ न
करिष्यामि लिखितं यस्माद्वै शास्त्र ऐश्वरे । मृषा स्वभुव ईशस्य मागच्छेस्त्वं परीक्षणं ॥३४॥

गुरुरुवाच॥ श्रुत्वेत्थं त्रितयं मौस्यं पापसंरोधकं वचः । तेन नारीमुतेनैव प्रोदितं संशया
द्विना ॥३५॥ ततस्तममलं ज्ञात्वा यथा नैकोऽप्यभून्नृणां । कामलोभाभिमानं च संक्षुभ्यन्तं
रिपुत्रयं ॥३६॥ भग्नाशः सर्व्वतोऽपश्यदादिसृष्टस्य यं जयं । पुराप प्रतिविक्षेप्यं द्वितोयेनाद
मेन तं ॥३७॥ तस्मात्तर्हि शठः शुद्धं विहायासूयकः प्रभुं । स्वानुगैरचिरात् क्षेतुं दुर्नृभिः
समकल्पयत् ॥३८॥ नत्ववेत्स विमूढोऽस्माद्धिंसासंकल्पनात्स्वकात् । पार्ष्णिमात्रं प्रभोर्घात्यं १७
स्वं शिरस्तु सशक्तिकं ॥३९॥ प्रान्तरे तु ततस्त्यक्त ईश्वरस्य सुतोऽमलः । हते संकल्पनादर्शे
तत्परीक्षात्रये दृढे ॥४०॥ स्वर्गदूतैस्ततो भक्त्या सेवितोऽभून्महात्मकः । यावद्यर्द्दानितीरे न
योहन्निं प्रत्यगात्पुनः ॥४१॥ इति श्रीखृष्टसंगीतायां पुत्राभिषेकपर्व्वणि (मोसिरचितपत्र
शास्त्रे यो॰ नःसृत्यनुवाक्यस्कन्धेभ्योऽनुवाक्यस्कन्धस्य तु षष्ठाष्टमसर्गाभ्यां राजचरित्रादयोबत्र

न्थाद्द्वाविङ्शोनानामेकनवतितमाच्छ्लान्तमत्थायलूकयोश्चतुर्थसर्गाच्छ्लान्तमार्कस्य प्रथमसर्गाच्चोद्धृतः)

परोक्षकपराजयो नाम चतुर्थोऽध्यायः ॥

गुरुरुवाच ॥ एतस्मिन् समये कीर्त्तिः स्नापकस्य महागुरोः । यिरूषलेममध्येऽपि विस्तृता श्रेष्ठसंसदि ॥१॥ संशयोच्छेदनार्थं ते ततो लेव्यान् सयज्वनः । फरीशाचारिणः प्रैरन् सुस्नानादिविधायिनः ॥२॥ तेऽभिसंगत्य यर्द्दानिं तीर्त्वाचापि पिरायके । देशे यस्यान्तिपाः सो १८
ऽभूत्सगलीलस्य पादपः ॥३॥ तत्तटे संस्थितं प्राप्य योहन्निं तं महागुरुं । स्थाने बेथावरे लोकान् संस्कुर्वन्तं तथाब्रुवन् ॥४॥ लेव्या ऊचुः ॥ भवतः प्रष्टुमिच्छामः सन्न्यासिन् धर्म्मशिक्षक । किं खृष्टोऽसि किमन्यो वा प्रधानैः प्रेरिता वयं ॥५॥ गुरुरुवाच ॥ इति श्रुत्वा तु योहन्निर्न खृष्टोऽस्मीति तान् स्फुटं । प्रत्यवादीत्ततस्त्वेव स तैः पृष्ट इदं पुनः ॥६॥ लेव्या ऊचुः ॥ तदा त्वं

किमलीयोऽसि नोद्यं खृष्टागतेः पुरा । यं प्रतीक्षामहे सर्वैर्धीतग्रन्था यहूदिनः ॥७॥ गुरुरुवाच॥
तत्परेऽपि स योहन्निर्नीलोयोऽहं पुरातनः । पुनरेत इति प्रोच्य तैस्तृतीयमपृच्छ्यत ॥८॥
लैया ऊचुः ॥ तदा त्वं किं प्रवक्तासौ महतोक्तोऽपि मोसिना । सर्वैः श्राव्यो भविष्यंश्च तस्मादेव
महत्तरः ॥९॥ गुरुरुवाच ॥ तत्पश्चादपि योहन्नौ नास्मीत्युक्तवति स्फुटं । महासंशयमारुह्य
ते तमभ्यब्रुवन्निदं ॥१०॥ लैया ऊचुः ॥ तदा कस्त्वं गुरो तद्धि योग्यमस्माभिरीरितैः । १९
मुनिश्चेतुं प्रकाशाय प्रधानानां यहूदिनां ॥११॥ योहन्निरुवाच ॥ ध्वनिः प्रान्तर एकस्य
घोषतो यः प्रवाचिना । इषायेनोच्यते तं नु वित्त यूयं रवं मम ॥१२॥ लैया ऊचुः ॥ यदि
त्वं न भवेः खृष्टो नालीयो वा तदग्रगः । पुनरेतो भुवि न वा प्रवाच्येष महत्तरः ॥१३॥
संस्करोषि कथं स्नानाद्यत्फरीशमतैर्बुधैः । ज्ञेयं वै नवशास्त्रस्य सर्वैः श्राव्यस्य लक्षणं ॥१४॥

योहन्निरुवाच ॥ संस्करोमि जलस्नानादहं किंत्वन्तरेऽपि वः । स्थितोऽन्यो यमिदानीं वै यूयं न विविदा बुधाः ॥१५॥ आगामी मत्परे योऽपि मत्तो विक्रमवत्तरः । यत्पादूबन्धमप्यहो न विमोचयितुं ह्यहं ॥१६॥ गुरुरुवाच ॥ इति वैथावरेऽसौ वै येषूखृष्टेऽप्युपस्थिते । फरीषानब्रवीदेतान् शास्त्राध्यातृनबोधिनः ॥१७॥ तत्परस्मिन् दिनेऽतस्तु स आगच्छन्तमन्तिके । येष्वं दृष्ट्वाब्रवील्लोकांस्तथा सर्वानुपस्थितान् ॥१८॥ योहन्निरुवाच ॥ अहो जगत्पापहरोऽमलोऽयमीशार्पितो यज्ञकृतेऽविवत्सः । आगामिनं यं किल मत्परेऽपि मत्पूर्वसंस्थं सततं ह्यवोचं ॥१९॥ नत्वाद्रितस्तं स्वनुभूय मुक्त्यै हितं नृणामित्यधुना ब्रवीमि । किंत्वैस्त्रयेलानुपदेष्टुमेनं संस्कारकोऽद्भिः खलु प्रेरितोऽहं ॥२०॥ अस्य संपतितं मूर्ध्नि समपश्यं कपोतवत् । स्वनेत्राभ्यां सदात्मानं तत्र चैव मुतं स्थितं ॥२१॥ न चाहं स्वानुभूतेस्तं तदाज्ञानं विमुक्तिदं ।

किंतु नुन्नवतो मां वै परमेशस्य वाक्यतः ॥२२॥ यस्मिन् मनुष्ये पतितं समीक्ष्य स आत्मा
नमेशं तदुपर्य्यपि स्थितं । ज्ञेयस्त्वयातोऽस्त्ययमेव स स्वकान् यः संस्करिष्यत्यखिलान् सदा
त्मना ॥२३॥ इति पूर्व्वोपदेशेन विनीतोऽहं स्मृतेन वै । सत्यमीशस्य तं पुत्रं प्रत्यायं लक्ष्म
दृष्टवान्॥२४॥ गुरुरुवाच ॥ एतस्मात्तु महासाक्ष्यात्परस्मिन्नपि वासरे । संस्थितस्तत्र योह
न्निर्वृतः शिष्यद्वयेन ह ॥२५॥ येषूं दृष्ट्वा चलन्तं तौ प्रसन्नोऽभ्यब्रवीद्वचः । अहो ‘विवत्स’ २१
ईशेनार्पितः पापहरोऽमलः ॥२६॥ इत्याचार्य्यस्य तौ श्रुत्वा ख्रीष्टसंदेशकं वचः । तं हित्वानु
गतौ नूत्नं गुरुं विक्रमवत्तरं ॥२७॥ तयोरेकोऽन्द्रियो नाम सीमोनस्य सहोदरः । द्वितीयस्तु
स योहन्निः शान्तात्मा जिबिदीयजः ॥२८॥ तौ तदानुगतौ येषूं मध्याह्ने निकटे सति ।
आलयं तव कुत्रास्ति गुर इत्यभ्यवोचतां ॥२९॥ एतद्वचनमाकर्ण्य समालोक्य च तौ प्रभुः ।

प्रत्युवाचालयं मे नु युवामभ्येत्य पश्यत ॥३०॥ तदनुग्रहमाप्त्वातो गतौ तौ प्रभुवेश्मनि ।
तेन सार्द्धं महाहर्षात्सर्वं शेषदिनं स्थितौ ॥३१॥ अन्द्रियस्तु ततोऽन्विष्य सीमोनं स्वस
होदरं । अभ्यूचेऽस्माभिरत्राप्तोऽभिषिक्तोऽसौ महानिति ॥३२॥ तथा ख्रीष्टान्तिके भ्रात्रा
नीतो हृष्टमना अयं । अथ शुश्राव तत्प्रोक्तं वच एतद्रहस्यकं ॥३३॥ श्रीयेषूरुवाच ॥ विद्यसे
त्वं नु सीमोनो योनस्य तनयाधुना । पश्चात्कैफाभिधस्तु स्या यदर्थः प्रस्तरः स्थिरः ॥३४॥ २२
गुरुरुवाच ॥ परेद्यवि ततो येषुर्गलीलां गन्तुमिच्छुकः । दृष्ट्वा कंचित् फिलिप्पाख्यं मा
मन्वेहीत्यवोचत ॥३५॥ यो गलीलाप्रदेशस्य वेथ्शैदाभिधात्पुरात् । अन्द्रियप्रस्तराभ्यां
वै न्युषितान्निःसृतोऽभवत् ॥३६॥ स ततो नथनैलं तु मित्रमासाद्य हर्षतः । अपि वार्थुलु
मायाख्यमेतदभ्यब्रवीद्वचः ॥३७॥ फिलिप्प उवाच ॥ य उक्तो मोसिना शास्त्रे प्रवाच्युक्तश्च

सोऽधुना । प्राप्तो योसेफजो येषूर्निःसृतो नशरेत्पुरात् ॥३८॥ नथनैल उवाच ॥ अथ वै
भद्रमायातुं किंचिच्छक्नोति मत्प्रिय । फिलिप्प नशरेतोऽस्मात्प्रधानानुषितात्पुरात् ॥३९॥
गुरुरुवाच ॥ तथा प्रोक्तः फिलिप्पः स एत्य पश्येति केवलं । प्रत्युच्य नथनैलं तं येषूसंमुख
मानयत् ॥४०॥ यं दृष्ट्वाथ समायान्तं प्रभुरेतदवोचत । विनिर्णीतैस्त्रयेल्योऽयं रहितोपधि
मानसः ॥४१॥ तच्छ्रुत्वा नथनैलस्तु मां भवान् कथमन्वभूत् । इति पृष्ट्वाथ ख्रीष्टस्य संमुश्रा २३
वेदमुत्तरं ॥४२॥ श्रीयेषूरुवाच ॥ फिलिप्पाह्वयनात्पूर्वमपि वै पर्कटीतले । आसीनं त्वामहं
दूरादपश्यं स्थिरनिश्चयं ॥४३॥ गुरुरुवाच ॥ तद्वाक्याद्विस्मयं प्राप्य शरलः सोऽनदत्तदा ।
गुरो त्वं पुत्र ईशस्य त्वं राजैवेस्त्रयेलिनां ॥४४॥ इदं प्रत्ययवाक्यं तु लब्ध्वासौ सर्ववित्प्रभुः ।
तथा बार्थुलमायं तं शेषांश्चाप्यभ्यवोचत ॥४५॥ श्रीयेषूरुवाच ॥ प्रत्येष्यथ मया दृष्टो यतस्त्वं

पर्कटीतले । महत्तराणि किंत्वेभ्यः कर्म्माणीक्षिष्यसे परे ॥४६॥ निश्चयं हि विभिन्नं खं दूतांश्च द्रक्ष्यथैश्वरान् । रोहतः पततश्चैव नरसूनोर्ममोपरि ॥४७॥ गुरूरुवाच ॥ इत्येष नरपुत्राख्योऽवतीर्णः शब्द ईश्वरः । परे भाव्याद्भुतान्येव गुप्तवाक्यैरवर्णयत् ॥४८॥ गलीलां तु तदा यत्र स्वमिषायोदितं यथा । प्रकाशं दर्शयेत्पूर्व्वं तां शिष्यैरन्वितो ययौ ॥४९॥ इति श्रीखृष्टसंगीतायां पुत्राभिषेकपर्व्वणि (शान्तयोहन्निरचितमङ्गलसमाचारस्य प्रथमसर्गा २४ दुद्धृतः) प्रभुसाक्ष्यसंवादो नाम पञ्चमोऽध्यायः॥

शिष्य उवाच ॥ गलीलायां कथं त्वैशं तदादर्शयदन्तके । भ्रमद्भ्यो मोहगर्तेऽथ प्रकाशं स नरात्मजः ॥१॥ गुरूरुवाच ॥ ज्वालस्पृष्टस्य वाक्यं ते स्मरते भव्यवाचिनः । इदानीं कथयिष्यामि तत्प्रादुर्भावमग्रिमं ॥२॥ येष्वायातेस्तृतीयेऽहि गालील्ये नगरे तदा । कनानाम्न्येव

कस्मिंश्चिन्नशरेत्पुरसन्निधौ ॥३॥ अभवत्कस्यचिद्गेहे महान् पाणिग्रहोत्सवः । मरीया यत्र
येषूश्च तच्छिष्याश्च निमन्त्रिताः ॥ ४ ॥ बहुभोजनपश्चात्तु हसतीह सुरारसे । येषूमभ्यब्र
वीन्माता नैतेषां वर्त्तते सुरा ॥५॥ इदं मातुः स धन्यायास्तन्माहात्म्यप्रकाशनं । तत्क्षणेऽपि
प्रतीच्छन्त्या निशम्य प्रत्युवाच तां ॥ ६ ॥ श्रीयेषूरुवाच ॥ मातः किं वै त्वया सार्द्धं कार्य्येऽस्मि
न्वर्त्तते मम । न हि सांप्रतमायातं विद्धि मे समयं हितं ॥७॥ गुरूरुवाच ॥ इतो भव्यं मह २५
त्कर्मानुमाय जननी तदा । दासान्प्रोवाच यद्यद्वोऽयं दिशेत्कुरुताशु तत् ॥८॥ स्थितास्तु
संमुखे तेषां पंचद्रोणमिता इव । षट्संख्या अश्मकलशाः शुद्धीकृत्यै यहूदिनां ॥९॥ अथ तान्
वारिणा येषूः संपूरयितुमादिशत् । तस्मिंश्चाचरिते दासैः स तदाज्ञापयत्पुनः ॥१०॥ श्रीये
षूरुवाच ॥ एतेभ्यः परिपूर्णेभ्यः कलशेभ्योऽधुना द्रवं । निःसार्य्यानयत क्षिप्रं यूयमध्यक्षसंमुखे

॥११॥ गुरुरुवाच ॥ ततो निःसारयन्तस्ते दासा यत्कलशोदरे । आसीद्वारि तदापुस्ते वि
कृतस्वादवर्णकं ॥१२॥ तं सुरीकृतमप्याशु नीत्वाध्यक्षं प्रति द्रवं । जानन्तस्तदजानन्तं सर्व
साक्षादपाययन् ॥१३॥ तद्रसं तर्ह्यसौ स्वादु ज्ञात्वाध्यक्षोऽतिविस्मितः । प्रत्याहूय वरं प्रोचे
तन्महोत्सवदायिनं ॥१४॥ उत्सवाध्यक्ष उवाच ॥ अन्ये सुरां स्वादुतमां सखिभ्यः पूर्वं प्रदायाथ
सुपीतवद्भ्यः । अल्पापकृष्टां ददति त्वमेव सर्वोत्तमां त्वार्य्य ददासि शेषं ॥१५॥ गुरुरुवाच ॥ २६
इत्युक्त्वा सोऽशृणोत्तत्र सुरां सर्वोत्तमामिमां । न वरेण प्रदत्तां वै किंत्वद्भ्यो विकृतामिह ॥
१६॥ ज्ञातं चातो वराद्यैस्तद्येषूमाहात्म्यलक्षणं । उत्सवस्योत्तमः शेष इति विश्वासिभिः
स्मृतं ॥१७॥ आद्यमेतत् कनापुर्य्यां स्वप्रतीतिकृतेऽकरोत् । संस्कृतः स परीक्षायाः पर ऐश्वर्य्य
भासनं ॥१८॥ यो वै संसारभोग्येषु क्षयं गच्छत्सु सर्वशः । असत्सु च ददात्येकः सच्चिदानन्दकं

रसं ॥१९॥ स्रष्टा यः सर्व्ववस्तूनां पालको नाशकोऽपि च । शेषे दायी स्वप्रीतेभ्यो विवाहोत्सव
मुत्तमं ॥२०॥ इति श्रीखृष्टसंगीतायां पुत्राभिषेकपर्व्वणि (शान्तयोहन्निरचितमङ्गलसमाचार
स्य द्वितीयसर्गादुद्धृतो) विवाहोत्सवप्रभावो नाम षष्ठोऽध्यायः ॥
गुरुरुवाच ॥ नश्वरेतं ततस्त्यक्त्वा समातृभ्रातृशिष्यकः । येषूः कर्पणहूमाख्यं नगरं परम
भ्यगात् ॥१॥ यद्गलीलाहृदस्यैव महतो रोधसि स्थितं । गिन्नेसाराभिधानस्य बहुनौधीव २७
रावृते ॥२॥ न बहूनि त्वतोऽतिष्ठन् दिवसान्यत्र ते तदा । त्राणपर्व्वण्युपेते हि सर्व्वश्रेष्ठे यहू
दिनां ॥३॥ तदा यिरूषलेमं तैर्गन्तव्यं प्रभुणापि च । संस्कृतेनाधुना वेश्यं यथोक्तं निज
मन्दिरं ॥४॥ शिष्य उवाच । मलाकीयेन यः प्रोक्तः प्रवेशः प्रेरितेऽग्रगे । चरे प्रभोरभीष्टस्य
कथं सोऽभूत्तदा गुरो ॥५॥ गुरुरुवाच ॥ यत्स्वान्तोपस्थितौ तत्र देयमैश्वर्य्यदर्शनं । प्रभुणा

तदिदानीं च गुरुत्वारम्भणे'प्यभूत् ॥६॥ मन्दिरं स्वं प्रवेक्ष्यन् हि सो'विवत्साभिधो'मलः ।
स्मार्य्यें'विवत्समेधेन महात्राणे'ब्रहोद्भवां ॥७॥ अवापाजिरमध्यस्थान् महापर्व्वार्थमागतान् ।
सोक्षमेषकपोताद्यान् विक्रेतॄन् बणिजो'पि च ॥८॥ मेध्यार्पणच्छलेनैव तत्क्रियानुमतिं हि ये ।
तत्रापुलुन्धयज्वभ्यो धनदानैः सदोत्सवे ॥९॥ अथ स क्रोधतः ख्रीष्टः कशां निर्म्माय रज्जु
भिः । पशून् सर्व्वान् सविक्रेतॄन्निरास्यन्मन्दिराजिरात् ॥१०॥ बणिजां चापि वीथीः स सहमु २८
द्रा अधो'क्षिपत् ॥ कपोतानां च विक्रेतॄनिदमेवाब्रवीद्वचः ॥११॥ श्रीयेषूरुवाच ॥ क्षुद्राण्येतानि
सर्व्वाणि नयत त्वरितं वहिः । मत्पितुर्गृहमेवार्च्यं मा कुरुध्वं बणिग्गृहं ॥१२॥ तत्तु दृष्ट्वा
प्रभोः कर्म्म क्षारवद्वै प्रमार्जतः । मन्दिरं लोभमलिनं शिष्या अल्पविदो'पि ते ॥१३॥ मत्त
मीश्वरप्रेम्णा तं संजानन्तो'स्मरंस्तदा । यद्गीतं ख्रीष्टपित्रा वै पुरा राज्ञेस्रयेलिनां ॥१४॥

दाविदुवाच ॥ गलितोऽस्म्यपि मुक्तिनाथ तेऽर्चगृहार्थेऽतिकुतूहलोर्म्मिभिः । तव चाप्यपवा
दिनां सदाऽधमवाक्यैर्मन आहतं मम ॥१५॥ गुरुरुवाच ॥ तत्खृष्टार्थं पुरोक्तं तेऽस्मरन् किंतु
यहूदिनः । अन्ये तन्निर्भयं कर्म्म दृष्ट्वोचुरिदमीर्षया ॥१६॥ यहूदिन उचुः ॥ य एतत्कुरुषे
कार्य्यं केवलं श्रेष्ठयज्वभिः । त्वं नो गालील्य किं चिह्नं त्वदैश्वर्य्यस्य दर्शयेः ॥१७॥ श्रीयेषु
रुवाच ॥ एतद्वै निन्दकांश्चिह्नं दर्शयिष्यामि वोऽचिरात् । युष्मद्भग्नमिदं त्र्यहे निर्म्मास्यन् २९
मन्दिरं पुनः ॥१८॥ यहूदिन उचुः ॥ एतन्मन्दिरनिर्म्माणं पारसीकाधिपाज्ञया । षट्चत्वा
रिंशदब्देषु समाप्तं तत्परे श्रुतं ॥१९॥ त्वमियत्कालनिर्म्माणं यदि भग्नं त्वदुक्तितः । कथं
शक्नोषि गालील्य त्र्यहे रचयितुं पुनः ॥२०॥ गुरुरुवाच ॥ इति तैर्नि विदद्भिर्वै रहस्यं वचनं
प्रभोः । तदा प्रत्युदितं पश्चाच्चाप्यतः स्मृतमीर्षकैः ॥२१॥ तच्छिष्याश्चापि न तदा बुध्यमाना

इदं वचः । तन्मृत्यूत्थापनात्पश्चात्तदर्थं स्फुटमस्मरन् ॥२२॥ यच्चुक्तं मन्दिरं तेन सदैश्वर्य्या
लयं वरं ॥ अवतीर्णस्य देहं तदीश्वरात्मप्रतिष्ठितं ॥२३॥ शिष्य उवाच ॥ तदैतत्त्राणपर्व्वार्थं
समेतानां यहूदिनां । किं न केचित्प्रतीयुः स्वे मन्दिरे प्रभुमागतं ॥२४॥ गुरुरुवाच ॥ फरी
ष्याद्यगणाः शिष्य नैच्छन् हीनधनोच्छ्रयं । गालील्यैरन्वितं नान्यैस्तं खृष्टमिति वेदितुं ॥२५॥
तस्मात्तत्स्पष्टलक्ष्माणि व्यमन्यन्तैव गर्व्विणः । यद्दृष्ट्याल्पविदोऽप्यन्ये तं प्रतीयुः प्रवाचिनं ॥ ३०
२६॥ किन्तु तेभ्योऽपि तत्रासौ खृष्टोऽहमिति नाब्रवीत् । सर्व्वेषां हृन्दि जानन् हि मन्त्रिणापि
विना स्वयं ॥२७॥ ततो सौ कर्म्ममात्रेण प्रभुत्वं दर्शयन् स्वकं । आत्मानं नापि कस्मैचिद्गु
रुत्वादौ समार्पयत् ॥२८॥ तथाचारभत ज्ञानी प्रवाच्युक्तं परीक्षणं । कर्त्तव्यं सर्व्वभक्तानां स
प्रभुर्निजमन्दिरे ॥२९॥ तथैव स यथा तत्र सिम्योनेनोदितः पुरा । शैशवे स युवेदानीं

स्थितस्तद्वाक्यपूर्त्तये ॥३०॥ बहूनामिस्त्रयेलानां पातायोत्थापनाय च । बहूनां चापि गुप्ता
नामाविष्कृत्यै हि चेतसां ॥३१॥ स्थित एष शिशुर्नूनं निन्दनान्वितलक्ष्मवत् । इति वृद्धस्य
सद्वाक्यं निर्णेयं वहुशः परे ॥३२॥ शिष्य उवाच ॥ तद्वाक्यं मन्दिरे प्रोक्तं चत्वारिंशे प्र
भोर्दिने । प्रस्वै स्मराम्यहं किंतु तद्दृष्टान्तं गुरो वद ॥३३॥ गुरुरुवाच ॥ आसीत्कश्चित् फ
रीष्येषु नीकदेमाभिधो धनी । महासभ्यो यहूद्यानां समस्तैरादृतो नरैः ॥३४॥ स येष्वोऽद्भुत ३१
कर्म्माणि दृष्ट्वा यत्नादचिन्तयत् । कोऽधुनास्मास्वसावेतोऽपेक्ष्यखृष्टेषु शिक्षकः ॥३५॥ यद्देव
स्नापको भक्तो गुरुं विक्रमवत्तरं । आयातं गुप्तमप्याह तीरे पृष्टोऽस्मदीरितैः ॥३६॥ तद्वायं
न गुर्वाक्यैर्योहन्नेर्यः प्रतिश्रुतः । अद्भुताचारको ह्येष ईशार्च्चार्थे कुतूहली ॥३७॥ किं वायं
नभवेद्यस्य राजाख्यस्य श्रुतं पुरा । हेरोदौ राज्ञि जन्मेह कीर्त्तितं चान्यजैरपि ॥३८॥ ईश

नुन्नं प्रवक्तारं विशेषात्खृष्टमेव न । प्रतीयां तस्य चिह्नानि दृष्ट्वा दण्ड्योऽप्यहं तदा ॥३९॥
इति चिन्तयमानो वै विश्वासाभिमुखोऽपि सः । भीत्यारुध्यत सभ्यानामन्येषां लोभगर्विणां ॥
४०॥ तैस्ततोऽवमतं येषूं नरसाक्षात्स चेष्टितुं । ह्रीणोऽतः प्रययौ रात्रावभ्यूचे चाकुला
त्मकः ॥४१॥ नीकदेम उवाच ॥ गुरुमागतमीशात्त्वां विद्मो नहि नरः क्वचित् । त्वत्क्रियाः
शक्नुयात्कर्तुं येनेशो न सहस्थितः ॥४२॥ गुरुरुवाच ॥ इत्यादरवचः श्रुत्वा नवराज्यप्र ३२
वर्तकः । ईशपुत्रः स तं सभ्यं सर्वान्तर्विद्वोचत ॥४३॥ श्रीयेषूरुवाच ॥ सत्यं सत्यं वदामि
त्वां नानुजायेत चेन्नरः । उद्भूतः स तद्देशस्य राज्यं द्रष्टुं न शक्नुयात् ॥४४॥ नीकदेम
उवाच ॥ यो वृद्धोऽप्यब्रहोद्भूतो जायेत स कथं पुनः । मातुर्गर्भोदरे किं वै प्रविशेत्सो
ऽनुजन्मने ॥४५॥ श्रीयेषूरुवाच ॥ सत्यं सत्यं वदामि त्वां चेन्न जायेत मानवः । जलात्मभ्यां

स ईशस्य राज्यं वेष्टुं न शक्नुयात् ॥ ४६ ॥ देहाद् यो जायते नित्यं तं देहं विद्धि संस्थितं । आ
त्मनो जायते यस्तु सोऽप्यात्मात्र न संशयः ॥ ४७ ॥ यन्मया त्वधुना प्रोक्तमावश्यमनुजन्म वः ।
आब्रह्मानामपीति त्वं तस्मान्मा कुरु विस्मयं ॥ ४८ ॥ स्वयं प्रध्मा यथा वायुर्यस्य शृण्वन्नपि
ध्वनिं । अनुमातुं न शक्नोषि कुत एति क्व याति वा ॥ ४९ ॥ तथा सोऽप्यनुजन्मार्थः सर्व
दिग्व्यापकः स्वयं । शक्त आत्मा सदाव्यक्तो ज्ञेयो वै कार्य्यमात्रतः ॥ ५० ॥ गुरुरुवाच ॥ इति ३३
श्रुत्वा सुजातः स स्वयोग्यां जलसंस्कृतिं । नवराज्येऽनुजन्मार्थं स्नानाद्याचार्य्यपि ध्रुवं ॥ ५१ ॥
न तु वै जलमात्रेण कार्य्यां किंत्वात्मनापि तां । अव्यक्तेनानिलेनेव परदिग्व्यापिना स्वयं ॥
५२ ॥ तत्सर्वं सोऽद्भुतं ज्ञात्वा निजधर्माहितः कथं । तद्भवेदिति प्रत्युच्य शुश्रावेदं प्रभोर्वचः ॥
५३ ॥ श्रीयेषूरुवाच ॥ त्वं नु सर्वैस्त्रयेलेषु महाचार्य्योऽभिधीयसे । तदैतन्न वचो वेत्सि स्नाना

त्मीयानुजन्मनः ॥ ५४ ॥ अति सत्यं ब्रवीमि त्वां यज्ज्ञातं दृष्टमेव यत् । तत्साक्ष्यं प्रोच्य युष्मा
भिर्नप्रतीयामहे वयं ॥ ५५ ॥ यदि लौकिकवाक्यानि न प्रतीयात मेऽधुना । मां स्वर्गीयानि
वक्ष्यन्तं प्रतीयात कथं तदा ॥ ५६ ॥ नह्येकोऽपि नृणां स्वर्गमारुरोह कदाचन । मां विनातोऽ
वतीर्णं वै स्वर्गस्थं च नरात्मजं ॥ ५७ ॥ पैत्तल्यं तु यथा सर्पमौषधायेस्त्रयेलिनां । प्रान्तरे
सर्पदष्टानां मोसिः स्तम्भोर्द्धमार्पयत् ॥ ५८ ॥अर्पणीयं तथोर्द्ध्वं वाचिराद्विद्धि नरात्मजं । क्षि ३४
तानां पापगरलैश्चिकित्सायै नृणामपि ॥ ५९ ॥ यस्मिन् संस्थाप्य विश्वासं सर्पदृग्लोकवन्नतः ।
न म्रियेत नरः किंतु प्राप्नुयान्नूतनजीवनं ॥ ६० ॥ जगत्पापार्णवे मग्नमित्थं ह्यस्निह्यदी
श्वरः । यत्स स्वैकसुतं तस्य विमुक्त्यै प्राददात्स्वयं ॥ ६१ ॥ यस्मिन्नृष्ववतीर्णे वै विश्वसन्
पापकार्य्यपि । न म्रियेत नरः किंतु लभेतानन्तजीवनं ॥ ६२ ॥ न हि दण्डाय जगतः प्रै

रश्मेश आत्मजं । दण्डास्यापि परंत्वस्य मुक्त्यै तन्नामशक्तितः ॥ ६३ ॥ तद्विश्वासयुतो
दण्डं नैति तद्रहितस्तु यः । दण्डितः सोऽधुनाप्यस्तीशैकपुत्राप्रतीतितः ॥ ६४ ॥ प्रकाशे ह्यधु
नायाते जगदभ्यन्तरे तमः । वृतं मर्त्यैः कुकर्म्मार्थं दण्डं तत्र स्थितं शृणु ॥ ६५ ॥ मन्दकारी
प्रकाशाय सर्वो द्वुह्यति मानवः । न वा तं प्रतियात्येव स्वकर्म्माविष्कृतेर्भयात् ॥ ६६ ॥ अभ्यु
पैति स्वयं तं तु प्रकाशं सत्यकारकः । यतो वै तत्क्रिया भायुरीशसाक्षात्कृताः स्फुटं ॥ ६७ ॥ ३५
गुरुरुवाच ॥ तथा रात्रौ प्रकाशः स महान् सभ्यमुपादिशत् । मुक्तिदेष्टा मनुष्याणां हृच्छारल्य
परीक्षकः ॥ ६८ ॥ यद्रहस्यवचः श्रुत्वा चिन्तयंश्चापि यत्नतः । नरभीत्याकुलोऽप्येष नीकदेमो
ययौ निशि ॥ ६९ ॥ कालं प्रतीक्षमाणस्तमूर्द्धमर्प्यो यदा नृणां । मुक्त्यै स नरजो येषूस्तत्प्र
तीतिमगोपयत ॥ ७० ॥ तस्योर्द्धार्पणमुये तु शूले नावेत्स भावि तत् । परनिन्दान्वितं लक्ष्म

प्रकाशाद्विभ्यतां नृणां ॥ ७१ ॥ तदा शङ्का किमस्यैव पातायोत्थापनाय वा । स्थितो थिरूष लेभे स विभावी गुप्तचेतसां ॥ ७२ ॥ इति श्रीखृष्टसंगीतायां पुत्राभिषेकपर्व्वणि (मोसिरचित पञ्चशास्त्रे संख्यास्कन्धस्यैकविंशसर्गाद् द्वाविंशोतानामूनसप्ततितमाच्छ्रान्तलूकस्य द्वितीयसर्गा च्छ्रान्तयोहन्नोर्द्वितीयतृतीयसर्गाभ्यांचोद्धृत) ईशार्च्चकविभावनं नाम सप्तमोऽध्यायः ॥

गुरुरुवाच ॥ त्राणपर्व्वणि संपूर्णे पुरं श्रेष्ठं सुमन्दिरं । त्यक्त्वान्यत्र यहूद्योर्व्यां येषूः शिष्याश्च संययुः ॥ १ ॥ यत्राल्पाहस्थिता एव विश्वासालम्बिनो नरान् । कांश्चित्ते स्वगुरोरर्थे संमज्जुः स्नानरीतितः ॥ २ ॥ तत्समीपे स्थितश्चापि ग्राम ऐनोनसंज्ञके । बहुघट्टे स संस्कुर्वन् योहन्निः स्नापकोऽभगः ॥ ३ ॥ आगतो हि पिरायातस्तटे तर्हि यहूदिके । अनुतापोपदेशं सोऽकरोच्चर्म्मकाटित्रकः ॥ ४ ॥ तच्छिष्याः प्राप्य कंचित्तु यहूदं योऽनुचारिभिः । येष्वोऽनुजन्म संलेभे जलात्मभ्यां

समुत्थितं ॥ ५ ॥ तेन शुद्धिविवादं ते कृत्वाथातिकुतूहलाः । समभ्येत्य गुरुं स्वीयमेतदभ्यब्रुवन्
वचः ॥ ६ ॥ योहन्निशिष्या ऊचुः ॥ गुरो यर्द्दानिपारे यस्त्वत्सङ्गी साक्षितस्त्वया । सोऽधुना
स्नापयत्येव सर्वलोकैश्च सोऽन्वितः ॥ ७ ॥ गुरुरुवाच ॥ इदं श्रुत्वा स्वशिष्याणां वितण्डां स्वार्थ
इच्छतां । निर्वेदनमनीर्ष्यः स प्रत्यवादीन्महागुरुः ॥ ८ ॥ योहन्निरुवाच ॥ न किंचिच्छक्नुयात्
प्राप्तुं नरो यत्स्वर्गतो न हि । दत्तं शिष्यास्तदा कस्माद्विवदध्वे नु मत्कृते ॥ ९ ॥ किं मयेदं ३७
न वः साक्षाद्वैव्यान् प्रत्युदितं वचः । न ख्रिष्टोऽस्मि परं त्वग्रे तस्येशप्रेरितो ह्यहं ॥ १० ॥
यो हि कन्यां प्रगृह्णाति विवाहे स वरः स्मृतः । न चान्यः कोऽपि तेनास्ति संभागी तन्म
होत्सवे ॥ ११ ॥ जन्यस्त्वत्र स्थितः शृण्वन् वरस्यागच्छतो रवं । अत्यानन्दति तद्वन्मेऽप्यानन्दः
पूरितोऽधुना ॥ १२ ॥ वर्द्धनीयः स वै नित्यं ह्रसनीय इतस्त्वहं । ऊर्द्ध्वतः सोऽवतीर्णो हि सर्व

भूतोपरिस्थितः ॥ १३ ॥ भूमितो यः समायाति स भौम्यः स च भौम्यवाक् । स्वर्गाद् यस्त्वेति
स श्रेष्ठः स्वदृष्टश्रुतसाक्ष्यदः ॥ १४ ॥ तस्य स्वर्गीयसाक्ष्यं वै न प्रतीतं कूचिन्नरैः । तच्छ्रद्धस्त्वी
शसत्यत्वे निदधौ योग्यमुद्रिकां ॥ १५ ॥ यमीशो ह्यात्मतः प्रैरत्स विशेषत ऐशवाक् । न तस्मै हि
सदात्मानं भागशो यच्छतीश्वरः ॥ १६ ॥ महास्नेहेन पुत्रं हि पिता पाति स्वरूपकं । तत्करे
चैव विश्वं स स्वयं सम्यक् समार्पयत् ॥ १७ ॥ पुत्रविश्वासको नित्यं जीवेद्यस्तु पराङ्मुखः । ३८
पुत्रान्नजीवनं पश्येदीशक्रुधिषयोऽपि सः ॥ १८ ॥ गुरुरुवाच ॥ इति स्वं ह्यन्तिमं साक्ष्यं
प्रददावयगः प्रभोः । काराबन्धनकालेऽपि दुष्टभूपादुपस्थिते ॥ १९ ॥ यं त्वायान्तमसौ ज्ञात्वात्य
नन्दद्वरमित्रवत् । स वरः पुत्र ऐशोऽपि तद्विवादवचोऽशृणोत् ॥ २० ॥ कीर्तितं च फरीष्या
णामपि मध्येऽशृणोदिदं । योहन्नेरधिकान् शिष्यान् गालील्यः स्नापयत्ययं ॥ २१ ॥ इत्यसत्य

मपि शुत्वा तद्विवादाप्रियः प्रभुः । ऐच्छद् यहूद्यदेशात्स गलीलां चलितुं पुनः ॥ २२ ॥ न च
तामृजुमार्गेणाभ्यगात्तस्या हृदं च सः । यर्द्दीनेस्तीरगेनैव यत्र योहन्निरादिशत् ॥ २३ ॥ किंतु
प्रत्यग्दिशं गन्तुं सभार्य्ये चापि नीवृति । ऐच्छत्तैर्नेक्षितो लोकैर्नवा दुष्टेन भूभुजा ॥ २४ ॥
शिष्य उवाच ॥ तस्यायगस्य योहन्नेः कारायां बन्धनं कथं । गुरो भूत्केन वा दुष्टं कर्म्मैतद्भू
भुजा कृतं ॥ २५ ॥ गुरुरुवाच ॥ हैरोद्यः सोऽन्तिपा भूपो यो गलीलापिराययोः । चक्रे तत्कर्म्म ३९
यद्येतुं कथयिष्ये त आदितः ॥ २६ ॥ कैशरे स तिबर्य्याय हितः स्वरचितां पुरीं । गलीला
हृदतीरे वै तैबर्य्याख्यां पुराकरोत् ॥ २७ ॥ तं हृदं चापि यः ख्यातो गिन्नेसारो यहूदिभिः ।
अभ्यधासीत्स तैबर्य्यं हृदं ख्यात्यै हि कैशरः ॥ २८ ॥ तं तथैव नमस्कर्त्तुं तदनुग्रहयाचकः ।
अभ्यगात्सोऽन्तिपा रोमां मत्प्रोक्तात्कर्म्मणः पुरा ॥ २९ ॥ यन्मार्गाभ्यन्तरे गत्वान्योदर

भ्रातुरालयं । महाहेरोदिपुत्रस्याल्पदिनान्यवसत्सह ॥ ३० ॥ तस्य पत्नीं तदा दृष्ट्वा हेरोदेर्यापि पौत्र्यभूत् । सोसिश्चात्रविरुद्धोढा हैरोद्या नाम सुन्दरी ॥ ३१ ॥ तां कामेनान्तिपाःसो ऽपि दुश्चरित्रो ऽन्वरज्यत । तस्याश्चानुमतिं प्राप्नोद्धृताया राज्यलिप्सया ॥ ३२ ॥ इति चाङ्गीकृतं तस्यै रोमातः प्रतिगाम्यहं । त्वां विवोढास्मि पूर्व्वोढामारब्यां वर्ज्जितास्मि च ॥ ३३ ॥ रोमां गत्वाथ कर्म्माणि स निष्पाद्याभ्यगात्पुनः । गलीलां यत्र सासीत्स्त्री भीमहारिथनन्दिनी ॥ ३४ ॥ सा विराद्न्तिपापत्नी तां गुप्तामपि यत्नतः । प्रोक्तामङ्गीकृतिं पत्या प्रत्तीलोभिनाशृणोत् ॥ ३५ ॥ तद्गुप्त्वा तु च्छलाज्जित्वा तैबर्य्यां राज्यकां पुरीं । आरब्ये सा विषाद्देशे द्रुता स्वं पितरं प्रति ॥ ३६ ॥ तद्वाक्याद्धारिथः क्रुद्धः स नृपो लोप्त्रहारिणां । दण्डार्थे दुष्टजामातुर्महायुद्धाय सज्जितः ॥ ३७ ॥ यो ऽपि सेनां समचिनोदरबाणां विरुद्धये । यथा

पूर्वं मयोक्तं ते शिष्य योहन्निकर्म्मसु ॥ ३८ ॥ सैन्याः केचित्तदा ह्येनं समपृच्छन्महागुरुं । आयन्
यर्द्दानितीरे य आरब्धं नीवृतं प्रति ॥ ३९ ॥ अधुना त्वेव तद्रूपो यदापि भ्रातृगेहतः । हेरो
द्यां तां समाहूतां व्यवहृद्धीनलज्जकः ॥ ४० ॥ स तदा सैन्यदृष्टौ वै पिरायामेत्य कीर्त्तनं । यो
हन्नेः श्रुतवानेनं द्रष्टुं श्रोतुं च प्रार्थयत् ॥ ४१ ॥ यहूद्यातं ततो देशान्निम्नगावार आगतं ।
इदमभ्यब्रवीद्धर्षाद्धेरोदितनयो नृपः ॥ ४२ ॥ अन्तिपा उवाच ॥ गुरोऽहं त्वां चिरादिच्छुर ४१
नघं श्रेष्ठमन्त्रिणं । संद्रष्टुं साम्प्रतं वृत्तोऽपीत्त्रयेलारिसंयुधि ॥ ४३ ॥ गुरुरुवाच ॥ इत्यादृतवचः
श्रुत्वा सोऽनुतापप्रवाचकः । उष्ट्रलोमाम्बरो भूपमेतत्प्रत्यब्रवीद्वचः ॥ ४४ ॥ योहन्निरुवाच ॥
कथमैशवचः श्रोतुमिच्छुस्त्वं मन्दकृन्नृप । भ्रातृभार्य्याविवाहस्ते निषिद्धो ह्यैशशास्त्रतः ॥
४५ ॥ गुरुरुवाच ॥ ह्रीणस्तद्वचसा भूपो न तु स्वाघानुतापकः । ततो व्याकुलहृद्भूत्वारेभे

चिन्तयितुं तथा ॥ ४६ ॥ किं करिष्याम्यहं तेन प्रवक्त्रा निन्दितः स्फुटं । आदृतेन समस्तैर्वै
गालील्यैः सयहूदिभिः ॥ ४७ ॥ अथ तन्मन्त्रनोताः किं न द्रोहिष्यन्ति मेऽखिलाः । मां युद्धे वा
प्रवृत्तं न क्षिपेयुरपि राज्यतः ॥ ४८ ॥ तच्चिन्तातः स योहन्निं दुर्गे नाम मखैरुषि । पिरा
याद्दूरसीमस्थेऽबध्नाच्छुद्धाहृतेः कृते ॥ ४९ ॥ दुष्टा पत्नी तु हैरोद्या योहन्नेस्तद्वचो यदा ।
अशृणोदपि तद्धिंसां सुयत्नात्समकल्पयत् ॥ ५० ॥ न तु कर्तुमशक्नोत्तां नेत्थं ह्यनुमते पतौ । ४२
लोकभीत्या निरुद्धेऽतः प्रवक्तुश्चापि सत्तया ॥ ५१ ॥ तस्मात्तस्यान्तिके सोऽपि कूचिदभ्यायद
न्तिपाः । तच्छिष्यांश्चानुमेनेऽपि कांश्चिदेतुं गुरुं प्रति ॥ ५२ ॥ तथा दुर्गेऽपि संबद्धोऽशिक्षयत्स
महात्मकः । अयगस्तन्मृतिर्यावन्नासोद्वाच्यः परे मया ॥ ५३ ॥ इति श्रीखृष्टसंगीतायां पुत्राभि
षेकपर्व्वणि (शान्तमत्थायस्य चतुर्थचतुर्दशसर्गाभ्यां शान्तमार्कस्य प्रथमषष्ठसर्गाभ्यां शान्तलूकस्य

तृतीयसर्गाच्छान्तयोहन्नेस्तृतीयचतुर्थसर्गाभ्यां फ्लाव्ययोसेफरचितयहूदिपुरातनप्रबन्धाच्चोद्धृतो)
महाजन्यानन्दपूरणं नामाष्टमोऽध्यायः ॥

शिष्य उवाच ॥ गर्ह्यं हैरोद्यकर्म्मेदं श्रुत्वा क्षुब्धोऽस्म्यहं गुरो । बद्धे भद्रेऽयगे त्वेव प्रभुः किम
करोत्ततः ॥ १ ॥ गुरुरुवाच ॥ यदा तद्विपदं येषूरशृणोत्प्रोदिते पथि । सोऽवर्त्तत समार्य्यं वै
गलीलां गन्तुमिच्छुकः ॥ २ ॥ यर्द्दानेः सन्निकृष्टां हि समां भूमिं विहाय सः । अविशद्गिरि ४३
पूर्णो विमिफ्रैम्यैरुषितां पुरा ॥ ३ ॥ तेभ्यो योसेफजातानां श्रेष्ठेभ्यो द्वादधाविमां । आर्य्यभूमि आ
विभागेऽग्र्ये येषूस्तद्वंश्यनूनजः ॥ ४ ॥ इमां त्वेव सहान्याभिर्दशवंशजयात्परे । समार्य्यी अ
धरन् लोकाः पाषण्डा जातिसङ्कराः ॥ ५ ॥ चलंस्तत्र प्रभुः पद्मामीशप्रत्नालयं पुरं । सिलवं
धामसंस्थं सोऽतिक्रम्य सिकिमं ययौ ॥ ६ ॥ महापर्वतयोर्मध्ये यदार्य्यं नगरं स्थितं । हेबलोक

प्रबन्धे ऽपि चिरान्नानाकथास्मृतं ॥ ७ ॥ तयोरेकस्तु घेबालो नाम तस्योत्तरे स्थितः । अवृक्षः
स शिलाशृङ्गैर्भीम ऐश्वशपात्मकः ॥ ८ ॥ अन्यो दक्षिणसंस्थस्तु गरिजीमाभिधो महान् । आ
रामैः स्वन्वितो रम्यैरुत्सैश्चैशाशिरात्मकः ॥ ९ ॥ नगानामधिराजं तं सर्वे तत्परिवासिनः ।
अमन्यन्तैव शीयोने सगृहे ऽप्यवधारिते ॥ १० ॥ शिष्य उवाच ॥ अद्भुताद्रिद्वयेनेदमावृतं सि
किमं पुरं । कथमार्य्यमभूत्काभिः कथाभिर्वा स्मृतं पुरा ॥ ११ ॥ गुरुरुवाच ॥ तत्पूर्व्वसम ४४
ये तातः सिकिमस्य कनानिनः । तद्भूमीमिस्रयेलायोदासीनाय विचिक्रिये ॥ १२ ॥ स
तत्राब्रहपौत्रो ऽथ वेदिमीशाय निर्म्ममे । लोप्त्रिणश्च ततो ऽमोर्य्यान् वहिश्चक्रे ऽसिधन्वभिः ॥१३॥
ऐगुप्ते म्रियमाणस्तु तां ददौ प्रेष्ठसूनवे । योसेफाय सुतौ तस्याप्याशासन् द्विविधांशदः ॥ १४ ॥
तस्माद्यदाविशन् देशमैस्रयेल्याः कनानकं । योसेफास्थीनि मिश्रात् त आनयन्तस्तदाज्ञया ॥१५॥

तद्दैतान्येव तद्भूमौ सैकिम्यां ते समार्पयन् । येष्विव स्वादिकुलस्मृत्या तथादिशन्ति ना
यके ॥ १६ ॥ तदैव मन्यमानास्ते मोसिप्रोक्तोपदेशनं । तेभ्यो यर्द्दानिपारेऽपि वेश्यद्भ्योऽङ्गी
कृतां भुवं ॥ १७ ॥ गरिजीमस्य शिखरेऽवाचयन्नाशिषं परां । ईशाज्ञाचारिणां सम्यक् सङ्ग्
दामिस्त्रयेलिनां ॥ १८ ॥ घेबालशिखरे त्वेव शपमुयं भयानकं । असतांमैस्त्रयेल्यानामेकेशवि
धिलङ्घिनां ॥ १९ ॥ मोस्यादेशाच्च घेबाले लिखितं प्रस्तरत्रये । शास्त्रं स्थूले सुसंयुक्ते दृशद्वेद्या ४५
सहार्पयन् ॥ २० ॥ पुरी तस्मात्तयोर्मध्ये गरिजीमस्य तु स्थिता । सुन्दरोपत्यकायां सादृता
फ्रैमादिभिः सदा ॥ २१ ॥ सिकिमे संचिताः पश्चात्प्रधाना दशवंशकाः । सलोम्नो मूर्खपुत्रस्य
सकृद्राज्यं निरक्षिपन् ॥ २२ ॥ ततस्तत्कृतमप्यार्य्यं मन्दिरं तेऽवमत्य वै । यरूबौमाघमन्त्रेणा
फ्रैमाद्या वञ्चिताः कुलाः ॥ २३ ॥ यौसेफ्यां सन्नरां भूमीमार्य्यशैलाद् यह्रूदिनां । अवोचंस्तन्मतिं

चाथ सङ्करास्तेऽपि लेभिरे ॥ २४ ॥ कल्दायैस्तु परे भग्नं सलोम्नो मन्दिरं यदा । यहूद्या
अन्वरचयन् पारसीकाधिपाज्ञया ॥ २५ ॥ तदेर्थातः समार्य्येषु ख्यातः संबल्लटो महान् ।
गरिज़ीमाद्रिशृङ्गेऽपि निर्म्ममे सौम्यमन्दिरं ॥ २६ ॥ यथा यैरूषलेम्यं च सद्विश्वासिभिरा
श्रितं । चिरं तदपि पाषण्डैर्दाविद्राज्यारिभिस्तथा ॥ २७ ॥ योहन्नौ तत्तु हुर्कांने यहूद्यनृप
यज्वनि । भग्नवत्यपि तत्स्थानं पुण्यमूचुः समार्य्यकाः ॥ २८ ॥ मोसिना ह्युपदिष्टा या घेबाले ४६
वेदिर्निर्म्मितिः । तां कार्य्यां गरिज़ीमे ते तदा नित्यं च मेनिरे ॥ २९ ॥ शिष्य उवाच ॥
तद्भ्रान्तेर्हेतुरस्याद्रेः सौम्यताशीश्च बुध्यते । तत्र यातेन येष्वा तु किं ततोऽभूत्कृतं गुरो ॥ ३० ॥
गुरुरुवाच ॥ सिकिमं तत्पुरं ख्यातं स्वकालीयैर्यहूदिभिः । सिकरं वै मृषासंज्ञं समार्य्य
मतगर्हया ॥ ३१ ॥ अभिगत्य प्रभुः पद्भ्यां क्लान्त आर्य्यक्षितौ स्थितः । तस्यां यां धर्म्म्ययाकोबो

ददौ स्वप्रेष्ठसूनवे ॥ ३२ ॥ तदन्तःसंस्थिते कूपे ऽध्यास्त याकोब्यनाम्नि सः । सायं गतेषु
शिष्येषु तदान्नक्रीतये पुरं ॥ ३३ ॥ तदा कांचित्समार्य्यां स्त्रीं जलमुद्धर्तुमन्धुतः । आगतामिद
मभ्यूचे जलं मे दीयतां त्वया ॥ ३४ ॥ इदं श्रुत्वा वचो नारी पुरुषस्य विधर्मिणः । अहिता
न्वयजस्यापि विस्मिता प्रत्यवोचत ॥ ३५॥ समार्य्योवाच ॥ त्वं यहूदी कथं वारि समार्य्याया
मदिच्छसि । नहि नौ वंशयोरस्ति व्यवहारः कदाचन ॥ ३६ ॥ श्रीयेशूरुवाच ॥ ईश्वरस्य ४७
वरो नारि त्वया चेत्समबुध्यत । यो वा मे देहि पानीयमिति त्वां वक्ति सांप्रतं ॥ ३७ ॥ स
त्वयापि यदि ज्ञातस्तदा तस्माद्विशेषतः । प्रार्थनीयं त्वयाभूद्वै पानीयममृतात्मकं ॥ ३८ ॥
समार्य्योवाच ॥ तव नास्ति घटीयन्त्रं गभीरश्च महाशय । कूप एष कुतो ऽथास्ति पानीयं
ते ऽमृतात्मकं ॥ ३९॥ त्वं किमस्मत्पितुः श्रेयान् याकोबाद् य इमं हि नः । अन्धुं ददौ पपौ चेतः

सपशुः ससुतादिकः ॥ ४० ॥ श्रीयेषूरुवाच ॥ यो ऽस्मात्पिबति कूपात्स पुनस्तर्षिष्यति ध्रुवं ।
मज्जलं तु पिबन्मर्त्यो न तृष्णां प्राप्स्यति क्वचित् ॥ ४१ ॥ यज्जलं हि मया देयं सदा तस्यान्तरे
स्थितं । उत्पतन्नुत्स इव तद्भवेदानित्यजीवनं ॥ ४२ ॥ समार्य्योवाच ॥ महाशय जलं
मह्यमप्येतद्देह्यमूल्यकं । न तृष्येयं यतो नापीहाङ्गन्तुं एयां मुहुर्मुहुः ॥ ४३ ॥ श्रीयेषूरुवाच ॥
यदि त्वं नु मया देयं वरमीशस्य वाञ्छसि । याहि नारि पतिं स्वीयमानयापि च मां प्रति ॥ ४८
४४ ॥ इति पृष्टा समार्य्योचे को ऽपि नास्ति पतिर्मम ॥ एतच्छ्रुत्वा तु सर्वज्ञः प्रभुस्तामिद
मब्रवीत् ॥ ४५ ॥ श्रीयेषूरुवाच ॥ इदं साधु त्वया प्रोक्तं को ऽपि नास्ति पतिर्मम । आसन्
हि पञ्चपतयस्तवानुक्रमशः पुरा ॥ ४६ ॥ यस्त्विदानीं प्रदेशे ऽस्मिन् प्रियस्ते विद्यते नरः ।
स न व्यूढो ऽस्यतः सत्यं तद्वाक्यमुदितं त्वया ॥ ४७ ॥ समार्य्योवाच ॥ ईशप्रवाचिनं त्वां

भो॰नुभवाम्यतिविस्मिता । यद्यपि स्या यन्नूयस्त्वमस्मन्मतविरोधकः ॥ ४८ ॥ गुरवः पितरो॰
स्माकं ह्येतस्मिन् सौम्यपर्व्वते । आशीर्युक्ति सदावेरूरीश्वरस्यार्च्चनं महत् ॥ ४९ ॥ यूयं यिरू
षलेमे तु स्थाने॰स्मद्विमते दृढं । कर्त्तव्यं सततं ब्रूथेशस्य तद्धर्म्यपूजनं ॥ ५० ॥ श्रीयेषूरुवाच ॥
प्रतीहि मां नारि समेति कालो यदा न वास्मिन् गरिज्जीमशृङ्गे । न वास्मदर्च्चे॰पि यिरूषलेमे
॰र्च्चयिष्यथेशं पितरं महान्तं ॥ ५१ ॥ यूयं यदभ्यर्च्चयथाधुनापि न वित्थ हीनैशगृहार्हधर्म्माः । ४९
मृषोदिता मोस्यमुवारिणो॰पि त्यक्त्वा नदङ्गीकृतसत्प्रवक्तॄन् ॥ ५२ ॥ ईशार्पितं वर्त्म वयं तु
धृत्वा संवेलदाविन्मुखभव्यवावां । तं संविदोशं सुविदो॰र्च्चयामो यहूदितो ह्येव विमुक्ति
रेति ॥५३ ॥ समभ्यैति तु कालः सो॰धुना चोपस्थितो यदा । आत्मनैवार्च्चयिष्यन्ति पितरं
सत्यैवच ॥ ५४ ॥ ते वै सत्यार्च्चिनस्तांश्च न तु तीर्थाभिलाषिणः । स्वार्च्चार्थे याचति पिता

ह्यात्मरूपः सदीश्वरः ॥ ५५ ॥ समार्य्योवाच ॥ मसीहं खृष्टनामानं तं वेद्म्यागामिनं परे ।
यस्तदा सकलान्येव शिक्षयिष्यति नः प्रभुः ॥ ५६ ॥ श्रीयेषूरुवाच ॥ अहं नार्य्यधुना यो ऽपि
संवदामि त्वया सह । अहमस्मि मसीहः स सत्यं युष्मत्प्रतीक्षितः ॥ ५७ ॥ गुरुरुवाच ॥ इति
श्रुत्वा समार्य्या सा समादेशं महाप्रभोः । एतत्काले ऽपि तच्छिष्यान् पश्यन्त्यत्र समागतान् ॥ ५८ ॥
महाविस्मयमारूढा तस्यैव वचसो ऽखिलात् । निधाय स्वघटीं यत्नान्नगरं स्वीयमभ्यगात् ॥ ५९ ॥
परियाय बहूंश्चैव स्थितांस्तत्र समार्य्यकान् । एतेन व्यग्रवाक्येन कूपं प्रति समाह्व
यत् ॥ ६० ॥ समार्य्योवाच ॥ अहो मानुषमेकं वै द्रष्टुमायात यो ऽखिलं । कदाचिन्मत्कृतं
प्रोचे स किं खृष्टो भवेन्नहि ॥ ६१ ॥ गुरुरुवाच ॥ तत्संश्रुत्य तु सैकिम्या ये सशेषसमार्य्यकाः ।
भव्यं खृष्टमपैक्षन्त सर्व्वेषां शिक्षकं नृणां ॥ ६२ ॥ तं योसेफकुलोद्भवं मन्यमाना अपि भ्रमात् ।

ह्यीवचः प्रत्ययादीयुर्येष्टितुं बहवोऽपि तं ॥ ६३ ॥ तेभ्यः प्राक् तु प्रभोः शिष्यास्तं प्रत्येता यथो
दितं । कूपेऽन्नं नगरान्नीत्वा संवादे तिष्ठति स्त्रिया ॥ ६४ ॥ विस्मिता अपि तस्मात्ते गुरुं
नाभ्यब्रुवन्निति । किं याचति भवान् किं वा संवक्त्येतत्समार्य्यया ॥ ६५ ॥ आदरात्तु स्थिता
मूकाः संवादो वर्त्तते यदा । अपेतायां स्त्रियामूचुरधुनान्नं गुरोऽद्य दः ॥६६॥ स तु तत्त्वकथा
नन्दसततासक्तमानसः । युष्मदज्ञातमन्नं मेऽस्तीति तान् प्रत्यवोचत ॥ ६७ ॥ ततोऽन्योऽन्यम ५१
पृच्छंस्ते भोज्यं को गुरवे ददौ । तच्छ्रद्धां त्वनुभूयाथ प्रभुरेतद्वचोऽब्रवीत् ॥ ६८ ॥ श्रीयेषूरु
वाच ॥ ममान्नमिदमस्त्येव विभोर्नुन्नवतोऽत्र मां । संकल्पाचरणं तस्य पूरणं चाग्रकर्म्मणः ॥
६९ ॥ किं नु युष्मास्विदं प्रोक्तमुप्तेर्मासचतुष्टये । परिपूर्णे समायाति तदा वै शस्यसंग्रहः ॥
७० ॥ ततो विस्तीर्य्य नेत्रे वै सम्प्रत्यप्यधिपश्यत । क्षेत्राणि च्छेदनार्थं हि गौरवर्णानि पक्वित

॥ ७१ ॥ नित्यजीवाय शस्यं हि तच्छेत्ता वेतनार्हकः । संचिनोति ततो नन्देद्वप्तापि च्छे
दिना सह ॥ ७२ ॥ प्रोक्तमेतद्वचो ह्येको वपत्यन्यश्छिनत्ति च । इति निर्णीतमधुना शस्ये चिन्नात्म
रूपके ॥ ७३ ॥ यस्मिन् नापि श्रमं चक्र तत्संवेतुं मयेरिताः । शस्यं यूयं परेषां हि समुपैत श्रमात्
फलं ॥ ७४ ॥ गुरुरुवाच ॥ इत्यूचे स महाचार्य्यो यः स्वसत्यकथोप्तितः । विध्यज्ञेष्वपि प्रास्ता
बीत् खृष्टीयं विजयं नृणां ॥ ७५ ॥ यान् स्वमृत्योः परेऽप्येषामाह्वानैरनुचारिणां । संयाही ५२
स कुलात्कृत्स्नादात्मसन्नार्चनाय सः ॥ ७६ ॥ एतत्काले तु कूपं तेऽभ्यगच्छन् सिकिमान्नराः ।
ये नारीमन्त्रणाद्द्रष्टुमैच्छंस्तं बहुदर्शिनं ॥ ७७ ॥ प्रार्थयंश्चाप्यवस्थातुं स्वेऽहानि कतिचित्पुरे ।
प्रार्थनानुमतिं चैव चक्रे स वरदः प्रभुः ॥ ७८ ॥ तथेरित्वा स्वशिष्यान् स पुरा गालील्यनी
वृतं । निर्जं तं परमाचर्य्योऽतिष्ठत्सार्द्धं समार्य्यकैः ॥ ७९ ॥ ये तद्दैववचः श्रुत्वा द्वितीयमम्

तात्मकं । प्रतीयुर्बहुला एव तां नारीं चाब्रुवंस्तदा ॥ ८० ॥ सैकिम्या ऊचुः ॥ तं प्रतीमो ऽधुना
नूनं न तु ते वाक्यमात्रतः । उत्सवत्याः स मां प्रोचे मत्क्रियाः सकला इति ॥ ८१ ॥ वयं संश्रुत्य
स्वेव गुरुं तं सर्वदर्शिनं । तं जगन्मोचकं ख्रीष्टं ततो विद्मो ऽपि निश्चयात् ॥ ८२ ॥ गुरुरुवाच ॥
इत्यूचुः श्ररला एते ये पाषण्डा अपि स्मृताः । समार्थ्या न च जानन्तः प्रवक्तॄन् मोसिना
विना ॥ ८३ ॥ यहूद्यमपि तं येषूं नाक्रिम्यं तैर्यथा मतं । तद्वचोमात्रलिङ्गेन ख्रीष्टनाम्नैव मे 53
निरे ॥ ८४ ॥ यं फरीष्यादयस्तस्य समवंशा यहूदिनः । मोसिदाविदिषायादीन् सुविदन्तः
प्रवाचकान् ॥ ८५ ॥ यमन्यन्त स्वमध्ये ऽपि विविधाद्भुतदर्शनैः । लक्षितं सर्वदा भ्रान्त्या गर्व
लोभप्रवञ्चनैः ॥८६॥ इति श्रीख्रीष्टसंगीतायां पुत्राभिषेकपर्वणि (मोसिरचितपञ्चशास्त्रे योनिस्क
न्धस्य त्रयस्त्रिंशतमाष्टचत्वारिंशसर्गाभ्यामनुवाक्यस्कन्धस्य त्वेकादशसप्तविंशसर्गाभ्यां येषूनूनञ

चरित्रस्य चरमसर्गाद् राजचरित्रान्नहमीयचरित्रात् फ्लाव्ययोसेफरचितयहूदिपुरातनप्रब
न्धाच्छान्तयोहन्नेश्चतुर्थसर्गाच्चोद्धृतः) समार्य्यामृतोपदेशनं नाम नवमोऽध्यायः ॥

शिष्य उवाच ॥ आश्चर्य्यं तद्गुरो वाक्यं कियत्त्वेषां प्रतीतये । ऋजूनां सोऽवसन्मध्ये समा
र्य्याणां महाप्रभुः ॥१॥ गुरुरुवाच ॥ इच्छौ नत्वधिकं शिष्य सोऽतिष्ठत्सिकिमे तदा । तेनाश्चर्य्य
तरोऽप्येषां विश्वासः संकरोद्भुवां ॥ २ ॥ इयत्स्थित्वा पुरेऽस्मिंस्तु सिकर्य्युक्ते यहूदिभिः । रौम्यैस्तु ५४
न्यापुलौ फ्लाव्ये समार्य्याणां महौजसि ॥ ३ ॥ ततो गच्छन् स एकाकी दिशं प्रत्युत्तरां पुरि । दुर्गा
यां प्राविशद्येषूर्या समार्य्योदितादितः ॥ ४ ॥ यां पिता दुरहावस्याम्रिर्हि निर्म्माय पर्व्वते ।
राजधानीं ततश्चक्रे दशवंशेस्त्रयेलिनां ॥ ५ ॥ तन्नाम्नातोऽप्यभिहितं राज्यं देशश्च सर्व्वदा ।
पुरी त्वेषोदिता पश्चात् सिवस्ती रौम्ययावनैः ॥६॥ नत्वेतस्यामवस्थाय समार्य्यायां महाप्रभुः।

अतिक्रम्याचिराद्भूमिं जहौ तत्सङ्करोद्भवां ॥ ७ ॥ पिलातस्य च गोपस्य ससमार्य्ययहूदिनां ।
देशान्निःसृत्य गालील्यमगाच्छासितमन्तिपा ॥ ८ ॥ योऽतिदूरगतः पारे यर्द्दनेः संस्थितस्त
दा । नाशृणोदागतिं येष्वो नवा नामापि दुर्न्नृपः ॥ ९ ॥ शिष्य उवाच ॥ तस्मिन् दूरस्थितेऽ
तस्तु भूपे येहन्निबन्धके । किं न केचिद्गलीलायामाद्रियन्तागतं प्रभुं ॥ १० ॥ गुरुरुवाच ॥
इदं तेन वचः शिष्य प्रोक्तं सर्व्वविदा मुहुः । प्रवक्तुर्निजभूमौ वै नादरोऽस्ति कदाचन ॥ ११ ॥ ५५
दृष्टो यिरूषलेमे तु त्राणपर्व्वगतैर्हि यैः । प्रभुसाक्ष्यप्रदानां वै समूहोऽद्भुतकर्म्मणां ॥ १२ ॥ गाली
ल्यास्तेऽखिला अत्र ज्ञात्वाश्चर्य्यं तमागतं । यहूद्यान्नीवृतः प्रीत्या समगृह्णन्त सर्व्वशः ॥ १३ ॥
किंतु तेऽपि तमाप्तं न समार्य्या इव भिन्नजाः । तद्वचोमात्रतः खृष्टमित्यमन्यन्त मोचकं ॥
१४ ॥ स तस्मान्नाभिगत्यापि नशरेन्नगरं निजं । कनां याति स्म यत्रादि चक्रे स्वैश्वर्य्य

दर्शनं ॥ १५ ॥ तत्रायातं तु तं श्रुत्वा कश्चित्कापर्णहूम्यपि । प्रधानो यत्सुतस्तत्राशयिष्ट ज्वर
पीडितः ॥ १६ ॥ तदोत्थाय परेऽह्येव कनायां समुपस्थितः । हैरोद्यस्यार्थयद्येषूं स कर्म्मस
चिवस्तथा ॥ १७ ॥ प्रधान उवाच ॥ गुरो त्वं दययोपेहि चिकित्सार्थं सुतस्य मे । स्वीये
कपर्णहूमेऽद्य मुमूर्षोरपि पत्तने ॥ १८ ॥ गुरुरुवाच ॥ इत्याकर्ण्यार्थनं येषूर्गालील्यानां विमोहनं ।
हेरोद्याचारिणां चादौ भर्त्सयन्नेतदब्रवीत् ॥ १९ ॥ श्रीयेषूरुवाच ॥ यूयं यदि न पश्येत विविधा ५६
मद्भुतक्रियां । सर्व्वनो न कदाचिद्वः सत्प्रतीतिर्भविष्यति ॥ २० ॥ गुरुरुवाच ॥ विक्लवः स
प्रधानस्तु तत्संश्रुत्यापि भर्त्सनं । आश्वेहि तन्मृतेर्भो प्रागिति व्यग्रमवोचत ॥ २१ ॥ ततो
मोक्तुर्दयालोस्तु संशुश्रावेदमुत्तरं । हीनदुःखोऽधुना याहि यतो जीवति ते सुतः ॥ २२ ॥ तद्वाक्यं
स प्रतीत्याथ निःसरन् स्वगृहं प्रति । मार्गे कपर्णहूमात्स्वान् दासानायात ऐक्षत ॥ २३ ॥

*we have come to report good news.*

स्वामिनं ये समीक्ष्याथ हर्षतोऽभ्यब्रुवन्निति । सुवार्त्तार्थं समायामो भवत्पुत्रो हि जीवति ॥
२४ ॥ पिता तद्वार्त्तया तुष्टः स्मरंश्चैव प्रभोर्वचः । तेभ्योऽपृच्छत् क्षणे कस्मिन्नादिस्वास्थ्यम
वाप सः ॥ २५ ॥ इति पृष्टास्तदोचुस्ते द्वितीयप्रहरात्परे । गतेऽष्टममुहूर्त्ते ह्यः स तदा विज्वरो
ऽभवत् ॥ २६ ॥ अथावैत्तं पिता भूतं कालं यस्मिन् कनापुरि । वाक्यं येष्वोऽशृणोदेतद्याहि
जीवनि ते सुतः ॥ २७ ॥ तत्कृपाशक्तिचिह्नेनाकृष्टः कापर्णहूम्यसौ । तं खृष्टमिति मेनेऽथ सस ५७
र्वपरिवारकः ॥ २८ ॥ शिष्य उवाच ॥ गलीलायां कृतानां वै प्रभुणाद्भुतकर्म्मणां । द्वितीयं
तत्कृतं वेद्मि प्रत्येतेन यद्गूद्यतः ॥ २९ ॥ तत्कनापुरि यस्यां तु तदाश्चर्य्यद्वयं कृतं । किं सोऽति
ष्ठत्तदा येषूर्विकृतापो रुगन्तकः ॥ ३० ॥ गुरुरुवाच ॥ नातिष्ठच्छिष्य तस्मात्तु स विनिःसृत्य
पत्तनात् । आसेरवंशभागे यदभूत्कानान्यसंज्ञये ॥ ३१ ॥ ऐशानीं प्रति स भ्राम्यन् भूमिं ता

मविशत् स्थिता । या पुरा वंशयोः सीम्नि नप्थलीजबुलूनयोः ॥ ३२ ॥ सा गलोलाह्रदस्यैव
महतो रोधसि स्थिता । तैबर्य्यस्याधुनोक्तस्य गिन्नेसारस्य चेतरैः ॥३३॥ तस्यामेव स्थितं
कच्छे ह्रदयर्दानिसंगतेः । कापर्णहूम्यनगरं प्रभोस्तन्नवमालयं ॥ ३४ ॥ सर्वभूमिर्हि शिष्यैषा
या ख्याताप्यैत्तयेलिका । पुरा भूमिविभागे ऽतः पश्चाद्दशकुलक्षये ॥३५॥ गालील्यस्याभवद्भा
गे महादेशस्य सम्मता । यः प्राचीनैः स्मृतो देश उत्तरोषितवैरिणां ॥ ३६ ॥ एतद्भूमौ तथा ५८
शिष्य ह्येतस्मिन् समये ऽपि च । पूरणीया विशेषात्सा गीता सौम्यप्रवाचिना ॥ ३७ ॥ या पुरो
क्तापि संक्षेपाद् येषूत्पत्तिप्रबन्धने । प्रादुर्भूते प्रकाशे ऽस्य पुनर्वाच्यातिविस्तरात् ॥ ३८॥ इषाय
उवाच ॥ पुरा पीडितस्त्वापदोघेन यो ऽभूत् सनप्थल्यको जाबुलून्यः प्रदेशः । तमस्तस्य भग्नं म
हातेजसास्ति गलीलामपि व्यापकेनान्यजोर्व्वी ॥ ३९ ॥ उरौ तद्ध्रदे चैव यर्द्दान्युपान्ते भ्रमन्तो

हि लोका अपश्यन् महौजः । अधो मृत्युगर्त्तेऽन्धिकाच्छादितेऽपि समासीनमर्त्यान् प्रकाशोऽध्य
भास्त ॥ ४० ॥ त्वया वर्द्धितास्ते त्वदग्रे च हृष्टा यदापद्धि मद्यान्यसेनेव नष्टा । फलादानहृष्टा
यथा लोप्त्रलब्धा युगोत्क्षेपतुष्टा विभग्नारिदण्डाः ॥ ४१ ॥ त्वमीशाचरः कर्म्म गिद्योनवत्तन्न
योधा यथान्ये तुमूलामृगार्द्राः । अमुष्माञ्जयाञ्चेव वर्म्माणि तेषां सुरत्नानि यान्तीध्मवद्गीति
होत्रं ॥ ४२ ॥ शिष्य उवाच ॥ पूर्व्वोक्तं तन्त्वया गानं तथाचानुमृताप्यतः । सौम्यवार्त्तोद्भवस्यैव ५९
कौशल्याधिपतेः प्रभोः ॥ ४३ ॥ इदानीमादिपद्याभ्यां यः सुतो वर्णितोऽद्भुतः । आचरेत्तं यथा
बध्येऽनसृजं विजयं गुरो ॥ ४४ ॥ गुरुरुवाच ॥ सत्यं तच्छिष्य तस्मात्ते न गीतव्ये पुनर्मया ।
केवलाया तु वार्त्ता सा गलीलाया महौजसः ॥ ४५ ॥ वंशयोर्हि तयोराद्यं हतयोर्दुरसूर्य्यकैः ।
तदापत्पीडितां भूमीमिषायोऽसान्त्वयत्तथा ॥४६॥ यत्रेदानीं प्रविश्यार्य्यो युगतातः स मन्त्रदः

ऐश्वराज्यागतिं वक्तुं स्वशक्त्यारभत स्फुटं ॥ ४७॥ श्रीयेषूरुवाच ॥ संपूर्णः साम्प्रतं कालः स्वर्गराज्यं ह्युपस्थितं । अनुतापं कुरुध्वं वै सुवार्त्तां च प्रतीत मे ॥ ४८ ॥ इति श्रीख्रिष्टसंगीतायां पुत्राभिषेकपर्व्वणि (येषूनूनजचरित्राद्धर्म्मनायकचरित्राद्राजचरित्रादिषायभयवाक्यानां नवमसर्गाच्छान्तमत्थायलूकयोहन्नीनां चतुर्थसर्गाच्छान्तमार्कस्य प्रथमसर्गाच्चोद्धृतो) गलीलाधिभासनं नाम दशमोऽध्यायः ॥

गुरुरुवाच ॥ तद्ध्रदस्य तथा तीरे सीमायां प्रत्नवंशयोः । स जबूलूननप्थल्योरभ्रमद्भासको नृणां ॥१॥ गालील्यैरावृतो व्यूहैर्यैं कौत्स्याद्भुतकर्म्मणां । आकृष्टाः श्रोतुभिश्छंस्तां वार्त्तामीश्वरराज्यकां ॥२॥ चलंस्तत्राप नावौ स धीवरीये तटस्थिते । यदेका जिबिदीयस्य सीमोनस्यापि चेतरा ॥३॥ यो ऽन्द्रियेण सह भ्रात्रा योनजः प्रस्तराभिधः । येषू दक्षिणभूमौ हि शेष

शिष्या इवात्यजत् ॥४॥ स्वपुरे वेथ्सैदे च तद्ध्रदस्य तटोपरि । संस्थितेऽन्यत्र वापि स्वं धैवर्थ्यं
पुनराचरत् ॥५॥ जालानि जिबिदीयेन तावक्षालयतां सह । तत्पुत्राभ्यां च याकोबयोह
न्निभ्यां तटे स्थितौ ॥६॥ तत्काले गुरुरार्य्यः सोऽभ्येत्य योनसुतौ प्रति । उचे मां नयतं नावा
किंचिद्दूरं तटादिति ॥७॥ तदैवारुह्य तरणिं सीमोनाद्रिययोः प्रभुः । किंचिद्दूरं तटात्
स्थित्वा ततो व्यूहानुपादिशत् ॥८॥ उपदेशं समाप्याथ सीमोनमिदमब्रवीत् । निम्ने प्रस्थाय 
जालानि मीनाकृष्टै ह्रदे क्षिप ॥९॥ इत्याज्ञाया असौ हेतुमनुमातुं न शक्नुवन् । किंत्वाज्ञाप
यितुर्बुद्धिं जानन् प्रत्यब्रवीदिदं ॥१०॥ सीमोन उवाच ॥ तावद्रात्रिमपि स्वामिन् कृत्वै
तत्कर्म्म यत्नतः । न प्राप्तं किंचिदस्माभिः किंतु मंस्ये वचस्तव ॥११॥ इत्युक्त्वा प्रभु
वाक्येन स निरक्षेपयद्ध्रदे । जालं यन्मत्स्यनिकरैः परिपूर्णमभूत्क्षणात् ॥१२॥ छेद्यं चाशंक्य

तद्वारादवाह्यान्तरिस्थिताः । साहाय्यमार्थयन्नन्यनौस्थितानिङ्गैर्नरान् ॥१३॥ ये ऽभि
गत्योपकाराय जिबिदीयादयस्तदा । समाकृष्यातियत्नाच्च मत्स्यैर्नावावपूरयन् ॥१४॥
मज्ज्यमाने अपीक्षित्वा ते मत्स्यात्यन्तसंख्यया । सर्वे तत्रस्थिता घोरभीतिसागरविप्लुताः ॥
१५॥ ततो व्यग्रमना येषूं सीमोनः प्रणतो ऽब्रवीत् । सान्निध्याद्याहि दयया पापात्माहं यतःप्र
भो ॥१६॥ तं तु प्रत्यब्रवोद्येषूर्भयं मा याहि योनज । इतो हि ससहायस्त्वं नॄंस्तथा संग्रही ६२
ष्यसि ॥१७॥ अमन्यत वचस्त्वेतत्सीमोनः ससहोदरः । तथा याकोबयोहन्नी तातं हि
त्वापि तत्कृते ॥१८॥ धैवर्य्यं च परित्यज्य जिबिदीयं च नौस्थितं । अनुजग्मुः प्रभुं येन
कार्य्यास्ते नरकर्षकाः ॥१९॥ तैर्वृतः स चतुःशिष्यैः कर्मद्रव्यविवर्जिभिः । स्वीयं कापर्ण
हूमाख्यं प्रविवेश ततः पुरं ॥२०॥ शिष्य उवाच ॥ सर्वसन्न्यासिशिष्याणां प्राप्तवांस्तु

चतुष्टयं । तथा किं स्वपुरे चक्रे स महैश्वर्य्यदर्शनं ॥२१॥ गुरुरुवाच ॥ अद्भुतं विस्तरादेतद् ब्रु
वतो मे निशामय । शनौ विश्रामनाम्न्यह्नि तत्पुर्य्याः सोऽविशत्सभां ॥२२॥ शास्त्रग्रन्थप्रपठ
नात्परे चाशिक्षयन्नरान् । न यथाध्यापकाः किंतु शक्त्या विस्मयकारकः ॥२३॥ स्तब्धेषु च
समस्तेषु भूतग्रस्तोऽत्र कोऽपि वै । तच्छक्त्या व्याप्त एतानि प्रणनाद वचांस्यथ ॥२४॥ भूत
उवाच ॥ हे येषूर्न्नशरेतीय किमस्माकं त्वया सह । हन्तुं नो वेद्म्युपेतं त्वां पुण्यमीशस ६३
मर्पितं ॥२५॥ गुरुरुवाच ॥ इति श्रुत्वा प्रभुर्भूतमपुण्यं प्रत्युवाच तं । नीरवस्त्वं भवैतस्माद्ब
हिर्याहि च मानवात् ॥२६॥ यद्वचःशक्तितो भूतो गृहीतोऽतिस्वनेन सः । निःक्षिपन्नन्तरे
दीनं नतु घ्नंस्तद्बहिर्ययौ ॥२७॥ अतिभीतिं च संप्राप्य नराः सर्व्वे सभास्थिताः । अन्योऽन्य
मभिसंवक्तुमुपचक्रमिरे ततः ॥२८॥ कापर्णहूम्या ऊचुः ॥ किमेतत्कर्म्म किंवेदं नवं शास्त्र

मुपस्थितं । येन भूतगणोऽप्यस्याज्ञां प्रभोरिव मन्यते ॥२९॥ गुरूरुवाच ॥ तथा येष्वो महा
कीर्त्तिस्तत्सभातोऽतिविस्तृता । तत्पुरं सकलां चापि क्षितिं व्याप्नोत्परिस्थितां ॥ ३० ॥
सभायाः सतु निर्गत्य तदागच्छन्निकेतनं । यत्र सोमोनपत्नी वै स्वमात्रापि सहावसत् ॥३१॥
तस्यां तु प्रस्तरश्वश्रामर्द्दितायामतिज्वरात् । अतस्तत्राविशच्छिष्यैश्चतुर्भिस्तैर्वृतः प्रभुः ॥३२॥
अभ्येत्य शयितां तां च प्रगृह्यैव च तत्करं । भर्त्सिते‌ऽपि ज्वरे तत्रोत्थापयामास तां क्षणात् ॥ ६४
३३॥ भूत्वा हतज्वरा साथ तुष्टं जामातरं स्वकं । सभ्रातृद्विसखं गेहे श्रीयेषूं चाप्यसेवत ॥
३४॥ सन्ध्यायां त्वस्तगे सूर्य्ये विश्रामाहारीतिषु । गतास्वथ गृहद्वारे संचिताः सर्व्वनाग
राः ॥३५॥ आनयंश्च गुरोरग्रे नवस्याद्भुतकारिणः । रोगिणः सकलान् स्वीयान् भूतग्रस्तांश्च
सर्व्वथा ॥ ३६ ॥ तान् सर्व्वांश्चापि स स्पृष्ट्वा हस्ताभ्यां वरदः प्रभुः । सुस्थांश्चक्रे तथा भूतांस्तत्र

स्तेभ्यो निरक्षिपत् ॥ ३७ ॥ खृष्ट ईश्वरपुत्रस्त्वमिति नर्दत एव तान् । शठांस्तद्वै दिनोऽप्यार्य्यो न्यषे
धीदीरितुं दृढं ॥ ३८ ॥ तत्परे रात्रिशेषे सोऽनभिभातोषसि स्वयं । विहायैकाक्यतोऽरण्यं प्रार्थना
यैव निर्गतः ॥ ३९ ॥ आरब्धेऽह्नि त्वथो यत्नात्सीमोनाद्याः समीह्य तं । प्राप्य चाभ्यब्रुवन् सर्व्वे त्वा
मन्विच्छन्ति तारकं ॥ ४० ॥ इति श्रुत्वा तु सोऽवादीद्ग्रामेषु निकटेष्वहो । याम तत्रापि शिक्ष्यं हि
मयायातेन तत्कृते ॥ ४१ ॥ ततः सर्व्वां गलीलां स परिबभ्राम तैर्वृतः । ईशराज्यसुवार्त्तायै सर्व्वरुक् ६५
शान्तयेऽपि च ॥ ४२ ॥ दूरतोऽनुगताश्चौघाः सगालील्या यहूदिकाः । यर्द्दानीपारवासाश्च दशपुर्य्युषि
तादयः ॥ ४३ ॥ तान् दृष्ट्वा श्रोतुमिच्छून् स आरूढः पर्व्वतोपरि । श्रेष्ठं प्रोचे वचस्तद्वै शिष्याकर्णयमे
ऽधुना ॥ ४४ ॥ इति श्रीखृष्टसंगीतायां पुत्राभिषेकपर्व्वणि (मत्थायस्य चतुर्थाष्टमसर्गाभ्यां मार्कस्य
प्रथमसर्गाल्लूकस्य चतुर्थपञ्चमसर्गाभ्यां चोद्धृतो) नरसंग्रहणं नामैकादशोऽध्यायः ॥

श्रीयेषूरुवाच ॥ धन्या दीनात्मका यूयं स्वर्गराज्यं हि वो भवेत् । धन्याः संखिद्यमानाश्च सं
प्रहर्षिष्यथ ह्यतः ॥ १ ॥ धन्याश्च क्षान्तमनसो भूमिदायं हि भोक्ष्यथ । धर्म्मक्षुधातृषो धन्याः संत
र्पिष्यथ हि ध्रुवं ॥ २ ॥ धन्या यूयं दयावन्तो यतः प्राप्स्यथ वै दयां । सुपवित्रहृदो धन्या
यतः संद्रक्ष्यथेश्वरं ॥ ३ ॥ विरोधध्वंसिनो धन्याः ख्येया ईशात्मजा यतः । धर्म्मार्थे ताडिता
धन्याः स्वर्गराज्यं ह्यवाप्स्यथ ॥ ४ ॥ धन्याः स्यात तदा यूयं यदा वो मत्कृते नराः । वाधि ६६
ष्यन्तेऽप्यसूयन्तः सर्व्वदुर्व्वचनैर्मृषा ॥ ५ ॥ तदानन्दत हर्षेण व्याप्ताः स्वर्गे ह्यतः फलं । महद्वोऽ
स्ति तथा ह्यग्रेऽवाधन्तैव प्रवाचकान् ॥ ६ ॥ युष्मांस्तु धनिनो धिक् स्यादिह भूतं हि वः सुखं ।
भोज्यतृप्तांश्च धिग्युष्मान् परे हि क्षोत्स्यथ ध्रुवं ॥ ७ ॥ हसतो वोऽपि धिग्यस्माद्रुदन्तो विल
पिष्यथ । धिक् च युष्मान् यदा सर्व्वे प्रशंसिष्यन्ति वो नराः ॥ ८ ॥ तदैवामङ्गला यूयं तथा

हि पितरोऽपि वः। अग्रे मिथ्याप्रवक्तृन् वै प्राशंसन् सत्यवाधकाः ॥ ९ ॥ किंतु मच्छृण्वतो
युष्मान् वच्मीति लवणं भुवः। वन्नैधे विरसं चेत्तु तत्स्वादु स्यात्कथं पुनः ॥ १० ॥ सर्व्वथा तदक
र्म्मण्यं क्षेपणीयं वहिर्ध्रुवं। दलनीयं च मर्त्यानां पादद्वयतलेन वै ॥ ११ ॥ यूयमेव जग
द्दीप्तिर्नगरं तु नगोपरि। यत्संस्थितं कथं गुप्तं तद्भवेद्वीक्षणान्नृणां ॥ १२ ॥ कोऽपि प्रज्वाल्य
दीपं तु नाढकस्यार्पयत्यधः। किंतु दीपद्रुमे भासे सर्व्वेषां हि गृहोदरे ॥ १३ ॥ दीप्तिस्त ६७
थैव युष्माकं मनुष्याग्रे प्रभासतां। यया वः सुक्रिया दृष्ट्वा स्वःस्थं वः पितरं स्तुयुः ॥ १४ ॥
सप्रवक्तुस्तु शास्त्रस्य न नाशायाहमागतः। किंतु तत्सर्व्वपूर्त्यर्थं इति वित्तातिनिश्चयं ॥ १५ ॥
यावद्धि स्वर्गभूम्यौ न लुप्येतां तावदन्तरे। शास्त्रविन्दुर्नलोप्योऽप्यापूर्त्तेरित्येव वच्मि वः ॥ १६ ॥
योऽत एतद्व्यवस्थानां लघिष्ठामपि लङ्घयेत्। शिक्षयेच्च तथा नॄन् स्यान्मद्राज्ये लघुरेव सः ॥

१७ ॥ यस्त्वेताः पालयेत्सर्व्वाः शिक्षयेच्च तथा नरान् । स एव स्वर्गराज्ये꞉तो महान् ख्यातो
भविष्यति ॥ १८ ॥ फरोष्याध्यापकानां हि धर्म्माद्यदि न सन्नरः । धर्म्मो वः स्यात्तदा राज्यं
स्वर्गीयं न प्रवेक्ष्यथ ॥ १९ ॥ इत्यहं वच्मि वः सत्यं ततो यन्नवराज्यकैः । योग्यं यच्च पुरा
ज्ञातं तद्वै मे शृणुताधुना ॥ २० ॥ मा हन्या यस्तु हन्यात्स दण्ड्य इत्युदितं पुरा । शुश्रुवाहं तु
दण्ड्यं वै वच्मि भ्रातृमृषाक्रुधं ॥ २१ ॥ भ्रातरं यस्त्वरेब्रूयात्सभया गर्ह्य एव सः । यस्तु मूर्खे ६८
ति तं ब्रुयात्सोऽप्यग्निनरकार्हकः ॥ २२ ॥ तस्मान्नैवेद्यमात्मीयं वेद्यासन्ने यदानयेः । किंचि
च्चेन्मन्यसे भ्रातुरभियोगार्हकारणं ॥ २३ ॥ तदा तत्र बलिं त्यक्त्वा याहि तं भ्रातरं प्रति । वैरं
तेन च भंक्त्वाथ विभवे बलिमुत्सृज ॥ २४ ॥ प्राड्विवाकं यदाभ्येयाः सह त्वद्वैरिणास्त्वथ ।
मार्गमध्ये स्थितस्तेन मेलनं कुरु यत्नतः ॥२५ ॥ नतुवा सोऽक्षदर्श्यग्रे नयेच्छोधनकाय च । सोऽथ

त्वा घोरकारायां बन्धनार्थं समर्पयेत् ॥ २६ ॥ सत्यं ह्येतद्ब्रवीमि त्वां न तस्यास्त्वं कदाचन ।
निर्गमिष्यसि यावन्न दद्या अप्यन्तिमं पणं ॥ २७ ॥ त्वं मा व्यभिचरेरित्युक्तं शुश्रुव प्राक्तनान्
प्रति । यस्त्वीक्षतेऽनुरागात्स्त्रीं सोऽप्यन्तर्व्यभिचारयेतः ॥ २८ ॥ इत्यहं वोऽधुना वच्मि तत
श्चेत्तव दक्षिणं । नेत्रं स्वाभीष्टदृष्ट्या स्यात्पतनस्यैव कारणं ॥ २९ ॥ तदोत्पाट्य निरस्यापि त्वदर्थं
ह्यक्षिनाशनं । श्रेयस्ते सर्व्वदेहस्य प्रक्षेपान्नरकानले ॥ ३० ॥ चेद्वा दक्षिणहस्तस्ते भवेत्पतनका ६९
रणं । तदा तमपि निश्छिद्य दूरं प्रक्षिप यत्नतः ॥ ३१ ॥ श्रेयो ह्यस्ति त्वदर्थं तदेकस्याङ्गस्य ना
शनं । सर्व्वाङ्गानां तव क्षेपादनिर्वाणाग्निदुर्गतौ ॥ ३२ ॥ स्वभार्य्यावर्जको योऽस्यै त्यागपत्र
ददातु सः । इति पूर्व्वोदितं किंतु मया वः प्रोच्यतेऽधिकं ॥ ३३ ॥ यो हीनां व्यभिचारेण
स्वस्त्रियं हि विवर्जयेत् । व्यभिचारयतीमां स तद्वोढा व्यभिचार्य्यपि ॥ ३४ ॥ मा शपस्वा

नूतं शापांस्त्वीशाय स्वान् समाचर । इत्युक्तं प्राक्तनान् वस्तु वच्मि क्वापि शपस्व मा ॥ ३५ ॥
न स्वर्गेण विभोर्ह्यस्ति स वै सिंहासनं महत् । न पृथिव्यैव शप्तव्यं पादपीठो हि सा वि
भोः ॥ ३६ ॥ नैवं यिरूषलेमेनोर्द्धराजो यत्पुरं न वा । मूर्द्ध्ना नहि शिखैकापि त्वया कार्या
सितासिता ॥ ३७ ॥ किंतु वोऽन्योन्यसंवादेऽथ किमित्येव नेति च । तिष्ठेद्यत्त्वधिकं ताभ्यां दुष्टोत्थं
ज्ञेयमेव तत् ॥ ३८ ॥ नेत्रान्नेत्रं दतो दन्तं दण्डयेरिति प्रोदितं । शुश्रुवाहं तु दुष्टाय नाभि ७०
द्रोतुं दिशामि वः ॥ ३९ ॥ हन्तुं देहि घ्नतेऽसव्यं कपोलं ते तथापरं । वस्त्राभियोगिने ते च
देह्यपि स्वपरिच्छदं ॥ ४० ॥ एकक्रोशसृतेर्विष्टिं योऽपि त्वामुपयोजयेत् । तेन सार्द्धं विना
वादात्क्रोशद्वयमपि व्रज ॥ ४१ ॥ यस्तु त्वां प्रार्थयेत् किंचिद्देहि तस्मै स्वशक्तितः । ऋणं यश्चार्थ
येत्त्वत्तस्तस्मान्मा स्याः पराङ्मुखः ॥ ४२ ॥ प्रतिवासिन्यतिस्निह्येर्द्विषश्चाप्यरये तथा । इत्युक्तं

किंत्वहं वच्मि प्रीणयध्वमरीनपि ॥ ४३ ॥ शपद्भ्योऽप्याशिषं दत्त द्रुह्यद्भ्यश्चाप्यनुग्रहं । ये वोऽ
सूयन्ति वाधन्ते चार्थयेतापि तत्कृते ॥ ४४ ॥ तथा स्वर्ग्यपितुः स्यात तनयाः सदसज्जनान् ।
स्वार्कं भासयतो ह्येव. तद्द्वये चापि वर्षतः ॥४५॥ स्निह्यतो वो हि यूयं चेत् स्निह्येतातः किम
स्ति वः । फलं किं न तथा कुर्य्युः पापिनः करनायकाः ॥ ४६ ॥ यदि वा हितकारान् वः सु
कुर्य्यातैव केवलं । का प्रशंसाधिका वोऽस्ति किं नैवं कुर्य्युरन्यजाः ॥ ४७ ॥ ऋणं मोक्तुं च ७१
शक्तेभ्यो यदि दद्यात केवलं । का प्रशंसास्ति वः किं न तथा दद्युर्हि पापिनः ॥ ४८ ॥ तस्मान्न
केवलान् भ्रातॄन् स्निह्यन्तः सकलांस्त्वपि । सिद्धास्तथैव यूयं स्थ यथा स्वर्गस्थितः पिता ॥ ४९॥
दानं वो नरसाक्षात्तु मास्तु तत्कीर्त्तिलब्धये । यतो वः स्वर्ग्यपितृतः फलं न स्यात्कदाचन ॥
५० ॥ यदा दानं तु कुर्य्यास्त्वं मा यथा धर्म्मलिङ्गिनः । सभास्वध्वसु वा भिक्षूंस्तूरीध्वानैः

समाहूय ॥ ५१ ॥ आदरार्थं नराणां हि धर्म्मं कुर्व्वन्ति ते तथा । तच्चावापुः फलं योग्यमित्यहं
वच्मि वो ध्रुवं ॥ ५२ ॥ कुर्व्वतस्तव दानं तु गोपनेच्छोः सुयत्नतः । न वेत्त्वपि करो वामो
यत्कृतं दक्षिणेन ते ॥ ५३ ॥ अतो गुप्तं भवेद्दानं तवातश्च पितापि ते । यो गुप्तेभ्योऽपि प
श्येत्स व्यक्तं दास्यति ते फलं ॥ ५४ ॥ धर्म्मलिङ्गिवदेव त्वं मार्थयेर्यैं सभान्तरे । शृङ्गाटकेषु
चाप्युत्थाः प्रार्थयन्ते नृदृष्टये ॥ ५५ ॥ तत्फलं ते ह्यवापुर्वै त्वं तु प्रार्थयसे यदा । प्रविश्यान्तर्गृ ७२
हे स्वीये द्वारं चारुध्य यत्नतः ॥ ५६ ॥ तदा स्वां प्रार्थनां पित्रे गुप्तं प्रकुरु स त्वतः । यो गुप्ते
भ्योऽपि पश्येद्वै व्यक्तं दास्यति ते फलं ॥ ५७ ॥ त्वं तु माम्रेडितं कुर्य्याः प्रार्थनास्वन्यजा इव ।
श्रवणं स्वीयदेवानामीक्षमाणा बहूक्तिभिः ॥ ५८ ॥ मा कुरुध्वं तथा यूयं यदावश्यं हि वः
पिता । प्रागपि प्रार्थनाद्वेत्ति प्रार्थयध्वमतस्तथा ॥ ५९ ॥ स्वर्गोषितास्मत्पितरार्य्यं पुण्यं

त्वन्नाम मन्येत सदैव लोकैः । त्वद्राज्यमायातु यथा च नाके तथैव भूमौ भवतु त्वदिच्छा ॥ ६० ॥
प्रदेहि नः प्रात्यहिकान्नमद्य क्षमामहे चैव यथाधमर्णान् । तथा क्षमस्वेश्वर नोऽपि दीनान्
ये तेऽधमर्णा हि बभूविमाघैः ॥ ६१ ॥ परीक्षणे मा पितरानयास्मान् दुष्टस्य शक्तेरपि चाव
नित्यं । तवास्ति राज्यं हि पराक्रमश्च तेजश्च लोकेष्वखिलेष्विति स्यात् ॥ ६२ ॥ अपराधान्
हि यूयं चेत्क्षमध्वे सर्व्वदा नृणां । तथा स्वर्ग्यपिता वोऽपि युष्मदीयान् क्षमिष्यते ॥ ६३ ॥ ७३
सोऽपराधक्षमश्चेत्तु नृभ्यो युष्मत्कृतो नहि । तदा पित्रैव युष्मभ्यं दोषिभ्यो न करिष्यते ॥ ६४ ॥
त्वं यदोपवसस्येव मा भवेर्धर्म्मलिङ्गिवत् । ये म्लानवदनाः स्वीयं दर्शयन्ति ह्युपोषणं ॥ ६५ ॥
तत्तेऽवापुः फलं नृभ्य इत्यहं वच्मि वो ध्रुवं । त्वं त्वभ्यक्तशिरस्कः स्या धौतास्यश्चोपवासकृत् ॥
६६ ॥ तुभ्यं हि न नृणां साक्षात्किंतु गुप्तदृशः पितुः । तथैवोपोषितायाथ स वै दास्यति

तत्फलं ॥ ६७ ॥ अर्थसंचितये कोषं मा कुरुध्वं महीतले । कलङ्को यत्र कीटाश्चादन्ति चौरा
हरन्ति च ॥ ६८॥ स्वर्गे त्वात्मार्थसंचित्यै कोषं कुरुत यत्र न । खाद्यं कीटकलङ्कैर्वै नापहार्य्यं
च मोषकैः ॥ ६९ ॥ युष्माकं यत्र कोषो हि समस्तनिधिको भवेत् । तत्र वो हृदयं चैव स्थास्यत्यत्र
न संशयः ॥ ७० ॥ दीपो नेत्रं शरीरस्य तस्मिंश्चाच्छे स्थितेऽखिलं । देहं भाःपूरितं तस्मिन्नाविले
तु तमः प्लुतं ॥ ७१ ॥ तस्मादन्तःस्थितो यस्ते दीपो भवति सोऽपि चेत् । तमोरूपीकृतोऽस्त्येव ७४
तत्तमोऽथ कियन्महत् ॥ ७२ ॥ स्वामिनौ सेवितुं कोऽपि न शक्नोति नरः सकृत् । प्रीणयेद्धि तयो
रेकं विद्रुह्येच्चापराय सः ॥ ७३ ॥ एकस्मिन् वा मनोयोगी सोऽवमन्येत चापरं । सेवा तथैव
युष्माभिर्न शक्येशकुवेरयोः ॥ ७४ ॥ तस्माद्वो वच्मि जीवार्थं मा तर्कयत यत्नतः । किं खाद्यं
किं च पातव्यं परिधेयं च किं तनौ ॥ ७५ ॥ किं न जीवो हि युष्माकं श्रेयानस्ति तदन्नतः ।

किं न वा तनुरेवं वो वस्त्रेभ्यः श्रेयसी ध्रुवं ॥ ७६ ॥ पक्षिणः पश्यताकाशे यैर्न्नोप्तं वै फलं न वा ।
छिन्नं न संचितं वापि बहुयत्नात्खलान्तरे ॥ ७७ ॥ किंतु तान् वः पिता पाति तेभ्यः किं न
स्थ सत्तराः । कस्तु युष्मासु तर्कैः स्वां पौरुषाद्वर्द्धयेत्तनूं ॥ ७८ ॥ तथा शक्तं न युष्माभिर्लघिष्ठ
मपि कर्म्म चेत् । किं तदा तर्कयेतैव वस्त्राद्यखिलकर्म्मसु ॥ ७९ ॥ पश्यतर्द्धानि पद्मानि न
श्राम्यन्ति वयन्ति न । भूषितानि तु यद्वन्न सलोमापि प्रतापवान् ॥ ८० ॥ इति वो वच्म्यहं ७५
किन्तु तथा चेत्परिधापयेत् । तृणमीशो यदद्यास्ति श्वस्तु चुल्ल्यां निरस्यते ॥ ८१ ॥ तदा
वः सोऽल्पविश्वासाः किं नाधिकमविष्यति । तस्मात्पेयान्नवस्त्रार्थमा स्त व्याकुलमानसाः ॥ ८२ ॥
एतानि ह्यखिलान्येव मार्गयन्त्यन्यजातयः । तदावश्यं च युष्मभ्यं वेत्ति वः स्वर्गिकः पिता ॥
८३ ॥ ऐशं राज्यं च धर्म्मं च यूयं मार्गयतादितः । तदाचामूनि सर्व्वाणि तथैव प्राप्स्यथेश्व

रात् ॥ ८४ ॥ तस्मात्पराहकार्य्येभ्यो मा तर्कयत तानि हि । स्वाहे तर्क्यान्यलं त्वहं सर्वस्मै
निजयापदा ॥ ८५ ॥ विचारयत मा दोषांस्ततो नैव विचारिताः । स्यात मा ब्रूत दण्ड्यत्वं
ततो यूयं न दापिताः ॥ ८६ ॥ यं विचारं हि कुर्य्यातान्येषां कार्य्यः स वः प्रति । यया मित्या
मिमीध्वे च स्याद्वः प्रत्यपि सा मितिः ॥ ८७ ॥ सुमितिं दत्तवद्भ्योऽपि युष्मभ्यमधिकामपि ।
संपीडयोद्धृत्य संचाल्य चैवं दास्यन्ति मानवाः ॥ ८८ ॥ किं वा भ्रातुः स्थितां नेत्रे कणां त्वमव ७६
लोचसे । ननु काष्ठमिह स्वीयेऽनुभवस्यक्षिणि स्थितं ॥ ८९ ॥ भ्रातरिच्छामि ते नेत्राद्वहिष्कर्त्तु
मिमां कणां । इति त्वं वै कथं ब्रूयाः काष्ठे तेऽक्ष्यन्तरे स्थिते ॥ ९० ॥ धर्म्मलिङ्गिन् स्वकादादौ
काष्ठमुत्थापयाक्षिणः । सुदृष्ट्या चाथ निःक्षेप्तुं याहि भ्रात्रक्षितः कणां ॥ ९१ ॥ श्वभ्यो मा दत्त
पुण्यं न कोलायेऽस्यत वा मणीन् । ते मृद्नीयुर्हि तान् वोऽपि विदृणीयुरभिद्रुताः ॥ ९२ ॥ याच

ध्वमथ युष्मभ्यं देयमन्विच्छुनाप्स्यथ । प्राप्स्यथ द्वारमाहन्त ततस्तद्वोऽपि मोक्ष्यते ॥ ९३ ॥ याच
मानो हि लभतेऽन्विच्छुश्चाप्नोत्यशेषकः । द्वारं चाप्याघ्नते यत्नात्सर्वस्मै तद्विमोक्ष्यते ॥ ९४ ॥
युष्माकं कः सुतायान्नं याचमानाय दास्यति । शिलां किं वोरगं तस्मै दास्यत्येव झषार्थिने ॥
९५ ॥ अतो यूयमसन्तोऽपि सुतेभ्यश्चेत्सुयच्छथ । किं नाधिकं पिता स्वर्ग्योऽर्थयद्भ्यो वः सुदा
स्यति ॥ ९६ ॥ यद्यद्वः प्रत्यतः कार्यमन्यैरिच्छेत तत्तथा । कुरुध्वं तान् प्रतीत्येष सारः शास्त्र ७७
प्रवाचिनां ॥ ९७ ॥ वेहध्वं संकटे द्वारे वेष्टुं द्वारं वृहद्धि तत् । स च मार्ग उरुर्येन यान्ति मर्त्य
गणा लयं ॥ ९८ ॥ संकटं त्वस्ति तद्द्वारं संकीर्णो मार्ग एव सः । येनाधिक्रम्यते जीवोऽल्पैश्च
तत्प्राप्यते नरैः ॥ ९९ ॥ भेयं मिथ्याप्रवक्तृभ्यो येऽन्तरीहामृगा इव । लुब्धाः परिहितौ
रण्यत्वच एवाक्रमन्ति वः ॥ १०० ॥ विज्ञेयाः स्वफलात्ते हि कण्टकिभ्यः कथं नराः । द्राक्षाः

किंवा स्नुहीभ्योऽपि चिनुयुर्हेमदुग्धकं ॥ १०१ ॥ तथा भद्रोऽखिलो वृक्षः फलं भद्र प्रसूयते ।
मन्दो वृक्षः फलं चैव मन्दमुत्पादयेत्किल ॥ १०२ ॥ भद्रवृक्षो न शक्नोति सवितुं कुफलानि हि ।
न शक्नोति तथा मन्दः सुफलानि कदाचन ॥ १०३ ॥ यो वृक्षो न फलेद्भद्रं छेद्यः क्षेप्यश्च सोऽ
नले । ततो वै फलमात्रात्तान् विजानीयात शिक्षकान् ॥ १०४ ॥ स्वामिन् स्वामिन्निति तु
मे किं ब्रूथाज्ञावमानिनः । नैतद्गाग्वेक्ष्यति स्वर्गं किंतु मत्पित्रभीष्टकृत् ॥ १०५ ॥ स्वामिन् ७८
स्वामिंस्त्वदीयेन नाम्ना न प्रोच्म किं वयं । निश्चिक्षिपिम भूतान्न नाद्भुताश्चकृम क्रियाः ॥
१०६ ॥ इति मे बहवोऽप्युग्रे दिने वक्ष्यन्त्यहं तु तान् । वक्ष्ये नाज्ञानमपि वो मत्तो यात विध
र्म्मिणः ॥ १०७ ॥ मद्वाक्यानि तु यः श्रुत्वा पालयेदेव तं निभं । धीमतो वच्मि वाटीं स्वां नि
र्म्मातुः प्रस्तरोपरि ॥ १०८ ॥ या पतत्स्वपि वर्षेषु नदीभिश्च परिप्लुता । आहता चापि वा

तैर्न पपात स्थिरमूलका ॥ १०९ ॥ यस्तु वाक्यानि मे श्रुत्वा न पायाद्वच्मि सन्निभं । तं मूर्खस्य
स्वकां वाटीं निर्म्मातुर्वालुकोपरि ॥११०॥ या संपतत्सु वर्षेषु नदीभिश्च परिप्लुता । पवनैराह
ता चैवाधः पपात समन्ततः ॥ १११ ॥ इति श्रीखृष्टसंगीतायां पुत्राभिषेकपर्व्वणि(मत्थायस्य पञ्चम
षष्ठसप्तमसर्गेभ्यो लूकस्य षष्ठसर्गाच्चोद्धृतः) पर्व्वतीयोपदेशो नाम द्वादशोऽध्यायः ॥

गुरुरुवाच ॥ इत्येनमुपदेशं ते श्रुत्वा शक्तिमता यथा । न यथाध्यापकैर्येष्वा तथोक्तं नि ७९
खिला गणाः ॥ १ ॥ अधिकं विस्मयं प्राप्यावतरन्तं महागुरुं । अन्वीयुः पर्व्वतादेव कस्या
श्चिन्निकटे पुरः ॥ २ ॥ तं ततोऽभ्येत्य कुष्ठ्येको नमस्कृत्येदमब्रवीत । प्रभो चेदिच्छसि त्वं मां
कर्त्तुं शक्नोषि निर्म्मलं ॥ ३ ॥ इति श्रुत्वा प्रभुर्हस्तं वितत्य स्पृष्टवांस्ततः । अहमिच्छाम्यतः
पूतो भवेति प्रत्युवाच तं ॥ ४ ॥ तत्क्षणाच्चापि तद्देहाद्गलत्कुष्ठं विनिर्गतं । दयालुः शुद्धकारी

तु तमित्याज्ञापयत्तदा ॥ ५ ॥ श्रीयेषूरुवाच ॥ शृणु मा वद कस्मैचिदेतत्कर्म्म कदाचन । किं
तु निर्याय सकलां मोस्याज्ञां प्रतिपालय ॥ ६ ॥ यज्ञवने स्वशरीरं त्वं दर्शयित्वा निवेदनं ।
लैव्यस्कन्धोदितं सर्व्वं लोकसाक्ष्यकृते कुरु ॥ ७ ॥ गुरुरुवाच ॥ एतां श्रुत्वापि स त्वाज्ञां कीर्त्त्य
निच्छोः प्रभोस्तदा । निर्गत्य सकलेभ्योऽपि शुद्धिवार्त्तामसूचयत् ॥ ८ ॥ शोधकस्तु तदा गन्तुं
दक्षिणां दिशमिच्छुकः । गालील्यान् प्रति संपूर्णे पर्व्वतीयोपदेशने ॥ ९ ॥ त्यक्त्वा तां नगरी
मादौ सशिष्यः समकल्पयत् । वेष्टुं कपर्णहूमेऽपि स्वीये मार्गान्तरे पुरे ॥ १० ॥ तं तु तत्राभि
गच्छन्तं त्यक्ष्यन्तं चाचिरादपि । श्रुत्वा सत्यमतालम्बी रोमीयः कोऽपि गुल्मपः ॥ ११ ॥
प्रियभृत्यचिकित्सार्थं प्रभोरिच्छन्ननुग्रहं । ज्येष्ठान् कांश्चित्समाहूयाभ्युवाचेदं यहूदिकान् ॥
१२ ॥ गुल्माधिपतिरुवाच ॥ मत्कृते प्रेमतो येषूमभियात महागुरुं । यूयं ह्यार्य्यतरा मत्तो

ज्ञाताः पुण्येस्त्रयेलिभिः ॥ १३ ॥ ततो मद्भृत्यमुग्रेण पक्षाघातेन पीडितं । सम्यक् चिकित्सितुं
तं वै याचताद्भुतकारिणं ॥ १४ ॥ गुरुरुवाच ॥ इत्युक्तास्त उदारेणोदासीनेनामुना ततः ।
विशन्तं स्वपुरीं येषूमभिगत्याब्रुवन्निदं ॥ १५ ॥ ज्येष्ठा ऊचुः ॥ दययैहि गुरो रौम्यगुल्मे
शस्य निकेतने । यस्य भृत्यः प्रियो घोरपक्षाघातप्रपीडितः ॥ १६ ॥ इत्थं ह्यनुग्रहं प्राप्तुमर्हो वि
ज्ञेय एव सः । ऐस्त्रयेल्यहितो यस्मान्निर्म्ममे चापि नो मठं ॥१७॥ गुरुरुवाच ॥ वरदस्तु प्रभुर्भृत्यं ८१
चिकित्सिष्याम्यहं गतः । इति प्रत्युच्य तैः सार्द्धं ययौ रौम्यगृहं प्रति ॥ १८ ॥ निकटे चापि गे
हस्योपस्थितं प्रेरितास्तदा । केऽपि गुल्मेशसुहृदस्तस्योदैरन्निदं वचः ॥ १९ ॥ गुल्माधिपति
रुवाच ॥ मा क्लिश्यस्व प्रभो ते हि मद्गृहान्तः प्रवेशनं । अवाप्तुं नास्म्यहं योग्यस्ततो नागां
त्वदन्तिके ॥ २० ॥ किंत्वीर्य्यास्त्वं वचोमात्रं नाथाज्ञारूपकं ततः । मद्भृत्यो निश्चयं रोगी चि

कित्सां प्राप्स्यति क्षणात् ॥ २१ ॥ अहं ह्यन्यैर्नियुक्तोऽपि वाहिनीनायकादिभिः । नियोजि
तान् मयाप्येवं सैन्यानाज्ञापयामि ह ॥ २२ ॥ गच्छेति च मयादिष्टो यात्येकोऽन्यस्तथोदितः ।
एहीत्यायाति भृत्यश्च कुर्वित्युक्तः करोति तत् ॥ २३ ॥ गुरुरुवाच ॥ इति संश्रुत्य रौम्यस्य तस्य
प्रत्ययलक्षणं । विस्मितः प्रभुरेतद्वै स्वानुगेभ्योऽब्रवीद्वचः ॥ २४ ॥ श्रीयेषूरुवाच ॥ यावानेतस्य
विश्वासोऽन्यजस्यास्ति मया क्वचित् । नैस्रयेलेष्वपि प्राप्तस्तावानित्येव वच्मि वः ॥२५॥ भूयांसो ८२
ऽपि समेष्यन्तः प्रतीच्याः प्राग्दिशोऽपि च । अब्रहेशहकाभ्यां च याकोबेन च ते सह ॥२६॥ स्वर्ग
राज्ये समासीरन् किंतु राज्यसुता अपि । वहिस्तमसि निःक्षेप्याः क्रन्ददन्तस्वनालये ॥ २७॥
किंतु त्वं कुशलं याहि सांप्रतं गुल्मनायक । यथा च प्रत्ययः सम्यक् तथा ते भवतु ध्रुवं ॥ २८ ॥
गुरुरुवाच ॥ इत्युक्तं धर्म्म्यरौम्याय गुल्माधिपतये तदा । तद्भृत्योऽपि क्षणात्तस्मात्पक्षाघाताद्

मुच्यत ॥ २९ ॥ तत्परे ऽह्नि तु येषूर्न स्थित्वा कापर्णहूमिषु । व्रजन् याम्यदिशं पुर्य्यां नैमाख्या
यामुपस्थितः ॥ ३० ॥ कतिचिच्चापि तं शिष्या व्यूहो ऽन्येषां महानपि । तस्मिन् येरूषलेम्ये वै
गच्छतामन्विताः पथि ॥ ३१ ॥ गोपुरान्नैमपुर्य्यास्तु नृस्कन्धैर्विहिरौह्यत । मृतः को ऽप्यद्वितीयो
यो विधवाया अभूत्सुतः ॥ ३२ ॥ तस्य माताप्यसौ तत्र निर्यान्ती वाहकैः सह । पुरवास्या
वृता ऽवीरारोदीद्दुःखपरिप्लुता ॥ ३३ ॥ तां दृष्ट्वा करुणाविष्टो मा रौत्सीरित्यवोचत । येषू ८३
रथ शवाधारमभिगत्य समस्पृशत् ॥ ३४ ॥ वाहकेषु स्थितेष्वत्रोत्तिष्ठ मद्वाक्यतो युवन् ।
इत्येवोच क्षणाच्चैष उत्थायारभतेरितुं ॥ ३५ ॥ यः क्षणे प्राक् शवो ऽभूत्तु स्वमात्रे तं समर्पितं ।
विस्मयेनैव मुग्धार्यै दृष्ट्वा व्यूहा भयं गताः ॥ ३६ ॥ महानीशप्रवक्ता नो मध्य एतो विभुश्च वै ।
स्वलोकमालुलोचे ऽपीत्यूचुस्ते संस्तुतेश्वराः ॥ ३७ ॥ तत्कीर्त्तिरपि विस्तीर्णास्यां गलीलायहू

द्ययोः। सीम्नि दक्षिणभूमौ च सर्वस्यां सत्पुरेऽपि च ॥ ३८ ॥ इति श्रीखृष्टसंगीतायां पुत्राभिषेकपर्व्वणि (मोसिरचितपञ्चशास्त्रे लैव्यस्कन्धस्य चतुर्द्दशसर्गाच्छान्तमत्थायस्य सप्तमाष्टमसर्गाभ्यां शान्तमार्कस्य प्रथमसर्गाच्छान्तलूकस्य पञ्चमसप्तमसर्गाभ्यां चोद्धृतो) मोचकवाङ्माहात्म्यं नाम त्रयोदशोऽध्यायः ॥

गुरुरुवाच ॥ अशृणोदपि बद्धः स यद्दीनैः पारनीवृति। दुर्गेऽग्रगो महान् भीमेऽद्भुतकर्म्माणि ८४
सत्प्रभोः ॥ १ ॥ तत्सर्व्वं हि हिताः शिष्या आर्य्याय गुरवे तदा। स्नापकायावदन् भूपे प्रवृत्ते युद्धकर्म्मसु ॥ २ ॥ चिरेष्टमभिषिक्तस्य गलीलायामसौ नवं। येषूर्नास्थापयद्राज्यं कीर्त्तिनोऽप्यखिलैर्भृशं ॥ ३ ॥ इति तैर्ज्ञापितो बद्धो जकरीयोद्भवस्तदा। तेभ्यो वृत्वा द्वयं यत्नादेतदाज्ञापयद्बुधः ॥ ४ ॥ योहन्निरुवाच ॥ तमाश्वभिगतौ शिष्यौ पृच्छतं मत्कृते यथा। आगा

मी स महान्‌किं त्वं किंवापेक्ष्यो॰न्य एव नः ॥ ५॥ गुरूरुवाच ॥ इत्यादिष्टौ तदा शिष्यौ निःसृत्यो
यान्मखैरूषः । नलतीरां नदीं तीर्त्वा यहूद्यं देशमागतौ ॥ ६ ॥ तत्रातिप्रचलन्तौ च तौ गलीला
न्तिके॰प्यरं । येषूं नैमातप्रगच्छन्तं दक्षिणं प्रत्यवाप्नुतां ॥ ७ ॥ व्यूहैर्यिरूषलेमं तु तथा गच्छद्भि
रन्वितः । बहून् नानागदार्त्तांश्च सरण्यां सो॰चिकित्सयत् ॥ ८ ॥ तन्मध्ये॰यचरस्यैतावनुगौ तं
समाश्रितौ । स्वगुरोरेव तद्वाक्यं मोचकं प्रत्युदैरतां ॥ ९॥ योहन्निशिष्यावूचतुः ॥ स्नापकः ८५
किल योहन्निरावां त्वां प्रष्टुमैरयत् । आगामी स महान् किं त्वं किंवापेक्ष्यो॰न्य एव नः ॥
१० ॥ श्रीयेषूरुवाच ॥ परिदृश्य युवां यातौ तदा योहन्नये॰खिलं । यद्दृष्टं यच्छ्रुतं चात्र तद्वै
सूचयतं ध्रुवं ॥ ११ ॥ अन्धा वा अनुपश्यन्ति चलन्त्यपि च पङ्गवः । कुष्ठिनश्चापि पूयन्ते शृण्वन्ति
वधिरा अपि ॥ १२ ॥ उत्तिष्ठन्ति गतप्राणाः सुवार्त्ताप्तापि दुर्विधैः । यं त्ववस्था मदीया न

पातयेद्धि स मङ्गलः ॥ १३ ॥ गुरुरूवाच ॥ प्राप्यैतत्स्पष्टलक्ष्मौघं राज्ञ आगामिनस्तु तौ । अपे
क्ष्यस्याखिलैः शास्त्रहितमार्गस्थधार्म्मिकैः ॥ १४ ॥ तत्सर्व्वं स्वीयगुरवे निबद्धायापि वै तदा । घो
रान्तशृङ्खलैर्हर्षाद्ध्रुवं सूचयितुं गतौ ॥ १५ ॥ तयोश्चापेतयोर्व्यूहान् प्रभुस्तत्र परिस्थितान् ।
यहूद्यादीनिदं प्रोचे योहन्निस्तावकं वचः ॥ १६ ॥ श्रीयेषूरूवाच ॥ किं द्रष्टुं यूयमखिला यद्दो
निप्रान्तरे गताः । किं नलं चपलं वातैः क्षुभ्यमाणं निरन्तरं ॥ १७ ॥ अथवा जग्म किं द्रष्टुं ८६
किं मृद्वंशुकभूषितं । तन्न ते सौम्यवस्त्रा हि विद्यन्ते राजवेश्मसु ॥ १८ ॥ अथवा जग्म किं
द्रष्टुं किं महेशप्रवाचिनं । नूनमेवेति वो वच्मि प्रवक्तुश्चापि सत्तरं ॥ १९ ॥ यतः सो ऽयं प्रवक्ता
य ईशदूतेन भाषितः । त्वदग्रे॰हो॰ध्वप्रस्तुत्यै मच्चरं प्रेरयाम्यहं ॥ २० ॥ इत्युक्तात्वोश्वरचराद्यो
हन्नेः स्नापकान्नहि । आसीन्नार्युद्भुवां मध्ये कश्चित् क्वापि महत्तरः ॥ २१ ॥ किंतु स्वर्गीय

राज्ये यो लघिष्ठोऽपि भवेन्नरः । योहन्नेरपि नं विन्न भविष्यन्तं महत्तरं ॥ २२ ॥ तच्छ्रोतारः
समस्तास्तु करसंग्राहिणोऽपिच । ऐशं स्वीचक्रिरे धर्म्मं योहन्निजलसंस्कृताः ॥ २३ ॥ फरी
ष्याध्यापकास्त्वेव तेन न स्नापिता जले । ततः स्वार्थे निराचक्रुरीश्वरस्यापि मन्त्रणं ॥ २४॥
योहन्नेस्तु परे नित्यमिदानीं चापि यत्नतः । स्वर्ग्यमाक्रम्यते राज्यं विक्रान्ताश्च हरन्ति
तत् ॥ २५ ॥ नित्यं तत्प्राक् स्थितं शास्त्रं सर्व्वं चेशप्रवाचिनः । आगते तु चरे तस्मिन् संपूर्णा ८७
भून्नदावली ॥ २६ ॥ स्वीकार्य्यं यदि युष्माभिरप्ययं यः प्रतिश्रुतः । मलाकीयेन सोऽलीयः शृणोतु
श्रुतिमानिंद ॥ २७ ॥ वर्त्तमानान्मनुष्यांस्तु केषां वक्ष्यामि सन्निभान् । ते बाला इव येऽन्यो
न्यमासीना आहुरापणे ॥ २८ ॥ वादयत्सु किलास्मासु वेणुं यूयं न नृत्यथ ॥ विलपत्स्वपि चा
स्मासु यूयं न रुदिथाहिताः ॥ २९ ॥ अभोजी स ह्यपायी च यदा योहन्निरागतः । तदा ते

प्रावदन् लोका भूतग्रस्तोऽस्त्यसाविति ॥ ३० ॥ किंतु भोजी च पायी च नरपुत्रो यदागतः ।
उच्चुर्गृध्रः सुरापश्च पापिनामप्यसौ सखा ॥ ३१ ॥ इति तेऽसूयका अज्ञाः किंतु या संस्थितोभयोः ।
सद्बुद्धिः स्वसुतैः सर्वैर्विज्ञाता स्वीकृता च सा ॥३२ ॥ गुरुरुवाच ॥ तथा योहन्निनाम्ने यो नलारण्ये
ऽपि लक्षितः । वनमाध्वीकभोक्त्रैव स्थिरेणाघविरोधिना ॥ ३३ ॥ स प्रभुर्नृसुतः स्वीयं प्रशंसायगं
तदा । तं प्रत्यप्यन्तिमां प्रैर्य्य स्ववार्त्तां बन्धपीडितं ॥ ३४ ॥ तथोक्तवन्तमेकस्तु येषूं तत्पुर ८८
वासिनां । सीमोनाख्यः फरीष्योऽपि स्वगृहेऽत्तुं न्यमन्त्रयत् ॥ ३५ ॥ तत्र गत्वा च भुञ्जानं फरीष्येण
सह प्रभुं । अहो काप्यभ्ययच्छत्त्री पापिनी तत्र विश्रुता ॥ ३६ ॥ सा हि तत्र तमासीनं प्राक्
श्रुत्वाघविमोचकं । सुविक्कणदृशत्पात्रं सुगन्धैः पूर्णमानयत् ॥ ३७ ॥ पदोस्तस्य पतन्ती च रुदन्ती
चाश्रुधारया । अङ्घ्री अक्षालयत् सा वै प्रक्षरन्त्या निरन्तरं ॥ ३८ ॥ स्वमूर्द्धश्चापि केशैस्तौ

मुहुर्मुहुरमार्जयत् । चुम्बन्ती पर्यलिम्पच्च यत्नात्सा चन्दनादिभिः ॥ ३९ ॥ दृष्ट्वैतत्त्वद्भुतं
जानन् फरीष्यः स निमन्त्रकः । स्वचित्ते चिन्तयच्चेत्स्यात्सत्य ईशप्रवाच्ययं ॥ ४० ॥ तदा
किं न सुविद्याद्वि कीदृश्यैषोऽधुना स्त्रिया । स्पृश्यते विदितेयं हि पापिनीत्यखिलैरिह ॥ ४१ ॥
तच्चित्तं तु प्रभुर्ज्ञात्वाब्रवीदिच्छामि किंचन । वक्तुं सीमोन त इति सत्ववादीड्गुरो वद ॥ ४२ ॥
श्रीयेषूरुवाच ॥ द्वावास्तामधमर्णौ वा एकः पंचशतं तयोः । मुद्रापादानुदधरत्पंचाशच्चापर ८९
स्तथा ॥ ४३ ॥ न किंचिदपि दातुं तु शक्तयोस्तदृणं तयोः । उत्तमर्णः प्रसादेन सम्यगक्षमत स्वयं
॥ ४४ ॥ कतरोऽथ तयोर्ब्रूहि त्वं सीमोनाधमर्णयोः । उत्तमर्णं दयालुं तमधिकं प्रीणयिष्यति
॥ ४५ ॥ परीष्य उवाच ॥ योऽधिकोद्धारभारेण पीडितोऽभूद्गुरो स वै । अधिकं तद्विमोक्तारं
प्रीणयेदिति मे मतिः ॥ ४६ ॥ गुरुरुवाच ॥ एतदाकर्ण्य सत्यं वै प्रत्यवादीरिति प्रभुः ॥ उक्त्वा

तां दर्शयन्नारीं फरीष्यं पुनरब्रवीत् ॥ ४७ ॥ श्रीयेषूरुवाच ॥ इमां त्वं वीक्षसे नारीं सीमोनाहं त्वदालये । विष्टा न त्वत्करात्किंचिदपि पाद्यमवाप्नुवं ॥ ४८ ॥ किंत्वेषा मत्पदौ यत्नादप्यक्षालयदश्रुभिः । केशैश्चापि स्वकैस्तौ वै पुनःपुनरमार्जयत् ॥४९॥ प्रविशन्तं गृहे ते मां नाचुम्बः किंत्वियं मम । नता तत्कालतोऽप्यङ्घ्री संचुचुम्ब निरन्तरं ॥ ५० ॥ तैलेनापि शिरस्त्वं मे नानञ्जिथ कदाचन । एषा तु चन्दनाद्यैर्मे पर्यलिम्पत्पदावपि ॥ ५१ ॥ ततोऽहं त्वामृतं वच्मि तत्पापानि बहून्यपि । विमुक्तानि महाप्रेम्णस्तस्यां लक्ष्म हि दृश्यते ॥ ५२ ॥ यो विमुक्ताल्पपापस्तु प्रीणयेदल्पमेव सः । किंतु ते नारि पापानि विमुक्तानीति मे शृणु ॥ ५३ ॥ गुरुरुवाच ॥ इति श्रुत्वाखिलास्तत्र ये स्थिताः सहभाजिनः । कोऽयं पापविमोक्तेति हृदि ते समचिन्तयन् ॥ ५४ ॥ येषूस्तु न मनस्तेषु संयोज्य स्त्रीं तदा पुनः । अभ्यूचे कुशलं याहि मुक्ता त्वं श्रद्धया स्वया

॥ ५५ ॥ यिरूषलेम्यमार्गे तु स प्रचल्य ततो वृतः । यात्रिकैर्बहुभिः पुर्य्यां महत्यामप्युपस्थितः ॥
५६ ॥ इति श्रीखृष्टसंगीतायां पुत्राभिषेकपर्व्वणि (मलाकीयभव्यवाक्येभ्यो मत्थायस्यैकादशसर्गा
त्मकस्य सप्तमसर्गाच्चोद्धृतो) दुर्विधार्थसुवार्त्ता नाम चतुर्द्दशोऽध्यायः ॥

शिष्य उवाच ॥ स प्रभुस्तु तदा कस्मात् स्वसंस्कृत्याः परे पुनः । गतो यिरूषलेमेऽथ यात्रिकै
र्बहुभिर्वृतः ॥ १ ॥ गुरुरुवाच ॥ त्राणपर्व्वकृते पूर्व्वं यथा तत्र गतः प्रभुः । तथेदानीं द्वितीयाय ९१
पंचाशत्ख्यातपर्व्वणे ॥ २ ॥ उभयोर्ह्यखिलैर्योग्यं धर्म्मशीलैस्त्रयेलिभिः । दूरादपि समायातुमीश्वर
स्यार्य्यमन्दिरं ॥ ३ ॥ किंतु यद्दर्शितं येष्वाद्भुतं कर्म्म महापुरे । एतस्मिन्समये यच्च प्रोक्तं तच्छृणु
शिष्य मे ॥ ४ ॥ आसीन्मेषापणे तत्र पंचघट्टसमावृता । यज्ञीयपशुशुद्ध्यर्थं शुभा पुष्करिणी
स्थिता ॥ ५ ॥ सा दयालयनाम्नी वै यतस्तद्वारि लोडिते । परिचारकहस्तेन चिकित्साप्ता

रुजार्त्तिभिः ॥ ६ ॥ तेष्वतः पंचघट्टेषु वितर्द्याच्छादितेषु वै । समास्तान्धाबलक्षीणपङ्ग्व्यूहो
निरन्तरं ॥ ७ ॥ पर्व्वपूर्व्वे शनौ तां तु येषूः पुष्करिणीं गतः । अष्टत्रिंशाब्ददौर्बल्यपीडितं नर
मैक्षत ॥ ८ ॥ चिरादपि तथाभूतं तं सुजानन्नवोचत । स्वास्थ्यं किमिच्छसीत्युक्तः शयानस्त्व
ब्रवीदसौ ॥ ९ ॥ दुर्ब्बल उवाच ॥ न महाशय कोऽप्यस्ति हितो यो लोडितेऽम्भसि । मां नयेद्गट्ट
तोऽन्यस्तु मत्प्राग्विशति सन्ततं ॥ १० ॥ गुरुरुवाच ॥ इदं श्रुत्वा प्रभुः प्रोचे खट्वामुत्थाप्य वै चल । ९२
तत्क्षणाच्चापि सुस्थः स भूतः सम्यक् चकार तत् ॥ ११ ॥ यहूद्यास्तु चलन्तं तं दृष्टा केचित्ततो
ऽब्रुवन् । अद्य विश्रामवारोऽस्ति खट्वां त्वं वहसे कथं ॥ १२ ॥ दुर्बल उवाच ॥ यो मां सुस्थं
चकाराद्य चिराद्दौर्बल्यपीडितं । स एवेदमवादीन्मां खट्वामुत्थाप्य वै चल ॥ १३ ॥ यहूद्या
ऊचुः ॥ कः खट्वां परिवोढुं त्वां तथा मर्त्य उपादिशत् । विश्रामाहे तदापि प्राक् प्रवृत्तो रोग

मोचने ॥ १४ ॥ गुरुरुवाच ॥ इति संपृच्छतस्तान्न प्रतिवक्तुं शशाक सः । नाभ्यजानाद्धि येशूं
सोऽबलः स्वस्वास्थ्यकारिणं ॥ १५ ॥ बहुव्यूहावृतायाश्च पुष्करिण्याः प्रभुस्तदा । तच्चिकित्सां
समाचर्य्य गुप्तितोऽन्तर्हितोऽभवत् ॥ १६ ॥ विश्रामाहे समाप्ते तु यदायातं दिनं महत् । पंचा
शत्पर्व्वणः सर्वैरैस्रयेलैः समादृतं ॥ १७ ॥ तदा धर्म्मकृते येषूः स्थित ईश्वरमन्दिरे । दृष्ट्वा तं
दुर्बलं मध्येऽर्च्चिनामभ्यब्रवीदिदं ॥ १८ ॥ श्रीयेषूरुवाच ॥ अहो त्वं प्रापिथ स्वास्थ्यं मा कार्षीः ९३
किल्बिषं पुनः । न चेदप्यधिका पीडा पूर्वस्यास्त्वयि संपतेत् ॥ १९ ॥ गुरुरुवाच ॥ इदं श्रुत्वा
गतोऽसौ तान् मन्दिरस्थान् यहूदिनः । गर्हकानब्रवीत्सोऽयं स्वदुं यो वोढुमादिशत् ॥ २० ॥
इति ते ज्ञापितास्तेन येषूवैरोष्टमानसाः । अभिगत्य ततो वेगान्मन्दिरेऽभ्यब्रुवन्निदं ॥
२१ ॥ यहूद्या ऊचुः ॥ यं चतुर्थाज्ञया मोसिः शनौ विश्राममादिशत् । त्वंकिमर्थं तमुच्छिद्य

परानुच्छदयस्यपि ॥ २२ ॥ श्रीयेषूरुवाच ॥ येन संपूर्णसर्गेण विश्रामाज्ञा कृता स हि । मत्पितातो
ऽपि कुरुते कुर्वेऽहमपि वै तथा ॥ २३ ॥ गुरुरुवाच ॥ एतत्प्राप्योत्तरं तेऽतोऽधिकमप्यभि
लेषिरे । प्रभुं हन्तुमतिक्रोधादन्योऽन्यं च तथोचिरे ॥ २४ ॥ यहूद्या ऊचुः ॥ विश्रामाज्ञां पुरा
पुण्यां स लंघित्वा स्वकर्म्मभिः । शप्यो गालील्य एतर्हि गरीयोऽप्यघमावरत् ॥ २५ ॥ ईश
तुल्यं स आत्मानं चक्रेऽस्मज्ञोचरेऽत्रपः । विश्वकृन्मत्पितेत्युक्त्वा मृत्युदण्ड्यः स किं न हि ॥ २६ ॥ १४
गुरुरुवाच ॥ इत्युक्तं तैः स्वधर्म्मार्थे गर्व्वमोहितमानसैः । न दृष्टा ह्यनुकम्पैशी पुत्रकर्म्मसु भान्त्यपि ॥
२७ ॥ गर्हिणां तु प्रभुस्तेषां चेतांस्येवं वचांसि च । विज्ञायेदं तदा प्रोचे तेभ्य ईश्वरमन्दिरे
॥ २८ ॥ श्रीयेषूरुवाच ॥ सत्यं युष्मान्ब्रवीम्येतन्न किंचिच्छक्नुयात्स्वयं । कर्त्तुं यद्यत्तु कुर्व्वन्तं
पितरं पुत्र ईक्षते ॥ २९ ॥ यद्यत्कर्म्म पिता कुर्य्यात्पुत्रोऽप्येवं करोति तत् । तं प्रियं हि पिता सर्व्वं

दर्शयत्यात्मना कृतं ॥ ३० ॥ एतेभ्योऽपि महीयांसि दर्शयिष्यति सोऽचिरात् । कर्म्माणि येभ्य
उद्गाढं विस्मयं यूयमाप्स्यथ ॥ ३१ ॥ यथा जीवयति प्रेतान् पिता पुत्रस्तथेच्छया । नापि
पित्रा विचार्य्योऽस्ति न्यस्तं पुत्रे तु कर्म्म तत् ॥ ३२ ॥ अतः पुत्रस्तथादृत्योऽखिलैरेवं यथा पिता ।
पुत्रो यैर्नादृतस्तैर्नापि तत्प्रेरयिता पिता ॥ ३३ ॥ सत्यमेतद्धि वो वच्मि मद्वाक्यं संशृणो
ति यः । मत्संप्रेरयितारं च विभुं विश्वसिति ध्रुवं ॥ ३४ ॥ स प्राप्तानन्तजीवोऽपि दण्डं नापि ९५
कदाचन । गमिष्यत्यधुनोत्तीर्णो मृत्युतः स हि जीवने ॥ ३५ ॥ कालस्त्वैत्यधुनाप्यत्रोपस्थितः
स मृता यदा । ईशपुत्रवचः श्रुत्वा संजीविष्यन्ति निश्चयं ॥ ३६ ॥ इति वो वच्मि यद्वद्धि
स्वयंजीवी पिता स्थितः । तद्वदेव स वै पुत्रे स्वयंजीवित्वमादधौ ॥ ३७ ॥ नृणामप्यक्षदर्शित्व
शक्तिं तस्मिन् समार्पयत् । यस्मात्स नरपुत्रोऽस्ति संस्थितोऽप्यात्मजो विभोः ॥ ३८ ॥ अत्र मा

विस्मयध्वं वै कालो ह्यैति यदाखिलाः । शवगर्त्तोषितास्तस्य संश्रोष्यन्ति वचः स्थिरं ॥ ३९ ॥
उद्गमिष्यन्ति ते चापि जीवनाय सुकारिणः । तथा मन्दप्रवृत्ताश्चोद्गच्छेयुर्दण्डलब्धये ॥ ४० ॥
स्वयमेव न शक्नोमि किंचित्कर्त्तुं पितुर्विना । यं शृणोमि विचारं हि स मया क्रियते सदा ॥ ४१ ॥
मद्विचारस्तु धर्म्योऽस्ति यतः स्वां नहि किंतु मां । संप्रेरितवतस्तस्यैवेच्छामनुचराम्यहं ॥
४२ । यदि स्वार्थमहं साक्ष्यं प्रदद्यां तत्तदानृतं । किंतु मे साक्ष्यदोऽन्योऽस्ति वेद्मि यं सत्यसाक्षिणं ९६
॥ ४३ ॥ योहन्निं प्रति यूयं वै किं न प्रैरयत स्वयं । लैव्यान् पृष्टै तदा चापि सत्यसाक्ष्यं
स वोऽददात् ॥ ४४ ॥ युष्माकं त्राणमात्रार्थं वाक्यमेतद्ब्रवीम्यहं । न कस्मादपि साक्ष्यं हि लब्धुं
योग्यं मया नरात् ॥ ४५ ॥ ज्वलद्दीजस्विदीपो वै स आसीत्प्रान्तरोषितः । तद्दीप्त्या चाचिरं
यूयमप्यानन्दितुमैच्छत ॥ ४६ ॥ तत्साक्ष्यात्तु महीयोऽपि मदर्थे तेषु विद्यते । यानि संपूरणी

यानि पिता कर्म्माणि मे ददौ ॥ ४७ ॥ पित्राहं प्रेरितो भूमावित्ति साक्ष्यं हि निश्चितं । मत्कृ
तान्यधुना तानि ददत्यखिलगोचरे ॥ ४८ ॥ यस्य यूयं तु न क्वापि शब्दं शुश्रुव नापि वा ।
रूपं ददृश साक्ष्यं मे स पितैव स्वयं ददौ ॥ ४९ ॥ किंतु तस्य विभोर्वाक्यं युष्मदन्तःस्थितं न
हि । यतो मां प्रेरितं तेन न विश्वसिथ गर्हकाः ॥ ५० ॥ अनुशीलयथ ग्रन्थान् पुण्यान् नित्यं
हि जीवनं । तेभ्योऽनुभवथ प्राप्तुं तेऽपि मे साक्ष्यदाः खलु ॥ ५१ ॥ जीवनाप्त्यै न माभ्येतुमिच्छ ९७
थातो न वोऽस्त्यलं । ईशप्रेमेत्यहं वेद्मि कीर्त्यलिप्सुर्मनुष्यतः ॥ ५२ ॥ पितुर्मां ह्यागतं नाम्ना
न स्वीकुरुथ दुर्हृदः । चेत्त्वागच्छेत्स्वनाम्नान्यस्तं नूनं स्वीकरिष्यथ ॥ ५३ ॥ अन्योऽन्यं तु यशो
यूयं नेशमात्रोत्थसद्यशः । याचमानाः कथं मूढाः प्रत्येतुं शक्नुथ ध्रुवं ॥ ५४ ॥ युष्मान् पित्रेऽप्रती
त्यर्थेऽभियोक्ष्यन्तं तु मां परे । मा मन्यध्वं परो ह्यस्ति योऽभियोक्ष्यति वो नरः ॥ ५५ ॥ स मो

सिर्यत्र वोऽप्याशा यदि तं विश्वसेत हि । तदा मां विश्वसेतापि तद्ग्रन्थैर्हि प्रकीर्त्तितं ॥ ५६ ॥
किंतु चेन्नापि तद्ग्रन्थान् विश्वसेत समन्ततः । तदा वै मम वाक्यानि विश्वसेत कथं दृढं ॥
५७ ॥ गुरुरुवाच ॥ तथा पर्व्वणि तस्मिन् वै मोसिशास्त्रप्रकीर्त्तिते । मोसिप्रोक्तो महीयान्स
प्रवाची समुपादिशत् ॥ ५८ ॥ द्वितीयः संस्कृतेः पश्चात्प्रभोः स स्वीयमन्दिरे । प्रवेशो वै यथा
द्यः स भूतो यत्त्राणपर्व्वणि ॥ ५९ ॥ ऐश्वरानुग्रहस्यैवं चित्रलक्ष्माङ्कितोऽपि सः । द्रोहनिन्दाजि ९८
घांसाभिरेवासीदन्वितो नृणां ॥ ६० ॥ इति श्रीखृष्टसंगीतायां पुत्राभिषेकपर्व्वणि (योहन्नेः पंचम
सर्गादुद्धृतो) दयालयपुष्करिणी नाम पंचदशोऽध्यायः ॥

शिष्य उवाच ॥ अद्भुतं मोहलक्ष्मैनद्धुरो दुष्टयहूदिनां । तन्मध्ये तु कियत्कालं स्थितो येषू
र्महापुरे ॥ १ । गुरुरुवाच ॥ एकाहे शिष्य संपूर्णे पंचाशत्पर्व्वणि प्रभुः । त्यक्त्वा यिरूषलेमीयान्

स्वीयदेशं पुनर्गतः ॥ २ ॥ पुरे कपर्णहूमे तु तं संश्रुत्यागतं निजे । गृहद्वारस्थितो व्यूहः संरुरो
धापि पद्धतिं ॥ ३ ॥ गृहान्तश्चापि तद्वाक्यश्रुत्यै नानाप्रदेशतः । अध्यापकाः फरीशाद्याः शास्त्र
विज्ञाः समागताः ॥ ४ ॥ प्रभोस्तत्र स्थितस्याग्रे खट्वायां शयितं तदा । पक्षाघातिनमानेतुं कमप्यै
च्छन् पुरस्थिताः ॥ ५ ॥ द्वारे वेष्टुमशक्तास्तु चत्वारो रोगिवाहिनः । उन्नयन्ति स्म यत्नेन तं
गृहच्छादनोपरि ॥ ६ ॥ तस्मिन् गत्वान्तरजिरं प्रति तेऽधोऽपि रज्जुभिः । येश्वग्रे निदधुः ९९
खट्वामुन्नोल्योल्लोचमप्यतः ॥ ७ ॥ यस्तेषां प्रत्ययं दृष्ट्वाथ पक्षाघातिनेऽब्रवीत् । खट्वास्थिताय हे
पुत्र मुच्यन्ते कल्मषाणि ते ॥ ८ ॥ इदमध्यापकाः श्रुत्वाचिन्तयन् हृदये तथा । कोऽयमीशाप
वादी कोऽघमोक्तास्तीश्वराद्विना ॥९॥ इति चिन्तयतोऽभ्यन्तर्न किंचिद्वदतोऽपि तान् । अनुभूय
क्षणादेतत्प्रत्यूचे सर्ववित्प्रभुः ॥ १० ॥ श्रीयेषूरुवाच ॥ किं तथा चिन्तयध्वे रे किं पक्षाघातिनं

प्रति । तव पापानि मुच्यन्त इति वाग्विद्यते गुरुः ॥ ११ ॥ खट्वामुत्थाप्य गच्छ त्वमिति ब्रूयामहं यदि । तदैतद्वचसोर्ब्रूत लघीयः कतरद्भवेत् ॥ १२ ॥ किंत्वङ्गमोचनं ह्येवं नृपुत्रेण मया भुवि । कर्त्तुं वाक्यं मुदेक्ष्यामि युष्मान्निर्णीतलक्ष्मणा ॥ १३॥ निशामयत मद्वाक्यं पक्षाघातिन् ब्रवीमि ते । उत्तिष्ठ स्वीयखट्वां च त्वमुत्थाप्य गृहं चल ॥ १४ ॥ गुरुरुवाच ॥ एतद्वदति येष्वीह पक्षाघात्युत्थितः क्षणात् । खट्वामुन्नीय सर्वाग्रे निर्ययावीश्वरं स्तुवन् ॥ १५ ॥ सर्वे चापि ततोऽतीव विस्मिताः परमेश्वरं ॥ दत्तवन्तं नरेभ्योऽपीयच्छक्तिं दद्रिरे स्तवैः ॥ १६ ॥ अन्योऽन्यं चाभ्यवोचन्नाद्भुतकर्म्म वयं खलु । अद्यापश्याम यद्वन्नाप्यभूद्दृष्टं कदाचन ॥ १७ ॥ अपगत्य ततो गेहाद्ध्रदकूलेऽव्रजत्प्रभुः । तत्र चाप्यन्विता व्यूहास्तस्यालम्भन्त शिक्षणं ॥ १८ ॥ आसीनं स तदा प्राप्य नगरस्य करालये । अल्फायस्य सुतं लेवीं यो मत्थायाभिधोऽप्यभूत् ॥ १९ ॥ मामन्वेहीत्यु

वाचाथ लेवीः सन्न्यस्य सर्वशः । करसंग्रहणादीनि येष्वः पश्चादितो गतः ॥ २० ॥ स्वगेहं प्रति
चाहूय भोजनाय तदा गुरुं । करसंग्राहिणो ऽनेकानपि तत्र न्यमन्त्रयत् ॥ २१ ॥ तद्गृहे तु
तमासीनं करसंग्राहिभिः सह । दृष्ट्वा महागुरुं तत्र फरीशाध्यापकाः स्थिताः ॥ २२ ॥
कुत्स्यं संमत्य संसर्गं रौम्यभृत्यैस्त्रयेलिनां । स्वीयैरवमतानां च शिष्यानभ्यब्रुवन् प्रभोः ॥
२३ ॥ अध्यापका ऊचुः ॥ किमर्थं युष्मदाचार्य्यः करसंग्राहिभिः सह । किल्विषाचारिभि
श्चापि भुङ्क्ते पिवति चात्रपः ॥ २४ ॥ गुरुरुवाच ॥ इति श्रुत्वा प्रभोः शिष्या न किंचिदपि १०१
तान् प्रति । ऊचुः किंतु स तत्कुत्सामनुभूयाब्रवीदिदं ॥ २५ ॥ श्रीयेषूरुवाच ॥ न सुस्थेभ्यो
गदिभ्यस्तु भिषगावश्यको यथा । तथा नाह्वयितुं धर्म्यान्पापिनस्त्वहमागतः ॥ २६ ॥
निर्गत्यान्विच्छत ततो यूयं शास्त्रविदः श्रमात् । प्रवक्त्रेतद्वचो ऽर्थः को दयामिच्छामि न क्रतुं

॥ २७ ॥ गुरुरुवाच ॥ इत्यैशवचसः प्रोक्त्या होषेयस्य प्रवाचिनः । येषूर्निवर्त्तयामास विवादं
धर्म्मगर्विणां ॥ २८ ॥ नतु क्षान्तेऽपि तद्वैरे वनमध्वशनस्य ते । प्रान्तरे घोषतः शिक्षां स्म
रन्तोऽभ्यब्रुवन्निदं ॥ २९ ॥ अध्यापका ऊचुः ॥ योहन्नेरनुगा ये ये जखरीयात्मजस्य ते ।
अतीवोपवसन्त्येव फरीशा इव धर्म्मिणः ॥ ३० ॥ त्वदीयास्तु कथं शिष्याः शुद्धै तद्वन्न कुर्व
ते । धर्म्यैपोषणमाचार्य्य किंत्वश्नन्ति पिवन्ति च ॥ ३१ ॥ श्रीयेषूरुवाच ॥ जन्या उप १०२
वसेयुः किं वरे तैः सह तिष्ठति । यदा सोऽपहृतस्तु स्यादुपवत्स्यन्ति ते तदा ॥ ३२ ॥
मय्येतैः सार्द्धमधुना नवशिष्यैर्वरे स्थिते । संतुष्टास्तेऽपि तिष्ठन्तु नियमश्रान्त्यपीडिताः ॥
३३ ॥ न जीर्णवसने कोऽपि नवं चीरं निसीव्यति । यदतुल्यतया ह्यस्य गरीयश्छेदनं
भवेत् ॥ ३४ ॥ नवार्पयति नूत्नेरां कश्चिज्जीर्णकुतूष्वपि । तद्भङ्क्त्वा स्रोथतीरा हि सार्प्या

नूत्नकुतूषु तु ॥ ३५ ॥ तथैवेरा कुतूश्चापि रक्ष्या प्रत्नां नु पोनवान् । कोऽपि नेच्छत्यथो नूत्नां जीर्णां वेत्ति हि सत्तरां ॥ ३६ ॥ गुरुरुवाच ॥ एतद्दृष्टान्तवाक्यानि यदा तान् प्रति सा ब्रवीत् । वरो योऽहन्निना प्रोक्तः सच्चिदानन्ददायकः ॥ ३७ ॥ तदा कश्चिन्मठाध्यक्षो यैरो नाम समागतः । प्रणिपत्यापि तत्पादौ प्रार्थयद्यत्नतस्तथा ॥ ३८ ॥ यैर उवाच ॥ प्रभो प्रायो मृते
दानीं बाला मे दुहिता स्थिता । दययैत्य कराभ्यां तां स्पृशाथानिष्यति ध्रुवं ॥३९॥ गुरुरुवाच ॥ १०३
इत्यशोचत्स यस्यापि न सन्तानस्तया विना । द्वादशाब्दकुमार्यासीद्वरदस्त्वशृणोत्प्रभुः ॥ ४० ॥ प्रार्थनातस्य गेहं चाभिगच्छन्तं तदा पथि । येषूं महानपि व्यूहः पर्यपीडयदन्वितः ॥ ४१ ॥ तन्मध्ये च स्थिता काचिद्रक्तपित्तेन या दृढं । उग्रेण द्वादशाप्यब्दान् दुःखिता भून्निरन्तरं ॥ ४२ ॥ या स्वसर्वधनस्यापि विज्ञवैद्यान् प्रति व्ययं । कृत्वा नाभून्ततः सुस्था वर

त्वधिकरोगिणी ॥ ४३ ॥ येष्वः पश्चात्तदा सायाच्चिन्तयन्ती तथा हृदि । तद्वस्त्रस्पर्शमात्रेण रोगान्मु
क्तिमवाप्नुयां ॥ ४४ ॥ ततो व्यूहान्तरे नारी प्रभोर्वस्त्रान्तमस्पृशत् । निरुद्धं च क्षणात्तस्या रक्त
पित्तं समन्ततः ॥ ४५ ॥ परावृत्तस्ततो येषूः केन स्पृष्टो ऽहमित्यमून् । उचे परिस्थितान् ये ऽथ न
मयेत्यब्रुवन् सकृत् ॥ ४६ ॥ प्रस्तराद्यास्त्ववोचन् हे पीडयन्तं तथा गणं । संपश्यंस्त्वं कथं पृच्छेः
स्पृष्टो ऽहं केन नु प्रभो ॥ ४७ ॥ प्रत्यूचे स तु केनापि स्पृष्टो ऽहमिति निश्चयं । वेद्मि मत्तो यतः १०४
शक्तिर्बुबुधे ऽपि विनिःसृता ॥ ४८ ॥ स्पृष्टवन्तं विबोद्धुं च स यदा पर्यलोचत । नारी सा स्वकृतं
कर्म्मागुप्तमन्वभवत्तदा ॥ ४९ ॥ कम्पमाना भयाच्चेहाभ्येत्य येषूं प्रणम्य च । स्वीचक्रे वसनस्पर्शं
चिकित्सां चाप्यतः स्वकां ॥ ५० ॥ मुक्तिदस्तु तदावादीद्दुहितः सुस्थिरा भव । विश्वासस्ते ददौ
मुक्तिं कुशलं याह्यरोगिणी ॥ ५१ ॥ इति येष्वि वदत्येव मठाध्यक्षनिकेतनात् । एनं प्रत्यद्रवद्दास

इदं चाभ्यब्रवीद्वचः ॥५२॥ यैरभृत्य उवाच ॥ इदानीं भवतः पुत्री मृता यैर ततो गुरुः। किमर्थं
गृहमानीय क्लेशयेरेव निष्फलं ॥ ५३ ॥ गुरुरुवाच ॥ इति दासं वदन्तं तु श्रुत्वा येषूरथाब्रवीत्।
मा भैषीर्यैर विश्वासं कुर्वैवाथ सुखं भवेत् ॥५४॥ गृहं त्वागत्य कंचिन्नान्तर्निन्ये प्रस्तराद्विना।
जिबिदीयसुताभ्यां च मठाध्यक्षेण सोऽन्वितः ॥ ५५ ॥ तैर्वृतस्तत्र विष्टा सो ऽवाप्नोद्विलपतो
बहून् । बन्धून्सगायकांस्तत्र तुमुलध्वनिकारिणः ॥ ५६ ॥ तान्निषेधन्नवादीत्स किं विलाप १०५
ध्वनिं तथा । कुरुतात्र कुमार्येषा न मृता किंतु निद्रिता ॥ ५७॥ इति श्रुत्वाहसंस्ते वै जानन्त
स्तन्मृतिं ध्रुवं । समस्तास्तु प्रभोराज्ञां संलभ्यातो विनिर्गताः ॥ ५८ ॥ कुमार्य्यास्तु पितृभ्यां स
सह शिष्यत्रयेण च । शयानामुपसृत्यामूं समादायापि तत्करं ॥ ५९ ॥ हे कन्ये जागृहीत्यूचे
ततः प्राणानवाप्य सा । उत्थिता प्राचलद्वेगाद्विस्मितेष्वखिलेष्वपि ॥६०॥ ततो यैरं सपत्नीकं

विस्मयानन्दमोहितं । भोज्यं पुत्र्यै प्रदातुं स संजीवन्त्यै समादिशत् ॥ ६१ ॥ आज्ञाय सकलांश्च
मां कस्मैचिन्नेरितुं क्रियां । स सप्रस्तरयाकोबयोहन्निर्निर्गतो गृहात् ॥ ६२ ॥ किंतु तत्रापि
विस्तीर्णे जीवदस्य प्रकीर्त्तने । मठाध्यक्षगृहाद्व्यूहाः प्रगच्छन्तं तमन्वयन् ॥ ६३ ॥ अनु
भूय तदा काणावपि मोक्तारमन्तिके । दयां नौ कुरु हे दावित्पुत्रेति प्रणनर्द्दतुः ॥ ६४ ॥
स्वगृहे चाप्युपस्थाय स पश्चादनुगामिनोः । तयोः सत्प्रत्ययं ज्ञात्वेदमूचे कुशलाधिपः ॥ ६५ ॥ १०६
एतत्कर्त्तुं समर्थो ऽहमिति वां प्रत्ययोऽस्ति किं । तथा पृष्टौ ततोऽस्त्येव भो इति प्रत्यवोचतां ॥
६६॥ अथ सोऽक्षीणि संस्पृश्य तयोरभ्यब्रवीदिदं । यादृग्वां प्रत्ययस्तादृगस्त्वतोऽपश्यतां च तौ ॥
६७॥ आज्ञातौ चापि मोक्त्रा तौ न कस्मैचिनदीरितुं । पुर्यां क्षेत्रेऽखिले चापि कथयामासतुः क्रियां॥
६८ ॥ तत्पश्चात्तद्गृहे मूकं भूतग्रस्तं नरा अपि । आनयन् यं प्रभुर्भूते निःक्षिप्ते ऽवादयत्स्फुटं ॥

६९ ॥ विस्मिताश्च ततो व्यूहास्तद्वन्नाभूत्कदाचन । इस्रयेलान्तरे दृष्टमिति प्रोचुः परस्परं ॥७० ॥
फरीषास्तु तदा केचित्तत्संश्रुत्याब्रुवन्निदं । स भूताधिपशक्त्यैव भूतान्निःक्षिपति ध्रुवं ॥ ७१ ॥
इति श्रीखृष्टसंगीतायां पुत्राभिषेकपर्व्वणि (मत्थायस्य नवमसर्गान्मार्कस्य द्वितीयपंचमसर्गाभ्यां लूकस्य पंचमाष्टमसर्गाभ्यां चोद्धृतो) वरदयाप्रकाशो नाम षोडशोऽध्यायः ॥

शिष्य उवाच ॥ यैरूशलेमकैः पूर्व्वमवज्ञातोऽपि पर्व्वणि । ततः प्रत्यागते राद्येऽह्नेव कापर्णहू १०७
मिषु ॥ १ ॥ यो वै तान्यकरोत्किं न मठाध्यक्षादयस्तदा । तं वै वरदयादृष्ट्वा सर्व्वेऽमन्यन्त धार्म्मिकाः ॥ २ ॥ गुरुरुवाच ॥ मा विद्धैवं यथा ह्यासीत्पंचाशत्पर्व्वयात्रिकैः । अमीभिः स तथैवै तैः प्रतिरुद्धोऽचिरात्प्रभुः ॥ ३ ॥ शनावाद्ये परे तस्माद्द्वितीयाभिधपर्व्वणः । क्षेत्रे कापर्णहूम्ये स स्व शिष्यैः सार्द्धमव्रजत् ॥ ४ ॥ तदा तत्र सुपक्वानि संछिद्य कणिशानि ते । संमर्द्य पाणिपुटकैरनु

मारेभिरे मुदा ॥ ५ ॥ तत्संदृश्य फरीषास्तु केचिद् ह्यस्तनकर्मणां । गर्हका इव संवक्तुमीर्ष
यातः प्रचक्रमुः ॥ ६ ॥ फरीषा ऊचुः ॥ धार्म्मिकैर्नास्ति यद्योग्यं कर्त्तुं विश्रामवासरे । तदेतान्
कुर्वतः पश्य चयनं मर्द्दनं तथा ॥ ७ ॥ गुरुरुवाच ॥ इत्याकर्ण्य वचस्तेषामात्मधर्म्मार्थगर्विणां ।
पुण्यग्रन्थोदितैर्वाक्यैस्तथा व्यवदत प्रभुः ॥ ८ ॥ श्रीयेशूरुवाच ॥ शास्त्रज्ञैः किं न युष्माभिः श्रुतं
तत्कर्म्म दाविदः । यद्धर्म्यो ऽप्याचरदसौ सानुगो ऽतिबुभुक्षितः ॥ ९ ॥ यानि ह्यैश्वरदूष्यस्य १०८
वेदौ दर्शनहेतवे । गोधूम्यपिष्टकान्यासन्नर्पितान्येव शास्त्रतः ॥ १० ॥ तानि पुण्यान्यपि न
चादनीयान्यप्ययाजकैः । स महायज्वनो लेभे ऽभ्याथारस्य पितुः करात् ॥ ११ ॥ दूष्ये च तान्य
भुक्त्वापि स्वानुगांश्चाप्यभोजयत् । आवश्यार्थे स निर्दोषो दाविदीशप्रियो ऽधिपः ॥ १२ ॥ किं
वाधीतं न युष्माभिरीशशास्त्रे ऽपि यज्वनां । तद्गृहान्तःशनाविव नानाकर्म्मनियोजनं ॥ १३ ॥

मन्दिरात्तु महीयान् वै विश्रामाहस्य च प्रभुः । अत्रापि स्थित एतर्हि नृपुत्र इति वच्मि वः ॥
१४ ॥ नहि विश्रामवारार्थं नराः सर्व्वे निरूपिताः । नरार्थं तु स सद्वारोऽतो नृपुत्रोऽस्ति
तत्प्रभुः ॥ १५ ॥ अनघांस्तु तथा यूयं न वै दण्ड्यानवक्ष्यत । चेज्जानीयात वाक्यं तद्दयामिच्छा
मि न क्रतुं ॥ १६ ॥ गुरूरुवाच ॥ तथा तान्नीरवान्कृत्वा नृपुत्रो धर्म्मलिङ्गिनः । विश्रामाहे परे
तस्मात्तत्पुरः प्राविशन्मठं ॥ १७ ॥ शीर्णिहस्ते स्थिते तत्र कस्मिंश्चिद्गर्हका अमी । अवालोकन्त १०९
किं येषूस्तं चिकित्सेत्तदा न वा ॥ १८ ॥ इति चिन्तयतस्तांस्तु विश्रामदिनलङ्घनात् । अभि
योगेच्छुकान् येषूः फरीष्याध्यापकानवेत् ॥ १९ ॥ उपदेशाद्विरम्याथ मठमध्ये स निर्भयं ।
शीर्णिहस्तं तमाहूय गर्हकानभ्यवोचत ॥ २० ॥ श्रीयेषूरुवाच ॥ सुक्रिया दुष्क्रिया वा किं
कर्त्तुं विश्रामवासरे । योग्यं किं रक्षितुं प्राणान्हन्तुं वेति प्रवक्त मे ॥ २१ ॥ गुरूरुवाच ॥ इति

पृष्टेषु दुष्टेषु नातः को ऽप्युत्तरं ददौ । परिदृश्य रुषा तांस्तु तत्काठिन्येन दुःखितः ॥२२॥ प्रभुः
शीर्णकरायोचे शुष्कं हस्तं प्रसारय । अथ सुस्थीकृतं सो ऽमुं प्राप्नोऽङ्गस्तान्तरं यथा ॥ २३ ॥ ततः
कोपोन्मदास्ते तु सहैरोद्याः फरीथकाः । मन्दिरस्था यथा पूर्वं यहूद्यास्ते तथोचिरे ॥ २४ ॥ किं
करिष्यामहे ऽमुं नु सद्विश्रामाहलङ्घिनं । अस्मन्मध्यस्थितं किं न मृत्युदण्ड्यः स सर्वथा ॥ २५ ॥
तां तु हिंसामतिं ज्ञात्वा जनव्यूहैर्वृतः प्रभुः । प्रायात्कपर्णहूमात्स नानादेशत आगतैः ॥ २६ ॥ ११०
तेष्वासन्वै गलीलीयास्तथा यैरूषलेमकाः । यर्द्दानीपरिवासाश्च तथा चापि यहूदिनः ॥ २७ ॥
अप्येषावोऽङ्गवा लोका इदूमीयोषितास्तथा । शीदोन्या अपि तूर्य्याश्च कीर्तितक्षितिवासिनः ॥२८॥
एतादृशो महाव्यूहाः प्रभोः कीर्त्या सुकर्म्मणां । आकृष्टास्तं तदान्वीयुस्तैवर्य्यहृदरोधसि ॥
२९ ॥स तु तेष्वखिलांस्तत्राचिकित्सद्रोगिणः स्थितान् । भूतग्रस्तानपीशस्य पुत्रस्त्वमिति घोषतः

॥ ३० ॥ सर्वांस्तु स्वयशो वक्तुं न्यषेधीदपि यत्नतः । व्यूहैः संकुचितश्चापि स्वशिष्यान्नावमार्थ
यत् ॥ ३१ ॥ तथा दूरीकृतेनापि स्वपुरोऽध्यापकैस्तदा । निरहंकारिणा येष्वा प्रवक्तुः पूरितं
वचः ॥ ३२ ॥ इषाय उवाच ॥ अहो मन्मनोनीत एषोऽतिहार्दो वृतश्चापि सर्वाप्रियो मत्सुभक्तः ।
तदन्तर्मदात्मानमेवाहमीशोऽर्पयिष्ये विचारप्रकाशाय लोके ॥ ३३ ॥ विवादं न कर्ता नवा
नादमेष न रथ्यासु शब्दोऽस्य संश्रोष्यते वा । नलं चापि निष्पीडितं नैष भङ्क्तेद्दृशां नापि १११
निर्वापयेत्स्फूर्तधूमां ॥ ३४ ॥ स यावन्न सत्यानयेत्संजयेऽपि विचारं तथैवाचरेन्नित्यशान्तः ।
ततोऽप्यज्ञनीतिप्रदेऽस्मिन् सुदूरान्निधास्यन्ति विश्वासमन्योद्भवोऽपि ॥ ३५ ॥ इति श्रीख्रिष्टसंगी
तायां पुत्राभिषेकपर्वणि (संवेलचरित्रादिषायभव्यवाक्यानां द्वाचत्वारिंशसर्गान्मत्थायस्य द्वादश
सर्गान्मार्कस्य द्वितीयतृतीयसर्गाभ्यां लूकस्य षष्ठसर्गाच्चोद्धृतः) शान्तविचारो नाम सप्तदशोऽध्यायः ॥

गुरुरुवाच ॥ व्यूहेभ्यस्तु पृथकस्थित्यै गिरिमारुह्य कंचन । स शान्तः प्रार्थयन्नीशमतिष्ठत्सर्व
निश्यपि ॥ १ ॥ ततः सूर्य्योदये भूते स्वशिष्यान्व्यूहमध्यतः । शैलोपर्यात्मना सार्द्धं तदा स्थातुं
समाहूयत् ॥ २ ॥ तेष्वारूढेषु तत्राथ सहस्थित्यै विशेषतः । रुग्भूतदान्तिशक्त्यै च प्रोक्त्यै च
द्वादशावृणोत् ॥ ३ ॥ तेषामाद्यस्तु सीमोनः प्रस्तराख्यस्ततः सुतौ । जिवोदीयस्य याकोबयोहन्नी
पविज्राभिधौ ॥ ४ ॥ अन्द्रियः प्रस्तरभ्राता फिलिप्पश्चापि तत्परे । ततो बार्थुलमायोऽपि ११२
रहितोपधिमानसः ॥ ५ ॥ मत्थायोऽपि करग्राही थोमाश्च दिदुमाभिधः । याकोबोऽल्फायजश्चापि
प्रभोर्बन्धुरपि स्मृतः ॥ ६ ॥ तद्बन्धुश्च यहूदो यो लिब्बैथद्वायनामनी । अग्रहादथ सीमोनः ख्यातः
शास्त्रार्थकौतुकी ॥ ७ ॥ द्वादशस्तु यहूदोऽन्य इष्कार्य्योत्यभिधानकः । गणे पुण्यात्मके योऽस्मिन्
ख्येय एव शठः परे ॥ ८ ॥ इति द्वादशसंख्यांस्तान् वृत्वा स्वप्रेरितान् प्रभुः । भूरीनुपादि

शङ्कर्म्मान् यथा प्राक् पर्व्वतोपरि ॥ ९ ॥ केनचित्प्रार्थितः सोऽथ शिष्येण स्नापको यथा । योऽहन्निः
प्रार्थनां सर्व्वानुपदेष्टुं तथानुगान् ॥ १० ॥ अतस्तां पुनरुक्त्वा वै प्रार्थनां प्रभुसंज्ञकां । स्वर्गेऽपि
तास्मदित्याद्यामेतदप्यब्रवीद्वचः ॥ ११ ॥ श्रीयेषूरुवाच ॥ निशीथे यदि युष्माकं कस्यचिद्द्वार
सन्निधौ । समागत्य सुहृत्कोऽपि त्वामिह प्रार्थयेदिदं ॥ १२ ॥ हे सखे देहि ऋणं मह्यं गौधूम्यं
पिष्टकत्रयं । यतोऽन्नं मद्गृहे नास्ति पान्थश्च सुहृदागतः ॥ १३ ॥ अथाभ्यन्तर उच्यास्त्वं तद्दातुं 113
शक्नुयां कथं । पर्य्यङ्कस्थः सपुत्रोऽहं द्वारं संरुद्धमेव च ॥ १४ ॥ ततो मां यच्छ मे क्लेशमिति त्वं स्व
प्रलिप्सुकः । प्रतिब्रूयाः स तु वहिस्तथैव प्रार्थयेन्मुहुः ॥ १५ ॥ तदा यद्यपि मैत्रार्थं तन्न दद्याः
समुत्थितः । तस्यानिर्व्वार्य्यताहेतोर्यद्यदिष्टं प्रदास्यसि ॥ १६ ॥ इति वो वच्म्यहं सत्यं ततो या
चध्वमीश्वरं । अनिर्व्वार्य्यास्तथा यूयं लप्स्यध्वे चैव निश्चयं ॥ १७ ॥ गुरुरुवाच । विशिष्टांस्तु

प्रभुः शिष्यान् वृत्वा द्वादशसंख्यकान् । तान्प्रत्यपि च संपूर्य्य नानाधर्म्मोपदेशनं ॥ १८ ॥
अवतीर्य्य सशिष्योऽद्रेः किमपि प्राविशद्गृहं । किंतु तत्र पुनर्व्यूहा व्यरुन्धन्नपि भोजनं ॥ १९ ॥
तदा तद्बान्धवाश्चापि स्वपुरादेत्य यत्नतः । अन्वैच्छन्नुन्मदं ज्ञात्वा तं दण्डमुदितं मठे ॥ २० ॥
अविश्वासैश्च तैः सार्द्धं मरीयापि तदा गता । सती पुत्रं प्रियं द्रष्टुमिच्छुकावमतं स्वकैः ॥ २१ ॥
तत्काले तु प्रभोरग्रेऽनयंस्तत्र स्थिता नराः । भूतग्रस्तं जनं कंचिद्यो मूकोऽन्धोऽपि चाभवत् ११४
॥ २२ ॥ अथ भूतं वहिष्कृत्य दयालुः पीडितं नरं । द्रष्टुं वक्तुं च शक्तं तमकरोदपि तत्क्षणात् ॥
२३ ॥ तत्संदृश्याब्रुवन् व्यूहाः किं नैषोऽस्ति प्रतिश्रुतः । योऽस्मभ्यं स महाराजोऽभिषिक्तो
दाविदः सुतः ॥ २४ ॥ इत्यूचुः शरला एते फरीष्यास्तु य आगताः । यिरूषलेमतस्तत्र ते तदा
प्रोचुरीर्षकाः ॥ २५ ॥ फरोष्या ऊचुः ॥ बेल्जबूलस्य साहाय्याद्विना भूताधिपस्य वै । नैव शक्नोति

निःक्षेप्तुं भूतांस्तत्सेवको ह्ययं ॥२६॥ गुरुरुवाच ॥ इत्यतो निन्दतां तेषां दुर्मनोऽनुभवन्प्रभुः ।
तदा तन्मन्दतर्कस्य विरोधं प्रावदत्स्फुटं ॥ २७ ॥ श्रीयेषूरुवाच ॥ यस्मिन् राज्ये प्रजान्योऽन्यं
युध्यति क्षीणमेव तत् । यत्पुरं वा गृहं वान्तर्भिन्नं तदपि नश्यति ॥ २८॥ साटानश्चेत्तथात्मानं
निःक्षिपेत्स्वरिपुः स्थितः । तदा तस्य कथं राज्यं जगति स्थास्यति ध्रुवं ॥२९॥ बेल्ज़बूलस्य
शक्त्या तु भूतांश्चेन्निःक्षिपाम्यहं । पुत्रा वः केन तत्कुर्य्युस्तेऽतः स्युर्वोऽक्षदर्शिनः ॥ ३० ॥ किन्त्वी ११५
शस्यात्मना भूतान्निःक्षिपेयमहं यदि । तदेशस्यागतं राज्यं युष्मास्वत्र न संशयः ॥३१॥
बलिनोऽस्त्रभृतो विश्य गृहं तद्द्रव्यमेव कः । हर्त्तुं शक्नोति चेन्नादौ बध्नीयात्तं बलान्वितं ॥३२॥
सुरक्षितगृहं तं तु बलीयान्कोऽपि चेज्जयेत् । स्थिरं तद्वर्म्म हृत्वा स तद्द्रव्यमपि लुण्ठति ॥३३॥
भूतराजं तथेदानीं जिनं वित्त बलीयसा । तद्विषा हरता तस्मान्नृणां सर्व्वेन्द्रियाण्यपि ॥३४॥

मत्सहायस्तु यो न स्यान्मद्विपक्षं सुविन्न तं । मया सार्द्धं फलं यो न चिनुयाद्विस्तृणोति सः ॥३५॥
ततो वच्म्येतदपि वः सर्व्वपापं नरैः कृतं । क्षन्तव्यं निन्दनं चापि विना निन्दां सदात्मनः ॥
३६॥ नृपुत्रमपि यो निन्देत्क्षमामाप्तुं स शक्नुयात् । न सदात्मापवादी तु नैतल्लोके न वा
परे ॥३७॥ नित्यदण्ड्या अपि स्युस्ते ये सदात्मोत्थिताः क्रियाः । असद्भूताधिपकृता आख्या
न्त्येवापवादकाः ॥३८। वृक्षं कुरुत वा भद्रं तत्फलं भद्रमेव च । मन्दं वा सफलं वृक्षं स हि वि ११६
ज्ञायते फलात् ॥३९॥ रे सर्पतनया यूयं कथं भद्रवचांसि वै । ईरयेत स्थिता मन्दा हृत्पूर्त्ते
र्ह्याह वो मुखं ॥४०॥ सन्नरः स्वहृदः कोषाद्भद्राद्भद्रमुदीरयेत् । मन्दस्तथैव मन्दानि स्वहृदो
ऽधमकोषतः ॥४१॥ किंतु यद्यद्वचो ऽनर्थमपि ब्रूयुर्नराः परे । प्रतिवाच्यं विचाराहे तत्तैरिति
वदामि वः ॥४२॥ वचोभ्यो हि स्वकेभ्यस्त्वं नर निर्द्दोषयिष्यसे । स्ववचोभ्यस्तथा दोषदण्डा

र्हत्वं प्रलप्स्यसे ॥४३॥ गुरुरुवाच ॥ इत्याकर्ण्य वचः केचित्फरीष्याध्यापकाः प्रभोः । प्रत्यूचु
श्चिह्नमिच्छामस्त्वत्त एवेक्षितुं गुरो ॥४४॥ इदं श्रुत्वा स आचार्य्यो दान्तभूतो ऽद्भुतक्रियः ।
अर्थयद्भ्यो ऽधिकं तेभ्यो व्यूहसाक्षादवोचत ॥४५॥ श्रीयेषूरुवाच ॥ चिह्नमिच्छन्त्यमी प्राप्तुमधमा
व्यभिचारकाः । न त्वन्यत्किमपि प्राप्यं योनचिह्नाद्विनैव तैः ॥४६॥ स यथेशप्रवक्ता हि
मत्स्यगर्भे ऽवसत्र्यहं । नरपुत्रस्तथैव स्यात्र्यहं भूम्युदरस्थितः ॥४७॥ किंतु तत्प्रत्नचिह्नाप्ता ११७
नीनिवीपुरवासिनः । उत्थास्यन्ति विचाराहे दण्डायैतन्नृणां ध्रुवं ॥४८॥ भीषणैर्योन
वाक्यैर्हि नीनिवीयाः समन्ततः । अनुतेपुः स्थितस्त्वत्र योनादेको महत्तरः ॥४९॥ दक्षिणीया
तथाराज्ञी साव्यानां सा प्रकीर्त्तिता । उत्थास्यति विचाराहे दण्डायैतन्नृणां ध्रुवं ॥५०॥ ज्ञानं
श्रोतुं सलोम्नः सागता ह्युर्व्यन्तसीमतः । एषां मध्ये स्थितस्त्वेकः सलोम्नो ऽपि महत्तरः ॥५१॥

तं महत्तरमप्यत्र दान्तभूतमिमे जनाः । अवमत्य यदाप्स्यन्ति तन्मन्त्रः शृणुताधुना ॥५२॥ नर
देहादसङ्गतो विनिःक्षिप्तो यदा भ्रमेत् । मरुभूमिषु विश्रामं दुण्ढन्नत्वाप्नुवन् क्वचित् ॥५३॥
तदाह स्वगृहाद्यस्मान्निर्गतोऽहं पुरा पुनः । तत्रैष्यामीत्यथाप्नोति तच्छून्यं मृष्टमेव च ॥५४॥
ततो गत्वान्यभूतान्स सप्त मन्दतरानपि । समानयति वासाय तच्छोभितगृहान्तरे ॥५५॥
स तु व्याप्तो मनुष्योऽतो विविधासत्प्रवर्त्तकैः । तैस्तदोग्रतरावस्थां पूर्व्वाया अप्यवाप्नुयात् ॥५६॥ ११८
गुरुरुवाच ॥ एतद्गोमवचोभिः सोऽभर्त्सयन्मोचको यदा । देशकर्म्मावमन्तॄन् वै भूतध्वंसदृशो
ऽपि तान् ॥५७॥ तदा कश्चित्तमभ्यूचे माता ते भ्रातरोऽपि च । वहिस्तिष्ठन्ति संवक्तुं समिच्छन्त
स्त्वया सह ॥५८॥ नार्य्प्येतत्क्षणे काचिद्गृहमध्ये ननाद ह । धन्यो गर्भस्त्वदाधारो धन्यौ पीतौ
त्वया स्तनौ ॥ ५९ ॥ इदं येषूस्तु संश्रुत्याब्रवीन्माता ममैव का । के वा मे भ्रातरः के वा

धन्याः स्त्र्येया नु मत्कृते ॥ ६० ॥ इत्युक्त्वा स समासीनान् स्वशिष्यान्परितः करं । विस्तीर्य्योवाच
माता मे भ्रातरश्च स्थिता इमे ॥ ६१ ॥ मत्स्वर्गीयपितुर्यो हि वाक्यं श्रुत्वा सुपालयेत् । स मे भ्रातैव
माता च स्वसापि स च मङ्गलः ॥ ६२ ॥ गुरुरुवाच ॥ तद्गृहात्तु विनिःसृत्य पूर्णेऽस्मिन्नुपदेशने ।
धन्यां मातरमीक्षित्वा भ्रातॄंश्चापि तदा प्रभुः ॥ ६३ ॥ तस्मिन्नेव दिने नावं यां शिष्या ह्रद
रोधसि । प्रास्तुवन्व्यूहसंकोचात्तां ततः प्राविशन्मुदा ॥ ६४ ॥ तदुपर्य्येव चासीनो व्यूहांस्तान् ११९
रोधसि स्थितान् । नानापुरसमायातान् दृष्टान्तैरित्यशिक्षयत् ॥ ६५ ॥ श्रीयेषूरुवाच ॥ बीजं
वप्तुं कदाचिद्वै कृषकः कोऽपि निर्गतः । पद्धतौ तु पतत्किंचित्प्राप्यादन्पक्षिणो द्रुतं ॥ ६६ ॥
शिलास्वन्यत्तु पतितमादावाप्स्वल्पमृत्सु वै । प्ररुह्याथातपैः शुष्कं हीनमूलाभिषेचनं ॥ ६७ ॥
पतितं कण्टकेष्वेवान्यत्प्ररूढमिमैः सकृत् । वर्द्धितैः पीडितं चापि शेषेऽक्षीयत सर्व्वशः ॥ ६८ ॥

पतितं तु सुमृद्यन्यत्प्ररूढं चाफलन्ततः । किंचित्त्रिंशद्गुणं किंचित्तथा शतगुणाद्यपि ॥ ६९ ॥ यस्य
युष्मद्गणे कर्णौ श्रवणायैव संस्थितौ । आत्मार्थं स इदं वाक्यमाकर्णयतु यत्नतः ॥ ७० ॥ गुरूरुवाच ॥
तथा संपूर्य्य स कथां शिष्यैः पृष्टःपृथक्तदा । त्वं तथोपदिशस्येतान् दृष्टान्तैर्नु कुतः प्रभो ॥ ७१ ॥
इति पृष्टोऽब्रवीत्सोऽतः स्वानुगान्नावि संस्थितान् । स्वर्गराज्यरहोज्ञानं नैभ्यो दत्तं हि किं तु वः ॥
७२ ॥ यो दध्याद्धि नरस्तस्मै देयमप्यधिकं ततः । न दध्याद्यस्तु तस्माद्धि हार्य्यं तेनापि यद्धृतं ॥ १२०
७३ ॥ तत एतेऽपि दृष्टान्तैरुपदेश्या मया यतः । पश्यन्तोऽपि न पश्यन्ति शृण्वन्तोऽपि न
जानते ॥ ७४ ॥ एतेष्वपि च तद्वाक्यं संपूर्णं यत्पुरोदितं । इषायाय महेशेन तन्मुखं स्पृशता
ज्वलैः ॥ ७५ ॥ त्वमेतत्प्रयातः कुलं ब्रह्मपूतं समाकर्ण्य यूयं न भुत्स्यध्व एव । अभिप्रेक्षमाणा
अपि स्थूलनेत्रैर्न किंचित्ततो द्रक्ष्यथैव भ्रमन्तः ॥ ७६ ॥ भवेत्स्तब्धहृज्ज्येष लोकः समस्तो निरुद्ध

श्रुतिर्मुद्रिताक्षश्च सम्यक् । यतो नेक्षणाकर्णनज्ञानभागी परावृत्तहृच्चाप्नुयान्मच्चिकित्सां ॥
७७ ॥ तद्वद्देषो ऽधुनाप्योघः किंतु वो मङ्गला दृशः । पश्यन्त्यो हि तथा कर्णाः शृण्वन्तो
वो ऽपि मङ्गलाः ॥ ७८ ॥ बहवो हि प्रवक्तारः प्राक्तना धर्म्मिणो ऽपि च । युष्मद्दृष्टश्रुतान्यै
च्छन्द्रष्टुं श्रोतुं च निष्फलं ॥ ७९ ॥ ततः शृणुत वप्तुर्वै दृष्टान्तं यच्छ्रुतेर्विना । समस्तानपि दृष्टान्तान्
कथं बोद्धुं शकिष्यथ ॥ ८० ॥ वीजं तन्निश्चयं वित्त वाक्यमैशं सुविस्तृतं । पद्धतौ पक्षिभुक्तं १२१
तु यद्वीजं शृणुतैव तत् ॥ ८१ ॥ श्रुतमीशवचो ऽज्ञेनागत्य दुष्टो ऽभिशाप्यथ । तद्धृदो ऽपहरत्याशु
तच्छ्रद्धामोक्षरुद्धये ॥ ८२ ॥ इत्यध्ववीजमथ यच्छिलोप्तं शृणुतैव तत् । श्रुतमैशं वचः कैश्चि
द्गृहीतं चापि हर्षतः ॥ ८३ ॥ ये ऽन्तःसुस्थिरसंकल्पमूलहीनास्ततो ऽचिरात् । धर्म्मार्थे वा
धनोष्णैर्वै संक्षुब्धा विसृजन्ति तत् ॥ ८४ ॥ इत्यश्मवीजमथ वः श्राव्यं यत्कण्टकस्थितं ।

ऐशमाकर्णितं वाक्यं कैश्चित्स्वीकृतमेव च ॥ ८५ ॥ ये परे चिन्तनैर्भिन्नैः संसारस्य धनस्य च ॥
भ्रान्तिलोभैः समाकीर्णा हते वाक्ये ऽफलाः कृताः ॥ ८६ ॥ कण्टकस्थमिति ज्ञेयं सुभूम्युप्तं तु
यत्तथा । तद्विशुद्धर्जुहृदयैरेवात्तं वच ऐश्वरं ॥ ८७ ॥ ईदृशा हि नरा वाक्यं श्रुत्वा रक्षन्ति
यत्नतः । क्षमाद्यातः फलं भूरि दधति श्रेष्ठकर्म्मणां ॥ ८८ ॥ गुरुरुवाच ॥ स्वदृष्टान्तं महा
वप्ता स संज्ञाप्यानुगांस्तथा । तदान्यैरपि दृष्टान्तैस्तान् स्थितो नाभ्युपादिशत् ॥ ८९ ॥ १२२
श्रीयेषूरुवाच ॥ भद्रवीजं यथा स्वीये क्षेत्रं उप्त्वा श्रमान्नरः । अथापैति हिते काले ऽपेक्ष्यमाणः
परे फलं ॥ ९० ॥ ईशराज्ये तथा भव्यं वित्त सा हि क्षितिः स्वयं । वीजं तद्वापके किंचि
न्नजानत्यपि वर्द्धयेत् ॥ ९१ ॥ एतस्मिंश्च शयाने ऽपि जाग्रत्येवमहर्निशि । उत्थितं पत्र
माद्ये ऽतः कणिशं शस्यमप्यतः ॥ ९२ ॥ शयितस्तु यदा स्वामी समस्तैः सह कर्षकैः । तदा

कोऽप्यरिरायातः काशवीजमिहावपत् ॥ ९३ ॥ दुष्टे तस्मिन्गते वात उत्थितं काणिशं यदा ।
तन्मध्येऽप्युप्तकाकेक्षुर्वर्द्धितः संबभौ तदा ॥ ९४ ॥ ततोऽभ्येत्य पतिं प्रोचुर्भृत्याः किं भवता निजे ।
क्षेत्रे नोप्तं वरं वीजमथ काशा इमे कुतः ॥ ९५ ॥ तान्प्रत्यूचे स निःशङ्कं तत्केनाप्यरिणा कृतं ।
तदोचुर्भवदिष्टं चेत्काशानुत्पाटयेम तान् ॥ ९६ ॥ तदा पतिरुवाचेदं मा कुरुध्वं कदाचन ।
तदुन्मूलात्सुशस्यस्यैवं समुत्पाटनं भवेत् ॥ ९७ ॥ उभयान्यपि वर्द्धन्तां यावन्न स्यात्सुपक्वता । १२३
ततस्तानि सकृच्छेत्तुं समादेक्ष्यामि कर्षकान् ॥ ९८ ॥ अथादौ किल काकेक्षून् बन्धं बन्धं प्रदग्धये ।
निदधीताथ शस्यं मे संचिनुध्वं खलोदरे ॥ ९९ ॥ तद्वद्वेद्यमपि स्वर्गराज्यमन्यत्तु किं मया ।
तत्तुल्यमधुना वाच्यं दृष्टान्तोऽर्हः क एव वा ॥ १०० ॥ एकसर्षपवीजस्य तुल्यं तद्विद्धि केनचित् ।
स्वक्षेत्रे स्वामिनोप्तस्य सर्ववीजलघीयसः ॥ १०१ ॥ एतस्माद्व्युत्थितादूढो महावृक्षः समावृतः ।

शाखाभिर्यासु संछिन्ना वसन्त्याकाशपक्षिणः ॥ १०२ ॥ स्वर्गीयराज्यं पुनरेव वेद्यं रसो
यथा स्फीतिकरोऽल्पमात्रः । त्रिद्रोणमाने निहितः स्त्रिया यो व्याप्नोति चूर्णं क्रमशः समस्तं ॥
१०३ ॥ गुरुरुवाच ॥ इदं सर्वं नरौघेभ्यो दृष्टान्तैरब्रवीत्प्रभुः । नवा किमपि तेभ्यः स विना
दृष्टान्तमैरयत् ॥ १०४ ॥ खृष्टार्थे यच्चिरादुक्तमासाफेन प्रवाचिना । तत्तथा हि समायातो
वाक्यैः सोऽपूरयद्ध्रुवं ॥ १०५ ॥ आसाफ उवाच ॥ अहो मोचयित्वा चिराड्ढमास्यमहं ज्ञान १२४
दृष्टान्तसार्थान्प्रवक्ष्ये । जगत्सृष्टिकालादपि भ्रान्तिकूपे यदासीत्प्रगुप्तं तदेवेरयिष्ये ॥ १०६ ॥
गुरुरुवाच ॥ स तु व्यूहांस्तथा प्रोचे यथा श्रोतुमशक्नुवन् । भ्रान्तिकूपोषितास्तेऽथ तन्नावो
निर्गतः प्रभुः ॥ १०७ ॥ गृहसंस्थं च तं शिष्या अभ्येत्य स्वच्छदृष्टयः । पृथक् प्रार्थयितुं तासां
वाचामर्थं प्रचक्रमुः ॥ १०८ ॥ शिष्या ऊचुः ॥ अस्मभ्यं वरद स्वामिंस्तं दृष्टान्तं प्रकाशय । यम

वादीर्नरौघेभ्यः क्षेत्रकाशकथायुतं ॥ १०९ ॥ श्रीयेषूरुवाच ॥ स्वक्षेत्रे भद्रबीजं य उवाप स नरा
त्मजः । यत्क्षेत्रं तु मया प्रोक्तं तदिदं वै चराचरं ॥ ११० ॥ भद्रबीजं तथा विद्ध स्वर्गराज्यस्य
सन्ततिं । दुष्टजान् काशबीजं तद्वप्तारं चाभिशापिनं ॥ १११ ॥ शस्यच्छेदनकालस्तु जगतः
शेष एव सः । छेत्तारः कर्षकाश्चोक्ताः स्वर्ग्यदूतास्तथैव ते ॥ ११२ ॥ यथा दाह्यास्तदा काशा
येऽधुना पीडनाद्विना । शस्यैः सहापि वर्द्धन्ते तथान्ते जगतो भवेत् ॥ ११३ ॥ नृपुत्रो निज १२५
राज्याद्धि पातकान्यखिलान्यपि । कुक्रियांश्च बहिष्कर्तुं स्वदूतान् प्रेरयिष्यति ॥ ११४ ॥
ये संचित्याग्निकुण्डेऽपि क्षेपिष्यन्त्यखिलानिमान् । यत्र भीमो विलापः स्याद्दन्तां च विकटा
कृतिः ॥ ११५ ॥ धार्म्मिकाः स्वपितूराज्ये प्रभास्यन्त्यर्कवत्तदा । यस्य कर्णौ स्थितौ श्रुत्यै स
आकर्णयतु ध्रुवं ॥ ११६ ॥ स्वर्गीयराज्यं पुनरेव तुल्यं क्षेत्रप्रगुप्तस्य निधेर्यमाप्त्वा । नरोऽथ

हर्षाद्गत आत्मवस्तु विक्रीय तत्क्षेत्रपणं ददाति ॥ ११७ ॥ पुनर्यद्वद्वणिङ्मुक्ता अन्विच्छन्नति
शोभिताः । अथैकां प्राप्तवान्मुक्तां तत्सर्व्वास्वधिमूल्यकां ॥ ११८ ॥ आत्मवस्त्वखिलं तस्याः
प्राप्त्यै विक्रीतवांस्ततः । तद्वत्स्वर्गीयराज्येऽपि भविष्यद्वित्त मेऽनुगाः ॥११९॥ पुनः स्वर्गीय
राज्यं वै जालं क्षिप्तमिवार्णवे । संहृता येन मत्स्यौघा उत्तमाधममध्यमाः ॥ १२० ॥ रोधस्या
कृष्य पूर्णं तद्धीवरा उत्तमान्झषान् । कुर्वेणीष्वथ रक्षन्ति निक्षिपन्त्यपरांस्तथा ॥ १२१ ॥ १२६
जगच्छेषे भवेत्तद्वद्दौशदूताः समागताः । धार्म्मिकेभ्यः पृथक्कुर्य्युर्यत्नतोऽप्यधमान्नरान् ॥
१२२ ॥ तान्संचित्याग्निकुण्डेऽपि निक्षेपिष्यन्त्यशेषकान् । यत्र भीमो विलापः स्याद्दन्तां च
विकटध्वनिः ॥१२३॥ गुरुरुवाच ॥ इत्युक्त्वापृच्छदाचार्य्यः किं बुध्यध्वेऽखिलान्युत । प्रत्यूचुश्च
ततो नूनं प्रभो बुध्यामहे वयं ॥ १२४ ॥ श्रीयेषूरुवाच ॥ स्वर्गीयराज्याय ततो हि यो यः सुप्रस्तु

तोऽध्यापक एव योग्यः । स वै गृहस्थस्य निभः स्वकोषाच्छन्नस्य नूत्नप्रतनानि नेतुं ॥ १२५ ॥

इति श्रीखृष्टसंगीतायां पुत्राभिषेकपर्व्वणि (राजचरित्रादिषायभव्यवाक्यानां षष्ठसर्गाद्द्वाविंगीतानामष्टसप्ततितमाधीनभव्यवाक्येभ्यो मत्थायस्य द्वादशत्रयोदशसर्गाभ्यां मार्कस्य तृतीयचतुर्थसर्गाभ्यां लूकस्य षष्ठाष्टमदशमैकादशत्रयोदशसर्गेभ्यश्चोद्धृतः) स्वर्गीयदृष्टान्तसार्थो नामाष्टादशोऽध्यायः ॥ १२७

गुरुरुवाच ॥ तद्दिनस्य तु सन्ध्यायां शिष्यान्सोऽभ्यब्रवीदहो । ह्रदमुत्तीर्य्य गच्छाम दशपुर्य्यभिधां भुवं ॥१॥ तस्य संकल्पनं त्वेकोऽनुभूयाध्यापकोऽब्रवीत् । त्वया सार्द्धं गमिष्यामि यत्र यत्र व्रजेर्गुरो ॥ २ ॥ इति श्रुत्वाविदस्तस्यान्वेतुमिच्छोर्वचः प्रभुः । स्वविपज्ज्ञापनार्थेऽतो वाक्यं प्रत्यब्रवीदिदं ॥ ३ ॥ श्रीयेषूरुवाच ॥ लोमशाभिः श्रिता गर्त्ता नीडा एव च पक्षिभिः । नृपु

ऽस्य तु मूर्द्धार्थे स्थानं नास्त्यपि कुत्रचित् ॥ ४॥ गुरुरुवाच ॥ इत्युक्त्वाथावगच्छन्सोऽभ्युक्तः शिष्ये
ण केनचित् । पित्रन्त्येष्टिक्रियार्थेऽद्यात्रानुमन्यस्व मां स्थितं ॥ ५ ॥ श्रीयेषूरुवाच ॥ मृता एव
मृतानां वै क्रियाः कुर्वन्तु साम्प्रतं । किंतु त्वं जीवनप्राप्तस्ता विवर्ज्यान्विहीह मां ॥ ६ ॥
गुरुरुवाच ॥ इत्युक्त्वा जीवदो येषूरात्मशिष्यैः समन्वितः । व्यूहान् रोधसि संत्यज्य गालील्यान्
प्राविशन्तरिं ॥ ७ ॥ ह्रदे दूरं ततो गत्वा गलीलागदरान्तरे । यदाशेत तरौ क्लान्तः सोऽन्यनौ १२८
ष्वन्तिकास्वपि ॥ ८ ॥ भीमया ते तदा व्याप्ता वात्ययैव महोर्म्मिषु । अभिगच्छत्स्वपि मुहुर्मग्ना
इव परिप्लुताः ॥ ९ ॥ अथातिबिभ्यनः शिष्याः शयानमभिगत्य तं । अभिजागर्य्य चोचुः किं
प्रभोऽस्मान्नेक्षसे प्लुतान् ॥ १० ॥ अथोत्थाय स वायुं वै लहरीश्चाप्यभर्त्सयत् । तत्क्षणाच्चाप्य
भूच्छान्तिर्नौस्थानां सर्वतो ह्रदे ॥ ११ ॥ शिष्यांश्चोचेऽल्पविश्वासा इत्थं वोऽभूद्भयं कुतः । अति

भीतास्त्विमे सर्व्वे ऽन्योन्यमभ्यब्रुवंस्तदा ॥ १२ ॥ नौस्थिता ऊचुः ॥ को वै मानुष एवायं येन
ह्याज्ञापिनास्तथा । वायवोऽपि तरङ्गाश्च विनीताः किङ्करा इव ॥ १३ ॥ गुरुरुवाच ॥ ततस्ते हृद
मुत्तीर्य्य नवदेश उपस्थिताः । गदय्यैरुषिते लोकैर्गिरषीयाभिधैः पुरा ॥ १४ ॥ अथ कोऽपि
स्थितस्तत्रापूतभूताश्रितश्चिरात् । शवस्थाननिवासीह सर्व्वपान्थभयंकरः ॥ १५ ॥ शृङ्खलै
रपि यो बद्धो दमनार्थं मुहुर्मुहुः । तान् बलेन सदा भंक्त्वा खण्डखण्डमवाकिरत् ॥ १६ ॥ १२९
नृभ्यो दूरमहोरात्रेऽद्रिषु चित्यासु च स्थितः । सहान्योऽपि सदा नर्द्दन्प्रस्तरच्छिन्नमांसकः ॥
१७ ॥ तयोराद्यः प्रभुं दृष्ट्वा दूरतोऽभ्यद्रवत्तदा । तदग्रे प्रणिपत्यापि भूतव्याप्तस्तथानदत् ॥
१८ ॥ भूत उवाच ॥ किमस्माकं त्वया सार्द्धं हे ऊर्द्ध्वेश्वरात्मज ॥ येषूस्त्वां प्रार्थयाम्यस्मान्
कालात्प्राङ्गा प्रपीडय ॥ १९ ॥ गुरुरुवाच ॥ इत्यूचे स वचः शृण्वन् येष्वस्तन्नरतो वहिः । समाज्ञा

पयतो गन्तुं भूतोऽन्तःस्थो दुरात्मकः ॥ २० ॥ येषूं तु तव किं नामेति पृच्छन्तं तदा शठः । प्रत्यू
चेऽहं गणो नामास्मत्संख्या बहुरस्ति हि ॥ २१ ॥ किंतु चेन्निःक्षिपेर्नृभ्यां तदा नैतत्प्रदेशतः ।
नैवैतद्ह्रदमध्येऽस्मान् पशूनां त्वच्छरीरय ॥ २२ ॥ इत्युवाच गणोऽपूतो वरंचासीद्गिरौ तदा ।
तद्ध्रदस्योपरि महान् कोलानां समजः स्थितः ॥२३॥ ततोऽपूतगणस्यापि स्वीकृत्य प्रार्थनां प्रभुः ।
पीडिताभ्यां वहिर्नृभ्यामैरयच्छूकरोदरे ॥ २४ ॥ अथ ते शूकरा भूतैराविष्टा अत्तिवेगतः । शृङ्गे १३०
ऽभिद्रुत्य निःपेतुर्मग्नाश्चासन् ह्रदेऽखिलाः ॥२५॥ ततस्तद्विसहस्राणां कोलानां पालका भयात् ।
गदरापुर्य्यभिदुत्यावोचन् क्षेत्रेऽपि कर्म्म तत् ॥२६॥ अथ पुर्य्युषिताः सर्वे कोलानां तु विशेषतः ।
मोसिशास्त्रविरुद्धं ये पुण्योर्व्यां स्वामिनोऽभवन् ॥२७॥ ते विनिर्गत्य मिलिता यत्नात्तत्कर्म्मदृष्टये ।
स्थितं येष्वा सहापुस्तं भूतयस्तं प्रकीर्त्तितं ॥ २८ ॥ यश्चादम्यः पुरा नग्नः सदा पान्थभयानकः ।

स सवस्त्रो ऽधुना सभ्यो ऽतिष्ठद्येषूपदान्तिके ॥२९॥ ततो भीता गदर्य्यास्ते ऽशृण्वन् शूकरपालकाः ।
नरोन्मादः कथं यातः पशुषु प्रभुवाक्यतः ॥ ३० ॥ इदमज्ञास्तु ते श्रुत्वा प्रार्थयन् भयविह्वलाः । हे
प्रभो दययापेहि रौद्रकृन्नः प्रदेशतः ॥ ३१ ॥ ईदृशीं प्रार्थनां येषूराकर्ण्य गदराभुवः ।गलीलां
प्रति गत्यर्थमारुरोह पुनस्तरिं॥३२॥ किंत्वारोहन्तमाहूय हीनभूतगणः स तं ।सह गन्तुं ययाचैव
प्रत्यूचे तं तु मोचकः ॥ ३३ ॥ श्रीयेषूरुवाच ॥ मा मया सार्द्धमागच्छ किंतु गेहं पुनर्गतः । स्वीये १३१
भ्यो ब्रूहि कर्म्मैतत्त्वदर्थे च दयां प्रभोः ॥ ३४ ॥ गुरुरुवाच ॥ तच्छ्रुत्वा स गतस्तस्मिन्देशे
दशपुराभिधे । येष्वः शुद्धीकृतः कीर्त्तिं सर्वत्रासूचयन्मुदा ॥ ३५ ॥ इति श्रीखृष्टसंगीतायां
पुत्राभिषेकपर्व्वणि (मत्थायलूकयोरष्टमनवमसर्गाभ्यां मार्कस्य चतुर्थपञ्चमसर्गाभ्यां चोद्धृतो)
भूतोपसर्गदमनं नामोनविंशोऽध्यायः ॥

गुरुरुवाच ॥ तं देशं तु प्रभुस्त्यक्त्वाङ्गैर्गदर्य्यैः समाश्रितं । एकस्मिन् दर्शिते तत्रैश्वर्य्यानुग्रह
लक्ष्मणि ॥ १ ॥ तैबर्य्यं पुनरुत्तीर्य्य तर्य्या शिष्यान्वितो ह्रदं । गलीलां स्वपुरं चापि पुनरेव
मुपस्थितः ॥ २ ॥ तं च तत्र स्थितः कूले व्यूहः कापर्णहूमिणां । महानप्युत्तरिष्यन्तं संप्रत्यैक्षत
सद्गुरुं ॥ ३ ॥ तेष्वध्यक्षस्तु यत्कन्या मृत्युतो जीविताभवत् । यैरनामा तथान्ये च प्रधानाद्या
श्चिकित्सिताः ॥ ४ ॥ ते येषूं दण्डामप्युक्तं हैरोद्यैः सफरीष्यकैः । मठे जिघांसितं चापि १३२
समगृह्णन्त वै मुदा ॥ ५ ॥ नत्वैच्छत्तत्पुरे स्थातुं प्रभुः किंत्वखिलास्वपि । गलीलापूर्षु सद्राज्यं
प्रवक्तुं प्रेरितैः सह ॥ ६ ॥ ततः सर्व्वपुरग्रामान् स तैर्द्वादशभिर्वृतः । शिष्यैः पर्यव्रजद्यत्नात्सु
वार्त्तां विप्रकाशयन् ॥ ७ ॥ तमप्यनुगतास्तत्र स्त्रियः काश्चिद्विशेषतः । याः पुरा रोगभूतार्त्ता
आसंस्तेन चिकित्सिताः ॥ ८ ॥ तासु मुख्या मरीया सा यस्याः सप्त निराकृताः । मन्दभूताः

प्रभोः शक्त्या मग्दलिन्यभिधानिका ॥ ९ ॥ योहन्ना चापि खूजस्य येषूविश्वासिनो वधूः ।
यं भूपो ऽप्यन्तिपाश्चक्रे स्वकर्म्मसचिवं पुरा ॥ १० ॥ सूसन्ना चाप्यनेकाश्च कुलीनास्तत्समा अपि ।
स्वधनव्ययतो यास्तमसेवन्त मुदा गुरुं ॥ ११ ॥ शिष्य उवाच ॥ महाग्रगस्य बद्धा सो ऽन्तिपा
हेरोदिजस्तदा । क्वासात्किमकरोद्वापि गलीलाया महीपतिः ॥ १२ ॥ गुरुरुवाच ॥ दूरे
दक्षिणदेशे स आरब्याजिकृते स्थितः । नावेत्स्वसचिवादीनां खृष्टे विश्वासितां प्रभौ ॥ १३ ॥ १३३
निन्दितस्य गलीलायां येष्वो हैरोद्यनामकैः । नाशृणोदपि नामासौ स्वर्गराज्यविधायिनः ॥
१४ ॥ तस्याप्यग्रवरं हत्वा कारायां स महात्मकं । तद्दुष्कर्म्मपरे चार्यैः सदा द्विड्भिः परा
जितः ॥ १५ ॥ शिष्य उवाच ॥ अथाचार्य्य कथं मृत्युं गतस्तत्र महात्मकः । वरस्निग्धः स
सर्व्वेभ्यः प्रवाचिभ्यो महत्तरः ॥ १६ ॥ यो ऽपि शिष्यद्वयात्स्वीयाल्लेभे स्वानन्दपूरकं । खृष्टस्या

गामिनः साक्ष्यं क्रियाचिह्नौघनिश्चितं ॥ १७ ॥ गुरुरुवाच ॥ घोरां तामापदं शिष्य भूतां तत्स
मयेऽपि ते । इदानीं कथयिष्यामि नारीशाठ्यसमुत्थितां । १८ ॥ भूपपत्नी हि हैरोद्या स्व
विवाहविगर्हणात् । योहन्न्युक्तात्परे वैरं न व्यस्मार्षीत्कदाचन ॥ १९ ॥ तद्धिंसायास्तु समयं
हितं नावाप कर्हिचित् । यावन्नोपस्थितं तस्याः पत्युर्जन्मदिनं शुभं ॥ २० ॥ तदा तेन हि
याम्यायां प्रस्तुतं भोजनं महत् । पिरायारण्ययोर्मध्ये स्वीयदुर्गे मखैर्नृष ॥ ३१ ॥ आमन्त्रिता १३४
स्तदर्थं च वाहिनीपतयोऽखिलाः । पिरायीयाः सगालील्या ये ये नासंस्तदा युधि ॥ २२ ॥ तद्गो
जेऽपि गलीलायाः प्रधानैरावृता स्थिता । स्वपुत्र्या सह सा राज्ञी यून्या पूर्वधवोद्भवा ॥ २३ ॥
सलोमी नाम सा कन्यान्तिपो याधर्म्म्यभूभुजः । भ्रातृजा क्षेत्रजा चापि भूतानृत्यन्मदोत्सवे ॥
२४ ॥ तन्नृत्यपरितुष्टः स सह सर्वैर्निमन्त्रितैः । किं ते वत्से प्रदास्यामीयत्सुखायेत्युवाच तां ॥

२५ ॥ शपित्वा चाप्यतो मन्तोऽब्रवीद्यद्यत्त्वमर्थयेः । कन्ये तत्किल दास्यामि राज्यार्द्धमपि
चेद्वृतं ॥ २६ ॥ इत्युक्ता सा तदा कन्या गता स्वां मातरं प्रति । किं भूपात्प्रार्थयिष्यामि प्र
दित्सोरित्यवोचत ॥ २७ ॥ ततो हिंसकहैरोद्या गुप्तमाकर्ण्य मन्त्रणं । पुत्री तद्वाक्यतो
भूपं पुनर्गत्वेदमब्रवीत् ॥ २८ ॥ सलोम्युवाच ॥ एतदेव महाराज देहि मह्यमनुग्रहात् ।
स्नापकस्येह योहन्नेर्भक्ष्यपात्रेऽर्पितं शिरः ॥ २९ ॥ गुरुरुवाच ॥ इत्युग्रं प्रार्थनं श्रुत्वा व्याकुला १३५
त्माभवत्तदा । भूप आद्रियमाणो हि तं बद्धमपि सद्गुरुं ॥ २० ॥ किंतु तच्छपथं पूर्वं सर्वान्हूताय
उक्तवान् । अतस्तं निष्फलं कर्त्तुं नैच्छन्मूढः स लज्जया ॥ ३१ ॥ ततो योहन्निकारायां तद्दु
र्गान्तःप्रहारिणं । सशस्त्रं प्रैरयच्छेत्तुं शिरस्तस्य महात्मनः ॥ ३२ ॥ अथासौ तच्छिरश्छित्त्वा
भक्ष्यपात्रे निधाय च । आज्ञयानीतमददात्सलोम्यै सर्वसम्मुखे ॥ ३३ ॥ दृष्ट्वा चापि कुमार्य्येषा

हैरोद्यायै समार्पयत् । मात्रे जिघांसवे तद्वै दुर्मनःकामपूरकं ॥ ३४ ॥ तथा यं नारुणद्राज्ञो
नवा राज्यः कुकर्म्मणः । भीतिस्तयोर्भर्त्सनतोऽलीयात्मानं महागुरुः ॥ ३५ ॥ अबधीतमहाबात्मा
भूप हेशाध्ववर्जकः । तत्पत्न्या हिंस्रया राज्ञ्याकृष्ट ईजबलात्मना ॥ ३६ ॥ विलपन्तस्तु
तच्छिष्या हित्वैव स्वगुरोः शिरः । राज्ञ्याः करेऽतिरौद्रं तन्नेत्रयोस्तृप्तिकारकं ॥ ३७ । जीवितं
तु तदात्मानं परात्माग्रे सुमत्य वै । तत्कबन्धं गृहीत्वोर्व्यां निदधुर्धर्म्यरीतिभिः ॥ ३८ ॥ शिष्य १३६
उवाच ॥ किं न शोच्योऽखिलैरेषोऽतिरौद्रः सद्गुरोर्बधः । किं नापीश्वरतः क्रूरा योग्यं ते
दण्डमाप्नुवन् ॥ ३९ ॥ गुरुरुवाच ॥ परे भव्यस्तयोर्दण्डो दम्पत्योरतिपापयोः । यस्त्वेतर्ह्य
प्यभूद्दण्डस्तं शिष्य कथयामि ते ॥ ४० ॥ हारिथो नृप आरब्यो यत्सुतापरिवर्जनात् ।
अन्तिपाधावली जाता हिंसापर्य्यन्तिका क्रमात् ॥ ४१ ॥ दुष्टजामातृदण्डार्थं स्वराज्यस्यापि

वृद्धये । स भीमैरावृतः सैन्यैर्युद्धं चक्रे॰तियत्नतः ॥४२॥ तन्महाबलयोः शिष्य स्वस्वसैनिक
नीतयोः । यदातः समुदायो॰भूद्रणसंकुलसंवृतः ॥ ४३ ॥ तदा निर्ग्रन्थनैर्घोरैर्हैरोद्यस्याखिलं
बलं । ससेनान्यप्यपहतमारबैः प्रियलोप्तृकैः ॥ ४४ ॥ अन्तिपास्तु तदापन्नो भीतिवैकुल्य
विप्लुतः । दूतो॰रिभ्यः सहायार्थी कैशरं प्रैरयल्लिपिं ॥ ४५ ॥ यहूद्यास्त्वपि भूयांसो हतमो
शेन तद्बलं । योहन्नेर्बधदण्डार्थममन्यन्ताब्रुवन्नपि ॥ ४६ ॥ इति श्रीख्रीष्टसंगीतायां पुत्राभि १३७
षेकपर्व्वणि (मत्थायस्य नवमचतुर्दशसर्गाभ्यां मार्कस्य पञ्चमषष्ठसर्गाभ्यां लूकस्याष्टमसर्गात्
फ्लाव्ययोसेफरचितयहूद्यपुरातनप्रबन्धाच्चोद्धृतः) सद्यचरशिरश्छेदो नाम विंशो॰ध्यायः ॥

गुरुरुवाच ॥ योहन्नेस्तु शिरश्छेदं तच्छिष्याः प्रस्थिताः प्रभुं । गलीलायां समाचख्युर्भ्रमन्तं
स्वानुगैः सह ॥१॥ तत्परिभ्रमणे त्वेष लोकान् रुग्भूतपीडितान् । सुस्थीकुर्व्वंश्च सर्व्वत्र शिक्षयंश्च

मठे मठे ॥ २ ॥ भ्रान्तांस्तान् क्लान्तचित्तांश्चावीन् हीनान् पालकैरिव । संदृश्य करुणाविष्टः स्व
शिष्यानिदमब्रवीत् ॥ ३ ॥ श्रीयेषूरुवाच ॥ अतीवभूर्यैव सुपक्वशस्यं तच्छेदका अल्पतमास्तु
सन्ति । छित्त्यै ततो वैतनिकान्प्रणेतुं तत्पक्वशस्येश्वरमर्थयध्वं ॥ ४ ॥ गुरुरुवाच ॥ इत्युक्त्वा
स्वान्तिके येषूस्तान् द्वादश पुरावृतान् । प्रस्तरादीन्समाहूयारेभे प्रेरयितुं तदा ॥ ५ ॥ सर्वा
पवित्रभूतानां वहिष्कृत्यै रुजामपि । दौर्बल्यानां च मोक्षाय तेषु शक्तिं समार्पयत् ॥ ६ ॥ १३८
ज्वलदोजस्विदीपे चाग्रगे निर्वापिते नरैः । तामसैर्जगदेतान् स प्रकाशयितुमादिशत् ॥ ७ ॥
श्रीयेषूरुवाच ॥ मा यात मार्गे क्वचिदन्यजानां सामर्थ्यका नापि पुरीर्विशेत । भ्रान्तांस्त्ववीनेव
य इस्रयेलगोत्रोद्भवास्तानुपयात दीनान् ॥ ८ ॥ यद्यत्स्थले यूयमुपस्थितास्तु तस्मिन्मदादिष्टवचः
प्रवक्त । अहो समायाति चिरादभीष्टा स्वर्ग्यान्तिकेऽपीश्वरराजतेति ॥ ९ ॥ चिकित्सतात्रा

मयिनः पुनीत कुष्ठार्त्तिनो जीवयत प्रमीतान् । भूताग्निरस्येत विमूल्यमेव यूयं यथा प्राप
तथैव दत्त ॥ १० ॥ न हेमरूप्यं च नवापि ताम्रं काञ्चीषु गृह्णीत पथि व्ययार्थं । पाथेयकोषं न
वहध्वमंसे वस्त्रद्वयं नापि तथाददीत ॥ ११ ॥ मार्गाय मा यूयमुपानहोऽपि गृह्णीत किंत्वेक
कमेव दण्डं । सर्वे हि भृत्या निजवेतनार्हा अन्नं लभेरंस्तत एव नूनं ॥ १२ ॥ यस्मिंस्तु यूयं
नगरे प्रविष्टा ग्रामे च यस्मिन्नथ कोऽस्ति योग्यः । तस्मिन् समन्विच्छत तस्य चापि निके १३९
तने तिष्ठत निर्विकारं ॥ १३ ॥ गृहे विशन्तः प्रथमं तु वक्त कौशल्यमत्रास्त्विति चेत्त्विह
स्यात् । कौशल्यपुत्रोऽत्र वसेद्व आशीर्नचेत्तु युष्मान्प्रतिवर्त्तिता सा ॥ १४ ॥ युष्मांस्त्वनर्हो
नगरे गृहे वा न वेशयेद्यो न निशामयेच्च । तस्याथ निर्गत्य पुराद्गृहाद्वा साक्ष्याय मथ्नीत रजो
ऽपि पद्भ्यः ॥ १५ ॥ भीमे विचारस्य दिने ह्यमुष्य पुरस्य दण्डाद्भविता लघीयान् । दण्डः

सुदूम्या अपि दुष्टभूमेर्घुमूर्य्यकायाश्च तदेव वच्मि ॥ १६ ॥ अहो यथावीन्वृकवृन्दमध्ये तथात्र युष्मानहमीरयामि । ततो भुजङ्गा इव पेशलाः स्त पारावताश्चेव तथाप्यहिंस्राः ॥ १७ ॥ नृभ्यस्तु यूयं भवताप्रमत्ताः स्वीयासु ते वो हि महासभासु । समर्पयिष्यन्ति तथा मठेषु ते ताडयिष्यन्त्यपि वः कशाभिः ॥ १८ ॥ अप्यांश्च तैर्यूयमतः प्रदेशाध्यक्षान्तिके भूपतिसम्मुखेऽपि । मदर्थमेवोपगमिष्यथैनत् साक्ष्याय तेषां च परोद्भवां च ॥ १९ ॥ हृतास्तदग्रेऽपि तदोत्तरं किं देयं न संचिन्तयतातियत्नात् । यद्यद्वचो ह्यहथ वक्तुमत्रैवात्मा पितुर्वक्ष्यति वोऽन्तरस्थः ॥ २० ॥ भ्राता तदा भ्रातरमर्पयेद्वै मृत्यै पिता चापि सुतं दुरात्मा । आक्रम्य पुत्राः पितरौ तथैव समानयिष्यन्त्यतिरौद्रमृत्युं ॥ २१ ॥ सर्व्वत्र मन्नामकृते मनुष्यैर्विद्रुह्यमाणा हि भविष्यथैव । यस्त्वन्तपर्य्यन्तमपि स्थिरात्मा सहेत सर्व्वं स लभेत मुक्तिं ॥ २२ ॥ निस्ताडिता

स्त्वेकपुरस्थितैश्चियूयं तदा विद्रवतान्यपुर्य्यां । तथेत्त्वयेल्यासु हि सर्वपूर्षु भ्रम्यं नृपुत्रागमना
वधीतः ॥ २३ ॥ न कोऽपि शिष्यः स्वगुरोर्महीयान्नवा स्वनाथात्किल कोऽपि दासः । आर्य्यं
तु शिष्यस्य गुरूपमत्वं दासस्य नाथोपमता तथैव ॥ २४ ॥ गृहप्रभुं वै यदि बेलुबूलेत्याख्यायु
रत्यन्तमसूयकास्ते । किं नाधिकं तत्परिवारलोकान् भूतेशरूपान् कथयेयुरेवं ॥ २५ ॥ मा भैष्ट
तद्भर्त्सनतस्तु यूयं नह्यस्ति गुप्तं किमपीह लोके । यदप्रकाश्यं नच किंचिदेव रहस्यमेतर्हि 141
परेऽस्त्यवेद्यं ॥ २६ ॥ तमस्यतो वः प्रति यद्ब्रवीमि तन्मानुषान् श्रावयत प्रकाशे । यद्वोऽपि दिष्टं
श्रवणे गृहान्तस्तन्मन्दिरोपर्य्यनुघोषतोच्चैः ॥ २७ ॥ ये देहमात्राहनने समर्था नत्वात्मघाते न
बिभीत तेभ्यः । किंत्वात्मदेहौ नरके निहन्तुं शक्तात्परादेव विभीत गाढं ॥ २८ ॥ अहो किमे
केन पणेन नूनं न विक्रयःस्याच्चटकद्वयस्य । न युष्मदीयस्य पितुस्त्वसाक्षात्कुत्रापि भूमौ प्रपतेन्न

देकः ॥२९॥ वरंच युष्मच्छिरसोऽपिबालास्तेनाखिलाः संगणिताभवन्ति । अतोभयं मा कुरुताधि
मूल्या यूयं हि सम्यक्कूटकौघतोऽपि ॥ ३० ॥ यो योऽङ्गीकुर्य्यान्नराग्रे दृढं मां मत्पित्रग्रेऽङ्गीकरि
ष्याम्यहं तं । भूमौ येनास्वीकृतोऽहं मया सोऽस्वीकार्य्योऽतः स्वर्ग्यपित्रग्र एवं ॥ ३१ ॥ सन्धिं तु
संस्थापयितुं पृथिव्यां मामागतं मानुभवध्रुमेव । यतो न सन्धिं खलु मर्त्यमध्येऽहं सन्निधा
स्यामि वरंतु खड्गं ॥ ३२ ॥ परस्परं भेदयितुं ह्यहं वै समागतस्तातसुतौ समन्तात् । कन्या १४२
जनन्यौ च तथा मदर्थं श्वश्रूस्नुषे चापि विरोधनीये ॥ ३३ ॥ तदा भविष्यन्त्यरयो नरस्य स्व
बान्धवा एव वरंच यो यः । मत्तोऽधिकं स्वं पितरं प्रसूं वा स्निह्येत्सुतौ वापि स मेऽस्त्यनर्हः ॥
३४ ॥ स मेऽप्यनर्हो मनुजोऽस्ति यो न स्वशूलमुत्थाप्य ममानुगः स्यात् । जीवं हि यो विन्दति
नाशयेत्स त्यजेन्मदर्थे तु य आप्नुयात्सः ॥ ३५ ॥ यो यस्तु युष्मान् प्रलभेत हर्षात् स मां प्रभुं

वै लभते तदैवं । यो मां तु गृह्णीत तथैव सोऽथ गृह्णाति मत्प्रेरयितारमेवं ॥ ३६ ॥ ईशप्रवक्ता
रमितो य एव प्रवक्तृनाम्ना प्रलभेत सोऽतः । एतत्फलाप्तोऽथ लभेत यः सन्नाम्नापि सन्तं स
सतः फलाप्तः ॥ ३७ ॥ एतच्छिशूनामपि कंचिदेकं यः पाययेद्वै मम शिष्यनाम्ना । स्नेहात्सु
शीतोदकपात्रमेकं न निष्फलः स्यात्स इति प्रवच्मि ॥ ३८ ॥ गुरुरुवाच ॥ इत्यादिष्टा अमी
येष्वा द्वादश प्रेरितास्ततः । द्वौ द्वौ भूत्वा गलीलीयान्ग्रामान्पर्य्यव्रजन्नितः ॥ ३९ ॥ अनुताप १४३
वचः प्रोचुरैशराज्यागतिं च ते । बहूंश्चाभ्यज्य तैलेनाचिकित्सुः क्षीणदेहिनः ॥ ४० ॥ इति
श्रीखृष्टसंगीतायां पुत्राभिषेकपर्वणि (मत्थायलूकयोर्नवमदशमसर्गाभ्यां मार्कस्य षष्ठसर्गाच्चो
द्धृतः) शस्यच्छेदकप्रेरणं नामैकविंशोऽध्यायः ॥

गुरुरुवाच ॥ तदा हीनः स्वशिष्यैः स वृतैर्द्वादशभिः प्रभुः । शिक्षयंश्च चिकित्संश्च तथा पर्य

व्रजत्पुरीः ॥ १ ॥ सर्व्वत्राननुतापं च गलीलापुरवासिनां । दृष्ट्वाश्चर्य्यक्रियौघानामप्यालोक्या
ब्रवीदिदं ॥ २ ॥ श्रीयेषूरुवाच ॥ धिक्त्वां खोराजिनपुर तथा बेथशैदापि धिक्त्वां यस्माद्यानि
ध्रुवमिह मुहुर्वां प्रदिष्टानि मध्ये । कर्म्माण्येतान्युत यदि कृतानीतरार्च्चिष्वपि स्युस्ते वै भस्म
प्रवृतवपुषः स्युर्विराश्यावृताश्च ॥ ३ ॥ एतत्कुर्य्युश्चिरसमयतस्तूरशीदोनलोका मन्दा अप्य
द्भुतनिकरतः खिन्नचित्तानुतप्ताः । तस्माद्दण्डश्चरमदिवसे तूरशीदोनयोर्वै दण्डाद्वां स्याल्ल १४४
घुतर इति प्रब्रवीम्येव सत्यं ॥ ४ ॥ किंतु त्वं रे मदुषितपुर ख्यातकापर्णहूम स्वर्गोन्नीतो
ऽप्यहह नरके क्षेपणीयं परे ऽध : ॥ आश्चर्य्याणि त्वयि हि चरितान्येव कर्म्माणि चेद्वै सौदूम्ये
खल्वतिशठपुरे स्युस्तदद्यापि तिष्ठेत् ॥ ५ ॥ तल्लोका ह्यद्भुतनिकरतः खिन्नचित्तानुतप्ता हन्तव्या
न स्युरत इह पाक्याग्निगन्धाश्मवृष्ट्या । तद्दण्डोऽतश्चरमदिवसे भीमरौद्रोऽपि भव्यो दण्डान्ने

स्याल्लघुतर इति प्रब्रवीम्येव सत्यं ॥ ६ ॥ गुरुरुवाच ॥ समाप्यैतद्वचः सम्यग्भर्त्सकं क्षुब्धमानसः । ततो विश्वासिनः शिष्यान् स्वान् पर्यालोचत प्रभुः ॥ ७ ॥ तांश्च द्वादशभिर्हीनान् श्रेयोभिरपि तैर्बहून् । दृष्ट्वा स परिसन्तुष्टोऽत इमां प्रजगौ स्तुतिं ॥ ८ ॥ श्रीयेषूरुवाच ॥ दिवः पृथिव्या अपि चेश मत्पितः सुधीभ्य एतद्यद्गोपयोऽखिलं । अवेदयश्चैव शिशून् स्फुटं ततो मुदा प्रशंसामि तवोत्तमां स्पृहां ॥ ९ ॥ तथास्तु सर्वाणि हि मे पिता ददौ न वेत्त्यतः कोऽपि पितुर्विना सुतं । न कोऽपि विद्यात् पितरं सुताद्विना सुतेच्छया वापि सुदीक्षितान्नरात् ॥ १० ॥ अहो परिश्रान्तहृदोऽत्र मानुषास्तथैव यूयं गुरुभारपीडिताः । अतीवदुर्वाह्यपरिश्रमव्यथा विमुक्तये मां समुपैत हेऽखिलाः ॥११॥ युगं मदीयं स्वगलोपरि स्वयं प्रगृह्य शिक्षध्वमथैव मद्बुवं । अहं यतः शान्तविनीतमानसस्ततः सुविश्राममवाप्स्यथात्मकं ॥ १२ ॥ नहि दुःसहनीयं वै

मदीयं विद्यते युगं । मदीयश्च तथा भारो न दुर्वाह्यो लघुस्तु सः ॥ १३ ॥ गुरुरुवाच ॥ इति प्रोच्य
प्रभुः शान्तो बहुशिष्यावृतो व्रजन् । गलीलापूर्ष्वगच्छत्स्वं नशरेतं पुरालयं ॥ १४ ॥ तन्मठे च
यथा पूर्व्वं शैशवेऽपि सदाविशत् । विश्रामाहे तथेदानीं गुरुर्भूतोऽप्युपस्थितः ॥ १५ ॥ तत्र दत्त
मधीत्यर्थमिषायस्य प्रवाचिनः । पुस्तकं स विमुच्यात्रैतत्प्राप्याध्यैत सद्वचः ॥ १६ ॥ श्रीयेषू
रुवाच ॥ सदात्मा महेशस्य मय्येव संस्थो यतो दुर्व्विधेभ्यः सुवार्त्तां प्रदातुं । तथा खिन्नहृत्सा १४६
न्त्वनं बद्धमुक्तिं तथान्धानुदृष्टिं च नुन्नोऽस्मि कर्त्तुं ॥ १७ ॥ नरान्दुष्टकारात उद्धर्त्तुमेव महेश
प्रसन्नाख्यसंवत्सरं च । रुदत्येव शीयोनलोके प्रवक्तुमिदानीं सदात्माभिषिक्तोऽहमेतः ॥
१८ ॥ गुरुरुवाच ॥ इत्यधीत्य पुरोक्तं नत्वृष्टस्यागामिनः परे । नाम्ना निहितचिह्नौघं भव्य
वाक्यं प्रकीर्त्तितं ॥ १९ ॥ प्रभुर्ग्रन्थमिषायीयं पुनर्बद्ध्वा समर्प्य च । परिचारकहस्तेऽथ समासीनो

ऽभवन्मठे ॥ २० ॥ सर्व्वेषां तत्र संस्थानां नशरेत्पुरवासिनां । तस्मिन् पतत्सु नेत्रेषु पुनरुक्तं तथा वचः ॥ २१ ॥ श्रीयिषूरुवाच ॥ अद्यैवैतद्वचो वित्त पूरितं वोऽपि गोचरे । येन ह्युक्तं क्रियैषं वै कार्य्यं शुश्रुव सोऽस्म्यहं ॥ २२ ॥ गुरुरुवाच ॥ तथारिभेऽभिषिक्तः स तद्भव्यवचसः स्फुटां । टीकां ते त्वति विस्मित्य समवोचन् परस्परं ॥ २३ ॥ नाशरेत्या उचुः ॥ कोऽयं वै यो वचांसीयत्प्रसादानि ब्रवीति नः । कुतस्तस्येयती बुद्धिरियत्यः शक्तयोऽपि च ॥ २४ ॥ किं नायं सूत्रधारस्य पुत्रः १४७
किं वा न तत्प्रसूः । मरीया भ्रातरः किं न ज्ञाता अस्माभिरस्य वै ॥ २५ ॥ याकोबयोसि सीमोमयहूदाख्या न सन्ति किं । किं वा नास्य स्वसारोऽपि समीपे नोऽधुना स्थिताः ॥ २६ ॥ गुरुरुवाघ ॥ एतद्विधमविश्वासं प्रभुः स्वपुरवासिनां । समालोच्य ततो वाक्यमेतन्निष्ठुरमब्रवीत ॥ २७ ॥ श्रीयिषूरुवाच ॥ निःशङ्कं यूयमेतन्मे प्रवदिष्यथ वै वचः । हे ख्यातभिषगात्मानं

त्वं चिकित्सितुमर्हसि ॥ २८ ॥ कृतं कपर्णहूमे यं क्रियौघं शुश्रुम त्वया । तं तथा स्वप्रदेशेऽपि
कुरु त्वमिह साम्प्रतं ॥ २९ ॥ सत्यमेतत्तु वो वच्मि ग्राह्योऽनेशप्रवाच्यपि । स्वप्रदेशे स तत्रे
वानादृतो ह्यात्मबन्धुभिः ॥ ३० ॥ अलीयसमये नूनं यदा सार्द्धत्रिवत्सरं । अनावृष्ट्याखिला
भूमिर्दुर्भिक्षेण च पीडिता ॥ ३१ ॥ तदा किं नैस्त्रयेलेषु विधवा बहवः स्थिताः । न कांचित्प्रति
तासां तु प्रेरितः स महागुरुः ॥ ३२ ॥ किंतु शीदोन्यदेशस्य शारिप्तनगरे स्थिता । विधवैका
महालीयाद्भुतकार्य्यैः सुतर्पिता ॥ ३३ ॥ तथालीषायसमय ऐस्त्रयेलेष्वपि स्थिताः । बहवः 148
कुष्ठिनः किंतु नैकस्तेन चिकित्सितः ॥ ३४ ॥ नहमानस्तु सुर्य्याणां सेनानीर्योऽभवत्तदा ।
कुष्ठी भूत्वैककः पूतोऽलोषायेण प्रवाचिना ॥ ३५ ॥ गुरुरुवाच ॥ एतन्महागुरोः श्रुत्वा नाद्भुतं
किमपीच्छतः । अविश्वासत एवैषां मध्य आचरितुं दृढं ॥ ३६ ॥ नाशरेत्याः क्रुधा पूर्णा मठान्नं

पुरतोऽपि च । वहिष्कृत्यानयन् शैले यदग्रे स्थापिता पुरी ॥ ३७ ॥ प्रपातयितुमप्यस्मादि्ग
रेष्विच्छत्सु तेष्वथ । प्रभुर्मध्यस्थितोऽप्यन्तर्हितो भूत्वा विनिर्गतः ॥ ३८ ॥ न तन्मूर्खपुरे के
ऽपि विनाल्पैर्दुर्बलैर्नरैः । तत्पृष्ट्या स्वास्थ्यमापन्नैस्तत्क्रियाभिः सुतर्पिताः ॥ ३९ ॥ इति
श्रीखृष्टसंगीतायां पुत्राभिषेकपर्व्वणि (राजचरित्रादिषायभव्यवाक्यानामेकषष्टितमसर्गान्मत्था
यस्यैकादशत्रयोदशसर्गाभ्यां मार्कस्य षष्ठसर्गाल्लूकस्य चतुर्थदशमसर्गाभ्यां चोद्धृतो) गलीला १४९
पुरभर्त्सनं नाम द्वाविंशोऽध्यायः ॥

गुरुरुवाच ॥ एतस्मिन्समये भूपो गलीलां पुनरागतः । अमङ्गलयुताजेः स्वात्स हैरोद्यो
ऽन्तिपाभिधः ॥ १ ॥ येष्व आश्चर्यकर्म्माणि परिख्यातानि सर्व्वतः । आकर्ण्य स्वीयभृत्येभ्यो
यत्नात् प्रष्टुं प्रचक्रमे ॥ २ ॥ कोऽयमित्यथ तं केचिदलोयोऽयं महागुरुः । स्वर्गात्प्रत्यागत इति

प्रोचुः किंत्वन्य उचिरे ॥ ३ ॥ प्रन्नानां भव्यवक्तॄणामेकोऽयं मृत्युतः पुनः । समुत्थित इति श्रुत्वा भूपोऽवादीद्भयाकुलः ॥ ४ ॥ अन्तिपा उवाच ॥ योहन्निःस्नापकोऽस्त्येष लूनं यन्मस्तकं मया । मृत्योः स पुनरुत्तस्थावतः शक्त्यावृतो ध्रुवं ॥ ५ ॥ गुरुरुवाच ॥ इत्युन्मत्तवचः स स्वदुष्क्रिया क्षुब्धमानसः । प्रोचे येषूमपि द्रष्टुमन्विच्छन् बहुयत्नतः ॥ ६ ॥ भूभुजोऽन्वेषणं चैतद्गलीलायां प्रकीर्त्तितं । तेऽपि द्वादश संश्रुत्य प्रेरिताः पूर्षु ये पुरा ॥ ७ ॥ प्रभुं प्रति समागत्य वच एतद सूचयन् । स्वकृतान्यपि कर्म्माणि भ्रान्तानां शिक्षणानि च ॥ ८ ॥ सत्वमुं दुर्नृपं द्रष्टुं नेच्छंस्तैः सह धन्वनि । बेथशैदपुरासन्ने ययौ नावा ह्रदोपरि ॥ ९ ॥ तं तु तत्र गतं ज्ञाता महाव्यूहा स्तटस्थिताः । पद्भ्यां नानापुरीभ्योऽपि यत्नात्तद्धन्वनि द्रुताः ॥ १० ॥ तांश्च यातान्समालोच्य पालहीनानवीनिव । करुणाविष्टहृत्साऽत उपदेष्टुं प्रचक्रमे ॥ ११ ॥ ईशराज्यसुवार्त्तां तान्

सूचयामास सर्वशः । रोगिणोऽपि च तन्मध्ये स्थितान् सुस्थीचकार सः ॥ १२ ॥ प्रायः
सायं समायाति स्वकार्य्यामचिरात्क्रियां । निश्चित्यापि फिलिप्पं सोऽब्रवीदेव परीक्षितुं ॥
१३ ॥ श्रीयिषूरुवाच ॥ बेथशैदीय हे शिष्येयतो व्यूहान् समागतान् । कथं भोजयितुं द्रव्यं
क्रीणीयामात्र संस्थिताः ॥ १४ ॥ फिलिप्प उवाच ॥ इयतां क्रेतुमन्नार्थं किंचित्किंचिदपि
प्रभो । न भवेदेव निर्व्वाहः शतकर्षद्वयव्ययैः ॥ १५ ॥ गुरुरुवाच ॥ अथान्येऽपि समागत्या १५१
ब्रुवन् शिष्याः प्रभुं प्रति । इयं वै धन्वभूम्यस्ति गतः प्रायोऽपि वासरः ॥ १६ ॥ अतो ग्रामे
ष्विमान् यातुं भोजनक्रीतयेऽधुना । क्षेत्रेषु च परिस्थेषु गुरो प्रस्थापय द्रुतं ॥ १७ ॥ एतच्छ्रुत्वा
ब्रवीद्यिषूर्यूयं भोजयतेत्यथ । किं कर्षद्विशतेनान्नं गत्वा क्रेष्याम आपणं ॥ १८ ॥ इत्यपृच्छन्
प्रभुं शिष्याः स च प्रत्यब्रवीत्ततः । कियदत्रास्ति वः कोषेऽन्नं ब्रूतान्विष्य मेऽधुना ॥ १९ ॥ इत्या

दिष्टेषु शिष्येषु गतेष्वपि च संशयं । एकोऽतः प्रस्तरभ्रातान्द्रिय एतद्वचोऽब्रवीत् ॥ २० ॥
अन्द्रिय उवाच ॥ बालकस्य स्थितस्यात्र कोषे मीनद्वयं तथा । पंचैव यवपिष्टानि तैस्तु किं
स्यादिहैथतां ॥ २१ ॥ गुरुरुवाच ॥ इत्याकर्ण्य प्रभुः प्रोचे तान्यानयत मेऽन्तिके । भूमौ
सर्वानपि व्यूहान् समासयत पङ्क्तिशः ॥ २२ ॥ अथातः स महाव्यूहः पंचसाहस्रसंख्यकः ।
पंचाशच्छः समासीनोऽभवत्तत्र हरित्तृणे ॥ २३ ॥ ततस्तु यवपिष्टानि पंचादाय प्रभुः स्थितः । १५२
उर्द्ध्वास्यः स्तुतिवाक्येन निवेद्य परमात्मने ॥ २४ ॥ भंक्त्वा वापि स्वशिष्येभ्यो विभक्तुमददात्तदा ।
व्यूहे क्रमश आसीने तथा चैव झषद्वयं ॥ २५ ॥ ये ये चासन्नरास्तत्र बालकाश्च स्त्रियोऽपि च ।
शतपङ्क्तिषु संविष्टास्तृप्तास्तेऽन्नेन सर्वतः ॥ २६ ॥ सुतृप्तेष्वथ सर्वेषु स्वशिष्यान् पोषकोऽ
ब्रवीत् । शेषखण्डानि चिनुत मा कस्यापि क्षयोऽस्त्वतः ॥ २७ ॥ यवपिष्टकमीनानां शेषखण्डानि

ते तथा । संचित्यापूरयन्नेभिरिव द्वादश उल्लकान् ॥ २८ ॥ एतद्येषूकृतं कर्म्माद्भुतं संदृश्य ते
नराः । ड्रुरीशप्रवाचो यो भुव्यपेक्ष्योऽस्त्ययं ध्रुवं ॥ २९ ॥ स्वशिष्यांस्तु प्रभुः प्रोचे यूयमारुह्य
नस्तरिं । याताहं त्विह संतिष्ठन् व्यूहान्प्रस्थापयाम्यतः ॥ ३० ॥ इत्यादिष्टेषु शिष्येषु समा
रूढेष्वतस्तरिं । संस्थितः स सह व्यूहैर्निशि पंचसहस्रकैः ॥ ३१ ॥ ये तदातः स्वपोष्टारं
राजानं कर्त्तुमिच्छया । अन्वैच्छन् किल सर्वत्रादिधीर्षुश्च बलादपि ॥ ३२ ॥ तत्संकल्पं प्रभु १५३
र्ज्ञात्वा नेच्छंश्चाप्यभिषेचनं । प्रार्थनार्थं पृथग्भूत्वा निश्येकाकी गिरिं ययौ ॥ ३३ ॥ शिष्यास्तु
प्रभुणा हीना बेथशैदान्तिके हृदे । प्रतिकूलेन वातेन संरुद्धगतयोऽभवन् ॥ ३४ ॥ अत्युच्चैश्च
तरङ्गैस्ते स्वनाव्यान्दोलिता निशि । सुक्लान्ताः प्रभुविच्छेदव्याकुलाश्चाभवंस्तदा ॥ ३५ ॥
हृदमध्ये गताः प्रायो गव्यूतिं कूलतो वहिः । चतुर्थप्रहरे रात्रौ समालोचन्त ते प्रभुं ॥ ३६ ॥

जलोपरि चलन्तं तु नौसमीपेऽप्युपस्थितं । तं सुज्ञातमुखं दृष्ट्वातः सर्वेऽतिभयं गताः ॥ ३७ ॥
अनर्हश्चाप्यतित्रासाद्भूतोऽयमुपस्थितः । येषूस्तांस्त्ववदद्भीतिं मा यातास्म्यहमेव हि ॥ ३८ ॥
इति श्रुत्वा वचोऽवादीत्प्रस्तरस्त्वं यदि प्रभुः । स्या मामागमयैवं नु स्वसमीपे जलोपरि ॥ ३९ ॥
इत्याकर्ण्याब्रवीद्येषूरागच्छेत्यथ स द्रुतं । नावमुत्सृज्य चलितुमारेभेऽप्सु प्रभुं प्रति ॥ ४० ॥
चण्डं वायुं तु संदृश्यात्यूर्द्ध्वाश्चोर्म्मीरपि त्रसन् । मंक्तुमारभमाणः स प्रभो रक्षेत्युदस्तनत् ॥ ४१ ॥ १५४
अथाशु स प्रभुर्बाहुं विस्तीर्य्यातस्तमग्रहीत् । अभ्यूचे चाल्पविश्वास किमर्थं त्वमशंकथाः ॥
४२ ॥ अथ तेन यदा सार्द्धं तन्नावं प्राविशत्प्रभुः । तत्क्षणेऽप्यभवच्छान्तः सतरङ्गः समीरणः ॥
४३ ॥ ततस्तन्नौस्थिताः कृत्स्ना अत्यन्तं विस्मयं गताः । गरीयो दृष्टवन्तोऽपि खृष्टैश्वर्य्यस्य
लक्षणं ॥ ४४ ॥ ह्यस्तनामन्नवृद्धिं न स्मरन्तः स्थूलबुद्धयः । आपन्मुक्तास्तदोचूस्त्वमीशपुत्रो

ऽसि निश्चयं ॥ ४५ ॥ तत्परे प्रचलन्तस्तु निर्विघ्नं ते ह्रदोपरि । शेषं कापर्णह्रूम्येऽतो मुदा तीर
उपस्थिताः ॥ ४६ ॥ तं तु रोगमुचं ज्ञात्वा यातं तत्क्षितिवासिनः । परितः सर्व्वरोगार्त्तान्
संविन्वन्ति स्म यत्नतः ॥ ४७ ॥ खट्वारूढांश्च संस्थाप्य स्वस्वग्रामापणेषु तान् । स्पर्शमात्रेण
तान् येषूं सुचिकित्सितुमार्थयन् ॥ ४८ ॥ शिष्य उवाच ॥ यस्तु ह्यः पालितो येष्वा व्यूहः पंच
सहस्रकः । तदामुं च नृपं कर्त्तुमदिधीर्षद्बलादपि ॥ ४९ ॥ सोऽथ किं चक्र आचार्य्य गुप्त्या १५५
तन्मध्यतः प्रभौ । सम्यगन्तर्हिते पश्चात्तीर्णवत्यप्यतो ह्रदं ॥ ५० ॥ गुरुरुवाच ॥ प्रातस्ते
बह्वो लोकाः स्मरन्तो वा उपस्थितां । तत्रैकमात्रनावं ह्यः सशिष्यप्रभुवाहिकां ॥ ५१ ॥
सायं व दृष्टवन्तोऽपि नाव्यस्यामपगच्छतः । गुरुहीनांस्ततः शिष्यानिमानेव ह्रदोपरि ॥५२॥
आगतास्त्वपि तैबर्य्यपुरात्तत्र तदन्तरे । यदान्नं तत् प्रभुः स्तुत्यान्यवेदोदन्यनौषु वै ॥ ५३ ॥

अतस्ते ऽन्वभवन् सर्वे तदाप्यद्भुतकारिणं । तमेवैकाकिनं नूनं तिष्ठन्तं तत्र धन्वनि ॥ ५४ ॥
अतो ऽदृष्ट्वा महायत्नान्नतु संप्राप्य कुत्रचित् । अनुमाय गतं तस्मात्ते ऽन्वगच्छंस्तरिष्वपि ॥
५५ ॥ तीरे कापर्णहूम्ये च त उत्तीर्णा हृदात्प्रभुं । अन्विष्याथ मठे तस्य नगरस्याप्नुवन्मुदा ॥
५६ ॥ विस्मयाच्चाब्रुवन्नत्र त्वमायातः कदा गुरो । इत्युक्तः स इमान् सत्यस्तदा वाक्यैरभर्त्स
यत् ॥ ५७ ॥ श्रीयेषूरुवाच ॥ यूयं नैश्वर्य्यसच्चिह्नदृष्टिहेतोरिहापि मां । किंत्वन्नादनसंतृप्ते १५६
रेव दृष्ट्वा लोभकाः ॥ ५८ ॥ इत्यहं किल वो वच्मि वरं नाश्यान्नभुक्तये । मा श्राम्यत यद
न्नं तु सदा तिष्ठेत्तदाप्तये ॥ ५९ ॥ नित्यजीवनयोग्यान्नमेतद्दास्यति वो यतः । पित्रेशेन
तदर्थं वै मुद्रितः स नरात्मजः ॥ ६० ॥ गुरुरुवाच ॥ इदं श्रुत्वावदन् व्यूहा ईश्वरेष्टक्रिया
कृते । किं गुरो ऽथाचरेमेति ततः प्रत्यब्रवीत्प्रभुः ॥ ६१ ॥ श्रीयेषूरुवाच ॥ ईश्वरेनाधुना

भूमौ प्रेरिते प्रत्ययो मयि । संस्थाप्य इति वो ज्ञेयैव तदिष्टक्रिया ध्रुवं ॥६२॥ गालील्या ऊचुः ॥
किं करोष्यथ चिह्नं त्वं यत्संदृष्ट्वा वयं खलु । त्वयि शंकां विना सर्व्वे कुर्य्याम प्रत्ययं मुदा ॥
६३ ॥ किं करोषि महत्कर्म्म यादृशं पितरो हि नः। भ्रमन्तः प्रान्तरे प्रापुर्मोसिवाक्यप्रतीतये ॥
६४ ॥ भोजितास्ते किमप्यन्नं चत्वारिंशत्समाः सदा । सद्ग्रन्थोक्तं यथा सो ऽन्नं तान्स्वर्गादप्य
भोजयत् ॥ ६५ ॥ गुरुरुवाच ॥ इत्युक्तो ऽप्रत्ययैर्लोकैरन्नमात्रप्रलिप्सुभिः । तदैतदपि वाक्यं १५७
तान्प्रति स प्रभुरब्रवीत् ॥ ६६ ॥ श्रीयेषूरुवाच ॥ स्वर्गतो ऽन्नं न वो मोसिर्द्ददौ किंत्विह मत्पि
ता । ततो ऽन्नं राति वः सत्यमिति नूनं ब्रवीम्यहं ॥ ६७ ॥ यो ऽवतीर्णो ह्यभूत्स्वर्गाद्दातुं
जगति जीवनं । तमेवेश्वरसत्यान्नाभिध जानीत निश्चयं ॥ ६८ ॥ गुरुरुवाच ॥ इत्याकर्ण्य
ततो गृध्राः प्रत्यूचुस्ते प्रभो यदि । एवं स्यान्नस्त्वदुक्तान्नं तदा देहि निरन्तरं ॥ ६९ ॥

श्रीयेषूरुवाच ॥ जीवनस्याहमेवान्नमतो यो ऽभ्येति मां स न । क्षुध्येत्प्रत्येति मां यश्च स न तृष्येत्क
दाचन ॥ ७० ॥ किंतु मां दृष्टवन्तो ऽपि यूयमन्नाप्तितोषिणः । न प्रतीथ दृढं गृध्रा इत्युक्तं वः
पुरा मया ॥ ७१ ॥ पिता यच्छति यद्यन्मे तन्मामभ्येष्यति ध्रुवं । यो यश्चाभ्येत्यहं तं न निरस्येयं
कदाचन ॥ ७२ ॥ नह्यात्मेच्छां समाप्तुं वै मत्संप्रेरयितुस्त्वहं । इच्छां पितुरिह स्वर्गादवतीर्णो
ऽस्मि निश्चयं ॥ ७३ ॥ यद्दत्तं तेन मे तद्वै नापचेयं तु सर्वशः । उत्थाप्यं चान्तिमे ऽह्नीतीच्छा मत्प्रे १५८
रयितुर्दृढं ॥ ७४ ॥ पुत्रं प्रत्येति यो दृष्ट्वाप्यं तेनानन्तजीवनं । स चोत्थाप्यो मयान्त्ये ऽह्नीतीच्छा
प्रेरयितुः पितुः ॥ ७५ ॥ गुरुरुवाच ॥ इदं स्वर्गावतीर्णान्नवाक्यं संश्रुत्य ते जनाः । विचित्रं
कुत्सनीयं च मत्वान्योऽन्यं समूचिरे ॥ ७६ ॥ गालील्या ऊचुः ॥ किं न योसेफपुत्रो ऽयं येषूर्यत्पित
रावपि । विद्मो ऽथावातरं स्वर्गादित्यनेनोच्यते कथं ॥ ७७ ॥ गुरुरुवाच ॥ ईदृगप्रत्ययानां तु

नृणामन्नार्थिनामपि । गर्जनं प्रभुराकर्ण्याब्रवीत्तद्वचनार्थवित् ॥७८॥ श्रीयेषूरुवाच ॥ तद्वन्मा
गर्जतान्योऽन्यं यं ह्याकर्षति मत्पिता । मां स एव क्षमोऽभ्येतुं मयोत्थाप्योऽन्तिमेऽह्नि च ॥७९॥
ईशशिष्याःपरे सर्व इत्युक्तं सत्प्रवक्तृभिः । अतः पित्रुक्तिशिक्षाप्तो यो यः सोऽभ्येति मां स्वयं ॥८०॥
नतु सत्पितृदर्शित्वाद्यतस्तं कोऽपि वै नरः । ईश्वरोत्थाद्विनापुत्रान्न ददर्श कदाचन ॥८१॥
पितृदर्शिनि यो यस्तु प्रतीयान्मयि तस्य वै । नित्यजीवनमित्युक्तं जीवानान्नेन वो मया ॥ १५९
८२ ॥ प्रान्तरे पितरो वो ये किमप्यन्नं सुभोजिताः । ते मृता एतदन्नं तु योऽद्यान्न म्रियते
ऽथ सः ॥ ८३ ॥ स्वर्गतो ह्यवतीर्णं यज्जीवनान्नं तदस्म्यहं । यश्चैतदन्नमत्त्येवाप्नं तेनानन्त
जीवनं ॥ ८४ ॥ यद्दास्याम्यहमन्नं तु तन्मे मांसं किल स्थितं । जगतो जीवनायैव प्रदेय
मचिरान्मया ॥८५॥ गुरुरुवाच ॥ इदं श्रुत्वा व्यरुन्धंस्तेऽब्रुवंश्चापि परस्परं । कथं दातुं स्वमांसं

नो भोजनायैष शक्नुयात् ॥ ८६ ॥ श्रीयेषूरुवाच ॥ सत्यं वो वच्मि चेन्मांसं नाद्यात नृसुतस्य वै ।
न पिबेनापि तद्रक्तं जीवनं नास्ति वोऽन्तरे ॥ ८७ ॥ यो हि मन्मांसभोजी वै मदसृक्पाय्यपि
स्थितः । सोऽनन्तजीवनाप्तोऽस्ति मयोत्थाप्योऽन्तिमेऽह्नि च ॥ ८८ ॥ सत्यमन्नं हि मे मांसं सत्यं
पीतमसृङ्मम । मन्मांसभुगसृक्पायी मय्यस्त्यस्मिंस्तथास्म्यहं ॥ ८९ ॥ यथाहं जीवता पित्रा
प्रेरितो जीवितोऽप्यतः । तथा योऽप्यत्ति मां सोऽथ मत्तो जीविष्यति ध्रुवं ॥ ९० ॥ एतत्स्वर्गा
वतीर्णान्नं न तद्वत्पितरो हि वः । यज्जग्ध्वाथ मृता एतद्भोक्ता जीवेत्तु शाश्वतं ॥ ९१ ॥
गुरुरुवाच ॥ इति कापर्णहूम्ये स व्यूहानुपदिशन् मठे । प्रभुर्व्यस्मापयल्लुब्धान् स्वशिष्यां
श्चाप्यतस्तथा ॥ ९२ ॥ एतेषां हि तदा केचिद्वक्तुमारेभिरे मिथः । कोऽवगन्तुमिदं वाक्यं शक्नुया
दतिदुर्गमं ॥ ९३ ॥ इदं त्वनुभवन् येषूस्तन्मध्ये च स्थितानपि । अश्रद्धान्कांश्चिदेकं च शठमप्ये

तदब्रवीत् ॥ ९४ ॥ श्रीयेषूरुवाच ॥ किमेतद्वचनं शिष्या युष्मान् विस्मापयत्यहो । तथावस्त्रंसयति
च प्राक्स्थितेः सुस्थितानपि ॥ ९५ ॥ पूर्वस्थाने त्वपिस्वीय आरोहन् मानुषात्मजंः । युष्माभि
र्यदि दृष्टःस्यात्तदा किं वक्ष्यथाविदः ॥ ९६ ॥ यस्तु जीवयितुं शक्त आत्मा विज्ञेय एव सः । अतो
ऽत्र स्थूलमांसस्य फलं नास्त्यपि किंचन ॥ ९७ ॥ यास्तु वो वच्म्यहं कैश्चिदप्रतीता अपि ध्रुवं ।
ता एव वाच आत्मानं वित्त जीवनमेव च ॥ ९८ ॥ तस्माद्धेतोः पुराप्युक्तं मया युष्मान् प्रति १६१
स्फुटं । मां न कोऽपि क्षमोऽभ्येतुं विना दानेन मत्पितुः ॥ ९९ ॥ गुरुरुवाच ॥ आकर्ण्यैतदितः
शिष्या बहवोऽपि पराङ्मुखाः । भूत्वा तेन समं गन्तुं नैच्छन्कठिनवादिना ॥१००॥ अतोऽपि
प्रस्तरादीन् सोऽभ्यूचे शिष्यगणादृतान् । यूयमप्यवगन्तुं किं तथा मत्तः समिच्छथ ॥ १०१ ॥
इति पृष्टस्तदोवाच सीमोनः कं प्रति प्रभो । अथेयाम त्वयि ह्येवानन्तजीवनवाक् स्थिता ॥

१०२॥ त्वमेव पुण्यरूपोऽसोशेन संस्थापितो भुवि । इति विश्वसिमः सम्यग्वयं विद्म च
निश्चयं ॥१०३॥ इदं द्वादशशिष्यार्थमाकर्ण्य प्रस्तरोदितं । स्थिरविश्वासवाक्यं तांस्तदा
प्रत्यब्रवीत्प्रभुः ॥ १०४ ॥ श्रीयेषूरुवाच ॥ यूयं द्वादशसंख्याः किं न मयाग्रे विशेषिताः । युष्म
न्मध्ये तु कोऽप्यत्रास्त्यभिशापिस्वरूपकः ॥ १०५ ॥ शिष्य उवाच ॥ इङ्गितः प्रभुणा कोऽसावभि
शापिस्वरूपकः । शठो द्वादशमध्येऽपि स्थितः शिष्यगणादृतः ॥१०६॥ गुरुरुवाच ॥ इष्कार्य्यो १६२
त्यभिधो यः स्वं यहूदो घातुकारिषु । गुरुं समर्पयेत्पश्चादभिशापी स इङ्गितः ॥ १०७ ॥
आदितो हि प्रभुर्विज्ञः शिष्यव्यूहान्तरे खलु । ह्यन्धविश्वासिनां जज्ञेऽमुष्य चापि विशेषतः
॥ १०८ ॥ महापातककर्म्मैतन्मोक्तृमाहात्म्यवर्णने । परे चेदिच्छसि श्रोतुं कथयिष्यामि
विस्तरात् ॥१०९॥ किंतु पित्राभिषिक्तस्य मोक्तुर्याः प्रथमाः क्रियाः । संस्कारश्च परीक्षा

च गालील्येषु च भासनं ॥ ११० ॥ तथा द्वादशशिष्याणां गुरुदुष्कारकाद्विना । यद्गदात्
सन्तमानां वै सर्वतो वरणं परं ॥ १११ ॥ आदिमा उपदेशश्च व्यक्ताव्यक्तार्थकास्तथा । अग्रगस्य
च संस्कर्तुश्चरित्रं मरणावधि ॥ ११२ ॥ तान्यशेषाणि शिष्यैतर्ह्युपदेशार्थमेव ते । पुत्राभि
षेकवाक्यानि विद्युक्तानि स्फुटं मया ॥ ११३ ॥ शिष्य उवाच ॥ एतत्पूर्वोपदेशेषु त्वत्प्रसा
दोदितेष्विह । व्यक्ताव्यक्तार्थवाचो वै मयापि विदिता गुरो ॥ ११४ ॥ विशेषाच्चरमं यत्तु १६३
संश्रुतं श्रीप्रभोर्वचः । अवतीर्णान्नविषयं गुढार्थमति विद्यते ॥ ११५ ॥ नत्वतो ऽपि गलीलीयाः
शिष्या इव पराङ्मुखः । अहं स्यां पुण्यरूपस्येशसूनोः श्रवणाद्गिरां ॥ ११६ ॥ किंतु ता
निखिलाः श्रोतुमवशिष्टास्तथा गुरो । इच्छामि स्थिरविश्वासप्रस्तरोक्त्यनुसारतः ॥ ११७ ।
कमन्यं प्रति गच्छेयं मुमुक्षुर्मोचकाद्विना । ऐशाद्यस्मिन् किलैकस्मिन् नित्यजीवनवाक्

स्थिता ॥ ११८ ॥ इति श्रीखृष्टसंगीतायां पुत्राभिषेकपर्व्वणि (मोसिपंचशास्त्रान्मत्थायस्य चतुर्द्दश सर्गाद्योहन्निमार्कयोः षष्ठसर्गाल्लूकस्य नवमसर्गाच्चोद्धृतो) ऽनन्तजीवनान्नं नाम त्रयोविंशो १६४ ऽध्यायः ॥ समाप्तं चेदं त्रिसप्तत्यधिकशतद्वयाधिकसहस्रश्लोकात्मकं पुत्राभिषेकनामकं द्वितीयं पर्व्व ॥

अशुद्धपत्रं

| पत्रे | पङ्क्तौ | अशुद्धं | शुद्धं |
|---|---|---|---|
| १ | ९ | खृष्टसंस्कारात् | खृष्टसंस्कारं |
| २ | २ | संतस्थौ | संतस्थे |
| — | ६ | संस्थास्यति | च स्थास्यति |
| ५ | १ | सस्कृतिं | संस्कृतिं |
| — | २ | धर्म्मिणश्रापि | धर्म्मिणश्चापि |
| — | ९ | थार्य्येतिपप्रच्छु | थार्य्येति पप्रच्छु |
| ६ | ६ | नव लान्न | न बलान्न |
| ११ | — | निर्णितो | निर्णीतो |
| — | ७ | ईशपुत्तांश्च | ईशपुत्रांश्च |
| १२ | — | च्चोद्भृतः | च्चोद्भृत |
| — | ८ | यद्दानितीरतः | यर्द्दानितीरतः |
| १४ | २ | स्वमुर्द्धघ्नी | स्वमूर्द्धघ्नी |
| — | ७ | ईति | इति |
| १७ | ५ | ६८ | ३८ |
| — | ९ | योनि नः | योनिनिः |
| १८ | ७ | भवतः | भवन्तं |
| २० | — | नत्वाद्रितः | नत्वादितः |